# शिक्षा निदेशालय

राष्ट्रीय राजधानी क्षेत्र, दिल्ली सरकार

**सहायक सामग्री**
**(2023-2024)**

कक्षा : द्वादशी

# संस्कृत ( केन्द्रिकम् )


मार्गदर्शनम्

## श्री अशोक कुमार

सचिव : ( शिक्षा )

## श्री हिमांशु गुप्ता

निदेशक : ( शिक्षा )

## डा० रीता शर्मा

अतिरिक्त-शिक्षा-निदेशक : ( स्कूल एवं परीक्षा )

*समन्वयक:*

| श्री संजय सुभास कुमार | श्रीमती रितु सिंघल | श्री राज कुमार | श्री कृष्ण कुमार |
|---|---|---|---|
| उप शिक्षा निदेशक (परीक्षा) | विशेष कार्याधिकारी (परीक्षा) | विशेष कार्याधिकारी (परीक्षा) | विशेष कार्याधिकारी (परीक्षा) |

उत्पादन कर्त्ता

अनिल कुमार शर्मा

दिल्ली पाठ्य पुस्तक ब्यूरो में राजेश कुमार, सचिव, दिल्ली पाठ्य पुस्तक ब्यूरो, 25/2, पंखा रोड, संस्थानीय क्षेत्र, नई दिल्ली द्वारा प्रकाशित तथा मैसर्स अरिहन्त ऑफसेट, नई दिल्ली द्वारा मुद्रित।

अशोक कुमार, भा.प्र.से
सचिव ( शिक्षा )
**ASHOK KUMAR, IAS**
**Secretary (Education)**

सत्यमेव जयते

राष्ट्रीय राजधानी क्षेत्र, दिल्ली सरकार
पुराना सचिवालय, दिल्ली-110054
दूरभाष : 23890187 टेलीफैक्स: 23890119
Government of National Capital Territory of Delhi
Old Secretariat, Delhi-110054
Phone : 23890187, Telefax : 23890119
e-mail : secyedu@nic.in

D.O. NO. : DE.5/228/Exam/Message/SM/2018/1095
Dated : 24.11.2023

## Message

**"Children are like wet cement, whatever falls on them makes an impression."**
**Haim Ginott**

Embracing the essence of this quote, the Directorate of Education, GNCT of Delhi is unwavering in its commitment to its core mission of delivering high-quality education to all its students. With this objective in mind, DoE annually develops support materials meticulously tailored to suit the learning needs of students from classes IX to XII.

Every year, our expert faculty members shoulder the responsibility of consistently reviewing and updating the Support Material to synchronize it with the latest changes introduced by CBSE. This continuous effort is aimed at empowering students with innovative approaches and techniques, fostering their problem-solving skills and critical thinking abilities. I am confident that this year will be no exception, and the Support Material will greatly contribute to our students' academic success.

The support material is the result of unwavering dedication of our team of subject experts. The Support Material has been specially curated for our students, with the belief that its thoughtful and intelligent utilization will undoubtedly elevate the standards of learning and will continue to empower our students to excel in their examinations.

I wish to congratulate the entire team for their invaluable contribution in creating a highly beneficial and practical Support Material for our students.

I extend my best wishes to all our students for a promising and bright future.

24.11.23
**(Ashok Kumar)**

**HIMANSHU GUPTA, IAS**
Director, Education & Sports

No. PS/DE/2023/349
Dated: 29/11/2023

Directorate of Education
Govt. of NCT of Delhi
Room No. 12, Civil Lines
Near Vidhan Sabha,
Delhi-110054
Ph.: 011-23890172
E-mail : diredu@nic.in

सत्यमेव जयते

## MESSAGE

It brings me immense pleasure to present the support material for students of classes IX to XII, meticulously crafted by our dedicated subject experts. Directorate of Education is committed to empower educators and students alike by providing these resources free of cost for students of all government and government aided schools of Delhi.

The support material is an appreciable effort to align the content with the latest CBSE patterns. It has been carefully designed as a resource to facilitate the understanding, acquisition and practice of essential skills and competencies outlined in the curriculum.

The core of this support material lies in providing a framework for adopting an analysis-based approach to learning and problem-solving. It aims to prompt educators to reflect on their teaching methodologies and create an interactive pathway between the child and the text.

In the profound words of Dr A.P.J. Abdul Kalam, **"Educationists should build the capacities of the spirit of inquiry, creativity, entrepreneurial and moral leadership among students and become their role model."**

The journey of education is ongoing; it's the process, not just the outcome, which shapes us. This support material endeavours to be that catalyst of change for each student of Directorate of Education.

Let us embark on this transformative journey together, ensuring that every student feels equipped not only with the knowledge but also, with the skills and mindset to thrive in the 21st century.

I wish you all the best for all your future endeavours.

(HIMANSHU GUPTA)

**Dr. RITA SHARMA**
Additional Director of Education
(School/Exam)

सत्यमेव जयते

Govt. of NCT of Delhi
Directorate of Education
Old Secretariat, Delhi-110054
Ph.: 23890185

D.O. No. DE.5/228/Exam/Message/SM/2018/1096
Dated: 24.11.2023

## MESSAGE

The persistent efforts of the Directorate in making the course material more accessible and student-friendly are evident in the conscientious preparation of the Support Material. Our team consistently adapts to the evolving educational landscape, ensuring that the Support Material for the various subjects of classes 9 to 12 align with the latest CBSE guidelines and syllabi prescribed for the annual examinations.

The Support Material encapsulates crucial subject-specific points and facts, tailored to suit the students, all presented in a lucid language. It is our firm belief that these resources will significantly augment the academic prowess of our students, empowering them to excel in their upcoming examinations.

I extend my heartfelt congratulations to the diligent officials and teachers whose dedication and expertise have played a pivotal role in crafting this invaluable content/resource.

I convey my best wishes to all our students for a future brimming with success. Remember, every page you read is a step towards an enlightened tomorrow.

Rita Sharma

**(Dr Rita Sharma)**

# शिक्षा निदेशालय

राष्ट्रीय राजधानी क्षेत्र, दिल्ली सरकार

## सहायक सामग्री

( 2023-2024 )

# संस्कृतम् ( केन्द्रिकम् )

कक्षा : द्वादशी

नि:शुल्क वितरण हेतु

दिल्ली पाठ्य-पुस्तक ब्यूरो द्वारा प्रकाशित

# भारत का संविधान

*भाग 4क*

# नागरिकों के मूल कर्तव्य

**अनुच्छेद 51 क**

**मूल कर्तव्य** - भारत के प्रत्येक नागरिक का यह कर्तव्य होगा कि वह -

(क) संविधान का पालन करे और उसके आदर्शों, संस्थाओं, राष्ट्रध्वज और राष्ट्रगान का आदर करे;

(ख) स्वतंत्रता के लिए हमारे राष्ट्रीय आंदोलन को प्रेरित करने वाले उच्च आदर्शों को हृदय में संजोए रखे और उनका पालन करे;

(ग) भारत की संप्रभुता, एकता और अखंडता की रक्षा करे और उसे अक्षुण्ण बनाए रखे;

(घ) देश की रक्षा करे और आह्वान किए जाने पर राष्ट्र की सेवा करे;

(ङ) भारत के सभी लोगों में समरसता और समान भ्रातृत्व की भावना का निर्माण करे जो धर्म, भाषा और प्रदेश या वर्ग पर आधारित सभी भेदभावों से परे हो, ऐसी प्रथाओं का त्याग करे जो महिलाओं के सम्मान के विरुद्ध हों;

(च) हमारी सामासिक संस्कृति की गौरवशाली परंपरा का महत्त्व समझे और उसका परिरक्षण करे;

(छ) प्राकृतिक पर्यावरण की, जिसके अंतर्गत वन, झील, नदी और वन्य जीव हैं, रक्षा करे और उसका संवर्धन करे तथा प्राणिमात्र के प्रति दयाभाव रखे;

(ज) वैज्ञानिक दृष्टिकोण, मानववाद और ज्ञानार्जन तथा सुधार की भावना का विकास करे;

(झ) सार्वजनिक संपत्ति को सुरक्षित रखे और हिंसा से दूर रहे;

(ञ) व्यक्तिगत और सामूहिक गतिविधियों के सभी क्षेत्रों में उत्कर्ष की ओर बढ़ने का सतत् प्रयास करे, जिससे राष्ट्र निरंतर बढ़ते हुए प्रयत्न और उपलब्धि की नई ऊँचाइयों को छू सके; और

(ट) यदि माता-पिता या संरक्षक है, छह वर्ष से चौदह वर्ष तक की आयु वाले अपने, यथास्थिति, बालक या प्रतिपाल्य को शिक्षा के अवसर प्रदान करे।

# Constitution of India

Part IV A (Article 51 A)

# Fundamental Duties

It shall be the duty of every citizen of India —

(a) to abide by the Constitution and respect its ideals and institutions, the National Flag and the National Anthem;

(b) to cherish and follow the noble ideals which inspired our national struggle for freedom;

(c) to uphold and protect the sovereignty, unity and integrity of India;

(d) to defend the country and render national service when called upon to do so;

(e) to promote harmony and the spirit of common brotherhood amongst all the people of India transcending religious, linguistic and regional or sectional diversities; to renounce practices derogatory to the dignity of women;

(f) to value and preserve the rich heritage of our composite culture;

(g) to protect and improve the natural environment including forests, lakes, rivers, wildlife and to have compassion for living creatures;

(h) to develop the scientific temper, humanism and the spirit of inquiry and reform;

(i) to safeguard public property and to abjure violence;

(j) to strive towards excellence in all spheres of individual and collective activity so that the nation constantly rises to higher levels of endeavour and achievement;

*(k) who is a parent or guardian, to provide opportunities for education to his child or, as the case may be, ward between the age of six and fourteen years.

---

**Note:** The Article 51A containing Fundamental Duties was inserted by the Constitution (42nd Amendment) Act, 1976 (with effect from 3 January 1977).

*(k) was inserted by the Constitution (86th Amendment) Act, 2002 (with effect from 1 April 2010).

# भारत का संविधान

## उद्देशिका

हम, भारत के लोग, भारत को एक [1][**संपूर्ण प्रभुत्व-संपन्न समाजवादी पंथनिरपेक्ष लोकतंत्रात्मक गणराज्य**] बनाने के लिए, तथा उसके समस्त नागरिकों को :

सामाजिक, आर्थिक और राजनैतिक **न्याय,**

विचार, अभिव्यक्ति, विश्वास, धर्म

और उपासना की **स्वतंत्रता,**

प्रतिष्ठा और अवसर की **समता**

प्राप्त कराने के लिए,

तथा उन **सब में**

व्यक्ति की गरिमा और [2][**राष्ट्र की एकता**

**और अखंडता**] सुनिश्चित करने वाली **बंधुता**

बढ़ाने के लिए

दृढ़संकल्प होकर **अपनी इस संविधान सभा में** आज तारीख 26 नवंबर, 1949 ई. को **एतद्द्वारा इस संविधान को अंगीकृत, अधिनियमित और आत्मार्पित करते हैं।**

---

1. संविधान (बयालीसवां संशोधन) अधिनियम, 1976 की धारा 2 द्वारा (3.1.1977 से) ''प्रभुत्व-संपन्न लोकतंत्रात्मक गणराज्य'' के स्थान पर प्रतिस्थापित।
2. संविधान (बयालीसवां संशोधन) अधिनियम, 1976 की धारा 2 द्वारा (3.1.1977 से) ''राष्ट्र की एकता'' के स्थान पर प्रतिस्थापित।

# THE CONSTITUTION OF INDIA

## PREAMBLE

**WE, THE PEOPLE OF INDIA,** having solemnly resolved to constitute India into a [1][**SOVEREIGN SOCIALIST SECULAR DEMOCRATIC REPUBLIC**] and to secure to all its citizens :

**JUSTICE,** social, economic and political;

**LIBERTY** of thought, expression, belief, faith and worship;

**EQUALITY** of status and of opportunity; and to promote among them all

**FRATERNITY** assuring the dignity of the individual and the [2][unity and integrity of the Nation];

**IN OUR CONSTITUENT ASSEMBLY** this twenty-sixth day of November, 1949 do **HEREBY ADOPT, ENACT AND GIVE TO OURSELVES THIS CONSTITUTION.**

---

1. Subs. by the Constitution (Forty-second Amendment) Act, 1976, Sec.2, for "Sovereign Democratic Republic" (w.e.f. 3.1.1977)
2. Subs. by the Constitution (Forty-second Amendment) Act, 1976, Sec.2, for "Unity of the Nation" (w.e.f. 3.1.1977)

# सहायकसामग्रीनिर्मातृणां सूची

| | |
|---|---|
| **समन्वयकः** | डॉ. भास्करानन्द बिडालिया,<br>प्रधानाचार्य, (19930063)<br>राणा प्रताप वरिष्ठ माध्यमिक बाल<br>विद्यालय, रिठाला, दिल्ली-110085<br>आई डी-1413013<br><br>**लेखकमण्डल-**<br><br>डॉ. आभा झा, प्रवक्त्री (19940516)<br>गार्गी सर्वोदय कन्या विद्यालय, ग्रीन पार्क, नई दिल्ली-16<br><br>डॉ. ऋता शर्मा, प्रवक्त्री (19941071)<br>सर्वोदय विद्यालय, ईस्ट पंजाबी बाग, नई दिल्ली<br><br>डॉ. अनिल कुमार, प्रवक्ता (20072355)<br>राजकीय वरिष्ठ माध्यमिक बाल विद्यालय,<br>टीकरी बॉर्डर, नई दिल्ली<br><br>डॉ. शंकर दत्त पाण्डेय, प्रवक्ता (20102096)<br>सर्वोदय बाल विद्यालय, नंबर 2, मंडावली, दिल्ली-92<br><br>डॉ. अजय कुमार, प्रवक्ता (20130015)<br>मुसद्दीलाल राजकीय वरिष्ठ माध्यमिक बाल विद्यालय,<br>नरेला, दिल्ली-40 |

# पुरोवाक्

सम् उपसर्गपूर्वकात् 'कृ' धातौ 'क्त' प्रत्यये कृते 'संस्कृतम्' शब्दः निष्पद्यते। 'संस्कृतम्' अर्थात् व्याकरणनियमैः परिष्कृतम् असाधुत्वादिदोषैः रहितम् इति भावः। या भाषा व्याकरणनियमाननुसृत्य संस्कृता सकलदोषरहिता च वर्तते सैव संस्कृतभाषा। इयं भाषा सुरवाणी, देववाणी, गीर्वाणवाणी, सुरभाषा, आर्यभाषा, देवभाषा इत्यादिभिः नामभिः चापि लोके प्रथिता अस्ति। अत एवोक्तं महाकविना दण्डिना –

**''संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभिः''**

भावाभिव्यक्तिरेव भाषायाः प्रमुखं प्रयोजनम्। मानवः मनसि समुत्पन्नान् विचारान् भावनाः च सार्थकैः शब्दैः लिखितसंकेतैः वा प्रकटयति। एतस्मिन्नेव भावाभिव्यञ्जनक्रमे संस्कृतभाषायाः विकासोऽभूत्। विश्वस्यादिमासु भाषासु संस्कृतभाषा परिगण्यते। अस्यामेव चत्वारः वेदाः, षडङ्गानि, चतुर्दशविद्याः, षड्दर्शनानि नानाशास्त्राणि च रचितानि सन्ति। अस्मात् संस्कृतं न केवलं भाषा प्रत्युत समग्रं जीवनदर्शनमेव वर्तते। अस्याः प्रभावः न केवलं भारतीयासु भाषासु प्रत्युत वैदेशिकीषु भाषासु चापि द्रष्टुं शक्यते। अस्यां न केवलं धार्मिकसाहित्यं लिखितमस्ति अपितु नैतिकं, ज्ञानवर्धकं, मनोरञ्जकं लोकोपकारकं वैज्ञानिकं साहित्यमपि प्रचुरतया प्राप्यते।

संस्कृतभाषा न केवलं प्राचीना अपितु वैज्ञानिकी भाषा खल्वेषा। अस्याः ध्वनिविज्ञानं विलक्षणं वर्तते। भाषावैज्ञानिकानां मतेनापि एषा सर्वश्रेष्ठा भाषा। अस्यां यल्लिख्यते तदेवोच्चारितं भवति। संगणकस्यापि कृते सर्वथोपयोगित्वात् चैतस्याः वैज्ञानिकत्वं सिद्ध्यति। एषा प्रायः विश्वस्य सर्वासां भाषाणां जननी अस्ति। विश्वस्यानेके विद्वांसः संस्कृतस्य प्रभावेण प्रभाविताः सन्तः अस्याः अध्ययनं कृतवन्तः तत्तद्भाषासु च संस्कृतग्रन्थानामनुवादं विहितवन्तः। अतोऽस्याः महत्वं सर्वदा सर्वथा चाक्षुण्णमस्ति। संस्कृतविषये प्रोक्तं केनचित् कविना यत्-

संस्कृते संस्कृतिर्ज्ञेया संस्कृते सकलाः कलाः।
संस्कृते सकलं ज्ञानं संस्कृते किन्न विद्यते।।

डॉ. भास्करानन्दः बिडालिया
प्रधानाचार्यः

# प्रास्ताविकम्

दिल्लीसर्वकारेण संस्कृतभाषाया: महत्वं निरीक्ष्य विद्यालयेषु संस्कृतस्य पठन-पाठनं व्यवस्थितमस्ति। एकादशद्वादशकक्षयोरपि संस्कृतस्य पठनं पाठनं च राजकीयेषु विद्यालयेषु केन्द्रिकविषयरूपेण विधीयते प्राय:। एतदर्थं प्रोक्तयो: कक्षयो: कृते राष्ट्रीय-शैक्षिकानुसन्धान-प्रशिक्षणपरिषदा रचितं 'भास्वती'ति नामकं भागद्वयात्मकं पुस्तकं पाठ्यसामग्रीरूपेण निर्धारितमस्ति। शिक्षकाणां प्रशिक्षणार्थं समये समये राज्य-शैक्षिकनुसन्धान-प्रशिक्षण-परिषदा अनयो: पाठ्यपुस्तकयो: भावार्थ-सरलार्थ-अन्वयादिबोधार्थं प्रयास: क्रियते किन्तु तत्सर्वं शिक्षककेन्द्रितं भवति। एषा पाठ्यसामग्री छात्राणां कृतेऽपि सुगमा, सुबोधा, सुलभा च स्यादिति संस्कृतानुरागिणां छात्राणां शिक्षकाणाञ्चाकाङ्क्षा आसीत् बहुकालात्। अधुना दिल्लीसर्वकार: छात्राणां शिक्षकाणां च मनोरथमिमं पूरयितुं प्रयतमान: वर्तते। प्राथम्येन कार्यमेतत् कैश्चित् कार्यान्तरव्यापृतैरपि संस्कृतशिक्षकै: शिक्षिकाभिश्च विधीयते इत्यतोऽत्र न्यूनाधिक्यं संभाव्यत एव।

केन्द्रीयमाध्यमिकशिक्षासंघट्टनेन परीक्षादृष्ट्या प्रश्नपत्रस्य यत् प्रारूपं विन्यस्तमस्ति तदनुरूपमेव एषा सहायकसामग्री सज्जीकृता शिक्षक-शिक्षिकाभि:। पाठ्यपुस्तकस्य सकलानां पाठानां विशदं विवरणं परीक्षानुरूपं तु विहितमेव, प्रश्नानां विन्यासोऽपि तथा विहित: यथा छात्राणामधिकाधिकोऽभ्यास: भवेत्। अपठितांशावबोधानां, रचनात्मकानां कार्याणां, व्याकरणिकानां तत्त्वानां, साहित्यकाराणां साहित्यिकानां तत्त्वानाञ्चापि पर्याप्त: अभ्यास: छात्रहितेच्छया पुस्तकेऽस्मिन् समावेशित:। नूतनं प्रश्नपत्रप्रारूपं सर्वथा हृदि निधाय शिक्षक-शिक्षिकाभि: प्रतिप्रश्नं विकल्पानां समावेशोऽपि कृतोऽस्ति। सन्धि-समास-प्रत्यय-उपपद-वाच्यादिषु व्याकरणिकेषु तत्त्वेषु न केवलं पाठ्यपुस्तकोदाहरणानां चयनं कृतमपितु नियमोल्लेखोऽपि विहित:, येन छात्रा: याथातथ्येन विषयवस्तुन: अवबोधनं कुर्यु:।

एषा सामग्री न केवलं छात्रेभ्य: प्रत्युत शिक्षकेभ्योऽपि पथप्रदर्शनं विधास्यतीति धिया पुस्तकमिदं संग्रथितम्। एषा संस्कृतजिज्ञासूनां कोमलमतीनां छात्राणां कियदिवोपकारं करिष्यतीति स्वयमेव समूहन्तां सुधिय:। स्वल्पीयसेन कालेन ग्रथिते ग्रन्थेऽस्मिन् या: का: अपि त्रुटय: स्यु: ता: क्षन्तव्या: सन्ति सुधीभि:। एतस्य पुस्तकस्य परिष्काराय विदुषां परामर्शा: स्वागतार्हा:। पर्यन्ते सामग्रीलेखने विषयविशेषज्ञानां शिक्षकाणां शिक्षिकाणां च कृते हार्दिकीं कृतज्ञतां व्यवहराम्यहम्।

डॉ. भास्करानन्द: बिडालिया

प्रधानाचार्य:

# विषय-सूची


| क्रम संख्या | विषय सामग्री | पृष्ठ संख्या |
|---|---|---|
| 1. | सहायक–सामग्री निर्मातृणां सूची | (xi) |
| 2. | पुरोवाक् | (xii) |
| 3. | प्रास्ताविकम् | (xiii) |
| 4. | विषयसूची | (xiv) |
| 5. | संशोधित: पाठ्यक्रम: परीक्षानिर्देशाश्च | (xv–xxiv) |
| 6. | 'क' भाग: – अपठित – अवबोधनम् | (1–18) |
| 7. | 'ख' भाग: – रचनात्मकं कार्यम् | (19–50) |
| | (i) पत्रलेखनम् – औपचारिकम् / अनौपचारिकम् | |
| | (ii) कथापूर्ति: | |
| | (iii) संवादपूर्ति: | |
| | (iv) अनुवादकार्यम् | |
| 8. | 'ग' भाग: – अनुप्रयुक्तं व्याकरणम् | (51–129) |
| | (i) सन्धि: | |
| | (ii) समासा: | |
| | (iii) प्रत्यया: | |
| | (iv) उपपदविभक्तिप्रयोग: | |
| 9. | 'घ' भाग: – (I) पठितावबोधनम् | (130–200) |
| | (i) प्रथम: पाठ: – अनुशासनम् | |
| | (ii) तृतीय: पाठ: – मातुराज्ञा गरीयसी | |
| | (iii) चतुर्थ: पाठ: – प्रजानुरञ्जको नृप: | |
| | (iv) पञ्चम: पाठ: – दौवारिकस्य निष्ठा | |
| | (v) षष्ठ: पाठ: – सूक्तिसौरभम् | |
| | (vi) सप्तम: पाठ: – नैकेनापि समं गता वसुमती | |
| | (vii) नवम: पाठ: – मदालसा | |
| | (viii) एकादश: पाठ: – कार्याकार्यव्यवस्थिति: | |
| 10. | 'घ' भाग: (II) संस्कृत–साहित्येतिहासपरिचय: | (201–245) |
| | (i) पाठ्यपुस्तकस्य–पाठानां सन्दर्भग्रन्था: | |
| | (ii) महाकाव्यं–गद्यकाव्यं–चम्पूकाव्यं च | |
| | (iii) नाट्यसाहित्यम् | |
| 11. | परिशिष्टम् | (246-319) |
| | (i) विद्यार्थिनां कृते सामान्यनिर्देशा: | |
| | (ii) आदर्श प्रश्नपत्राणि | |

# कक्षा – द्वादशी
## संस्कृतम् (केन्द्रिकम्) (कोड सं. 322 )
## पाठ्यक्रमः परीक्षानिर्देशाश्च (2023-24)

भाष्यते व्यवहारादिषु प्रयुज्यते इति भाषा। मानवः स्वमनसि विद्यमानान् विचारान्,भावनाः अनुभूतिं च अर्थयुक्तैः ध्वनिभिः लिखितसङ्केतैः च अभिव्यञ्जयति सा भाषा। भाषा अभिप्रायप्रकटनस्य साधनम्। वस्तुतः लोके द्वयोः मनुष्ययोः मध्ये परस्परम् अवबोधनाय, भावग्रहणाय, भावविनिमयाय च भाषया विना न अन्यत् स्पष्टतमं सरलतमं च साधनं विद्यते। लोके बह्व्यः भाषाः सन्ति यासु संस्कृतभाषा अतिप्राचीनतमा समृद्धा च अस्ति। संस्कृतभाषायाम् एव सन्ति ऋग्यजुस्सामाथर्वाः चत्वारः वेदाः, शिक्षा, व्याकरणं, निरुक्तं, ज्योतिषं, छन्दः कल्पः चेति षडङ्गानि, चतुर्दशविद्याः, विज्ञानम्, आयुर्वेदः, योगशास्त्रादयः ग्रन्थाः। अतः संस्कृतं केवलं भाषा न अपितु किञ्चन जीवनदर्शनम् इति। इयं विद्या (भाषा) भारतीयानां प्रतिष्ठात्मिका कामधेनुः समस्तज्ञानप्रदात्री, ऐक्यप्रदात्री, धर्मार्थकाममोक्षप्रदात्री च अस्ति। सृष्टेः आदितः अद्यावधिः यत् शिक्षणं ज्ञानविज्ञानं च अस्ति तत् सर्वं अस्यां भाषायामेव सन्निहितम् अस्ति। अतिसूक्ष्मभावनां प्रकटयितुं स्पष्टीकर्तुं संस्कृतं विना नैव अन्यत्र विद्यते सामर्थ्यम्। भारतीयं सर्वस्वं विश्वस्य समग्रं तत्त्वं च अस्यां भाषायाम् अस्ति।

संस्कृतस्य भाषावैज्ञानिकत्वम् – ऐतिहासिक-वर्णनात्मक-तुलनात्मकाध्ययन-द्वारा भाषायाः प्रकृतेः, विकासोत्पत्तेः संरचनायाः अध्ययनपूर्वकं सर्वेषां विषयाणां सैद्धान्तिकः निर्णयः भाषाविज्ञानेन क्रियते। भाषाविज्ञान-नामकशास्त्रे शब्दानाम् उत्पत्तिः, वाक्यानां संरचना इत्यादीनां विषयाणां विचारः क्रियते। भाषाविज्ञानस्य सम्बन्धः सर्वेषां मानवानां भाषाभिः सह अस्ति। एवं भाषाविज्ञाने ध्वनेः, ध्वनि-उच्चारणोपयोगिनां स्वरयन्त्रमुखजिह्वादि-अङ्गानां प्रकृति-प्रत्ययादीनां, संज्ञासर्वनाम-क्रिया-विशेषणादीनां नामाख्यात-उपसर्जननिपातानां पदपदार्थविषयकाणां विकारादीनां विकारमूलककारकाणाम् अन्येषां विविधविषयाणाञ्च अध्ययनं क्रियते। भाषाविज्ञाने संस्कृतभाषा-विषयक-वर्णोत्पत्ति-सिद्धान्तस्य अतीव वैज्ञानिकं निरूपणं कृतं वर्तते।

विश्वस्य सर्वासु भाषासु संस्कृतभाषा प्राचीनतमा अस्ति। प्रायः सर्वासु भाषासु संस्कृतपरकशब्दाः उपलभ्यन्ते। संस्कृतभाषा भारतीयभाषाणां जननी इति कथ्यते। सर्वासु भारतीयभाषासु संस्कृतभाषा अन्तर्लीना अस्ति इति सर्वे अङ्गीकुर्वन्ति।

भारतदेशः बहुभाषी देशोऽस्ति। अस्मिन् देशे अनेकतायाम् एकतावर्धिनी भाषेयं सामाजिकसमरसतायै जीवनविकासाय च आवश्यकी वर्तते। संस्कृतस्य सांस्कृतिकं महत्त्वं वर्णयन्तः विद्वांसः कथयन्ति "भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा, संस्कृतिमूलं संस्कृतम्, साहित्यं संस्कृतिवाहकञ्च इति।" एषा संस्कृतिः न केवलं भारतस्य अपि तु विश्वस्य मुकुटायमाना अस्ति। उक्तं च -

सत्यमहिंसादिगुणैः श्रेष्ठा विश्वबन्धुत्वशिक्षिका।
विश्वशान्तिः सुखधात्री भारतीया हि संस्कृतिः॥
संस्कृते संस्कृतिर्ज्ञेया संस्कृते सकलाः कलाः।
संस्कृते सकलं ज्ञानं संस्कृते किन्न विद्यते॥

एवं संस्कृतभाषा परिनिष्ठिता, दोषरहिता, सरला, गभीरा, यथार्था वैज्ञानिकी च भाषा अस्ति। सम्प्रति युगेऽस्मिन् प्रमुखैः उद्देश्यैः संस्कृतभाषा शिक्षणीया अस्ति।

### शिक्षणोद्देश्यानि –

* वसुधैव-कुटुम्बकम् इति भावनाविकासः।
* भारतीयभाषाणां संरक्षणम्।
* संस्कृतभाषया सम्प्रेषणकौशलविकासः।

* परस्परं संस्कृतसम्भाषणेन भावविनिमयः।
* संस्कृत-भाषया एव संस्कृत-शिक्षणम्।
* श्रवण-भाषण-पठन-लेखनेति चतुर्णां भाषिक-कौशलानां विकासः।
* बौद्धिकविकासपुरस्सरम् आध्यात्मिकनैतिकज्ञानम्।
* मानसिकविकासानन्दानुभूतिः रसानुभूतिश्च।
* भारतीयसंस्कृतेः संरक्षणं ज्ञानवर्धनञ्च।
* आत्मानुशासनसंस्थापनार्थम्।
* भाषाशिक्षणकौशलानि वर्धनाय नैपुण्यप्राप्तिः।
* परस्परं वार्तालापमाध्यमेन भावविनिमयः।
* संस्कृतसाहित्यस्य अध्ययनेन ज्ञानानन्दस्य अनुभूतिः।
* मानवजीवनस्य विकासपूर्वकं कल्याणम्।
* संस्कृतभाषया छात्राणां सर्वविधविकासः।

**शिक्षणप्रविधयः -**

* संस्कृतमाध्यमेन सम्भाषणविधिना शनैः शनैः संस्कृतशिक्षणं सम्भविष्यति। गतिवर्धनाय संस्कृताध्यापकैः धैर्येण स्वकीयाध्यापन-कार्यक्रमाणां नियोजनम्। रुचिकरभाषाभ्यासेन भाषिकोपलब्धिः। भाषिकाभ्यासाय वार्तालाप-कथाश्रवण-वादविवाद-संवाद-वर्णनपरकप्रतियोगिताभिः भाषाशिक्षणं कारयितुं शक्यते।
* विभिन्नप्रामाणिकसंस्थानां कार्यक्रमाः साहित्यसामग्र्यश्च प्रयुज्य उत्तमशिक्षणं कर्तुं शक्यते।
* संस्कृतभाषया उपलब्ध-दृश्य-श्रव्य-सामग्री-माध्यमेन भाषाभ्यासः।
* विभिन्नपाठ्यसामग्रीद्वारा शिक्षकः स्वकीयं शिक्षणकार्यं रुचिकरं कर्तुं शक्नोति।
* भाषाशिक्षकः छात्रान् स्नेहपूर्वकम् (आत्मीयभावेन) पाठयेत्।
* अद्यतनपूर्वकं साहित्यकोश-शब्दकोश-सन्दर्भग्रन्थानां सहायतया छात्राणां तत्परतावर्धनम्।
* प्राचीनार्वाचीनयोर्मध्ये समन्वयस्थापनद्वारा नूतनशिक्षणविधिभिश्च संस्कृतशिक्षणम्।

**कौशलानि-**

* **श्रवणकौशलम्** – भावाधिग्रहणाय ध्वन्यात्मकं भाषायाः प्रथमं कौशलम् इदम्। अस्य साधनानि-गुरुमुखम्, आकाशवाणी, दूरवाणी, परिवारसदस्याः, समाजः, कक्ष्याः, ध्वनिमुद्रणयन्त्रम्, दूरदर्शनम् इत्यादीनि।
* **भाषणकौशलम्**- भावाभिव्यक्तये ध्वन्यात्मकं भाषायाः इदं द्वितीयं कौशलम्। वाग्-रूपं भावप्रकटनम् एव भाषणम्, परिसरप्रभावेण आधारेण वा भाषणशक्तिः जायते।
* **पठनकौशलम्** – भावाधिग्रहणाय लिप्यात्मकं भाषायाः तृतीयं कौशलम् इदम्। (अर्थग्रहणपूर्वकं स्पष्टरूप-वाचनम् इत्यर्थः)
* **लेखनकौशलम्**- भावाभिव्यक्तये लिप्यात्मकं भाषायाः चतुर्थं कौशलम् इदम्। (ध्वनिरूपे विद्यमानं भाषांशं लिपिरूपे अवतारणं लेखनम् इति उच्यते)
* ज्ञानात्मक-अवबोधनात्मक-अनुप्रयोगात्मक-विश्लेषणात्मक-संश्लेषणात्मक-मूल्याङ्कनात्मक-लक्षिताधिगमनविशेषाः।

कक्षा – द्वादशी (2023-24) आहत्य-अङ्काः - 80+20

संस्कृतम् (केन्द्रिकम्) (कोड सं. 322 ) आहत्य-कालांशाः – 210

वार्षिकमूल्याङ्कनाय निर्मिते प्रश्नपत्रे भागपञ्चकं भविष्यति –

| | | | |
|---|---|---|---|
| 'क' खण्डः अपठितावबोधनम् | | 10 अङ्काः | 20 कालांशाः |
| 'ख' खण्डः रचनात्मककार्यम् | | 15 अङ्काः | 30 कालांशाः |
| 'ग' खण्डः अनुप्रयुक्तव्याकरणम् | | 20 अङ्काः | 60 कालांशाः |
| 'घ' खण्डः | | 35 अङ्काः | |
| (i) पठितावबोधनम् | (25 अङ्काः) | | 85 कालांशाः |
| (ii) संस्कृत-साहित्येतिहासस्य सामान्यः परिचयः | (10 अङ्काः) | | 25 कालांशाः |

खण्डानुसारं विषयाः अङ्कविभाजनञ्च 80 अङ्काः

| क्र. सं. | विषयाः | प्रश्नप्रकाराः | मूल्यभारः |
|---|---|---|---|
| | 'क' भागः<br>अपठितावबोधनम् | | |
| 1. | अपठितः गद्यांशः (80-100 शब्दपरिमितः) | अति-लघूत्तरात्मकौ<br>पूर्णवाक्यात्मकौ<br>शीर्षकम् (लघूत्तरात्मकः)<br>भाषिककार्यम् (बहुविकल्पात्मकाः) | 1×2=2<br>2×2=4<br>1×1=1<br>1×3=3 |
| | | पूर्णभारः | 10 अङ्काः |
| | 'ख' भागः<br>रचनात्मककार्यम् | | |
| 2. | पत्रम् | निबन्धात्मकः | ½×10=5 |
| 3. | लघुकथापूर्तिः/वार्तालापे एकपक्षपूरणम् | निबन्धात्मकः | ½×10=5 |
| 4. | संस्कृतभाषया अनुवादः । | पूर्णवाक्यात्मकः | 1×5=5 |
| | | पूर्णभारः | 15 अङ्काः |
| | 'ग' भागः<br>अनुप्रयुक्तव्याकरणम् | | |
| 5. | सन्धिः | लघूत्तरात्मकाः | 1×6=6 |
| 6. | समासः | बहुविकल्पात्मकाः | 1×5=5 |

| | | | |
|---|---|---|---|
| 7. | प्रत्ययाः | बहुविकल्पात्मकाः | 1×6=6 |
| 8. | उपपदविभक्तिप्रयोगः | बहुविकल्पात्मकाः | 1×3=3 |
| | | **पूर्णभारः** | 20 **अङ्काः** |
| | **'घ' भागः**<br>**(i) पठित – अवबोधनम्** | | |
| 9. | गद्यांशः | अति-लघूत्तरात्मकौ<br>पूर्णवाक्यात्मकौ<br>लघूत्तरात्मकौ (भाषिककार्यम्) | ½×2=1<br>1×2=2<br>1×2=2 |
| 10. | पद्यांशः | अति-लघूत्तरात्मकौ<br>पूर्णवाक्यात्मकौ<br>लघूत्तरात्मकौ (भाषिककार्यम्) | ½×2=1<br>1×2=2<br>1×2=2 |
| 11. | नाट्यांशः | अति-लघूत्तरात्मकौ<br>पूर्णवाक्यात्मकौ<br>लघूत्तरात्मकौ (भाषिककार्यम्) | ½×2=1<br>1×2=2<br>1×2=2 |
| 12. | भावार्थे रिक्तस्थानपूर्तिः / शुद्धभावार्थचयनम् | निबन्धात्मकः / लघूत्तरात्मकः | 1×3=3 |
| 13. | अन्वयः | निबन्धात्मकः | 1×3=3 |
| 14. | प्रदत्तवाक्यांशानां सार्थकं संयोजनम् । | लघूत्तरात्मकः | ½×4=2 |
| 15. | प्रदत्तपङ्क्तिषु प्रसङ्गानुसारं पदानाम् अर्थलेखनम् । | लघूत्तरात्मकः | ½×4=2 |
| | | **पूर्णभारः** | **25 अङ्काः** |
| | **'घ' भागः**<br>**(ii) संस्कृत-साहित्येतिहासस्य सामान्यः परिचयः** | | |
| 16. | भास्वतीपाठ्यपुस्तकस्थ-पाठानां सन्दर्भग्रन्थाः, रचयितारः तेषां रचनाः च (1+1+1) | लघूत्तरात्मकाः | 1×3=3 |
| 17. | महाकाव्यम्, गद्यकाव्यम्, चम्पूकाव्यम् | लघूत्तरात्मकाः | 1×3=3 |
| 18. | नाट्यतत्त्वानां मुख्यविशेषतानां परिचयः | लघूत्तरात्मकाः | 1×4=4 |
| | | **पूर्णभारः** | **10 अङ्काः** |
| | | **सम्पूर्णभारः** | **80 अङ्काः** |

# प्रश्नपत्र-प्रारूपम् /संरचना

## कक्षा – द्वादशी (2023-24)

## संस्कृतम् (केन्द्रिकम्) कोड् सङ्ख्या - 322

| प्रश्नप्रकारः | प्रश्नानां सङ्ख्या | विभाग-सङ्ख्या | प्रतिप्रश्नम् अङ्कभारः | आहत्याङ्काः |
|---|---|---|---|---|
| **बहुविकल्पात्मकाः 1अङ्कः** | 3+5+6+3=17 | 4 | 1 | 17 |
| **अति-लघूत्तरात्मकाः ½अङ्कः** | 2+2+2=6 | 3 | ½ | 3 |
| **अति-लघूत्तरात्मकाः 1 अङ्कः** | 2=2 | 1 | 1 | 2 |
| **निबन्धात्मकः ½ अङ्कः** (रिक्तस्थानपूर्तिमाध्यमेन) | 10+10=20 | 2 | ½ | 10 |
| **निबन्धात्मकः. 1 अङ्कः** | 3+3=6 | 2 | 1 | 6 |
| **पूर्णवाक्यात्मकः 1अङ्कः** | 2+2+2+5=11 | 4 | 1 | 11 |
| **पूर्णवाक्यात्मकः 2अङ्कौ** | 2=2 | 1 | 2 | 4 |
| **लघूत्तरात्मकाः ½ अङ्कः** | 4+4=8 | 2 | ½ | 4 |
| **लघूत्तरात्मकाः 1अङ्कः** | 1+6+2+2+2+3+3+4=23 | 8 | 1 | 23 |
| | | | आहत्याङ्काः | 80 |

## संस्कृतपाठ्यक्रमः (केन्द्रिकम्) कोड् सङ्ख्या - 322

### कक्षा-द्वादशी (2023-24)

### वार्षिकं मूल्याङ्कनम्

| | |
|---|---|
| **'क' भागः**<br>**अपठित – अवबोधनम्** | **(10 अङ्काः)** |
| 1. एकः अपठितः गद्यांशः<br>80-100 शब्दपरिमितः गद्यांशः, सरलकथा<br>➢ एकपदेन पूर्णवाक्येन च अवबोधनात्मकं कार्यम् (2+4)<br>➢ समुचितशीर्षकलेखनम् (1)<br>➢ अनुच्छेद – आधारितं भाषिकं कार्यम् (3)<br>भाषिककार्याय तत्त्वानि -<br>✓ वाक्ये कर्तृ – क्रिया पदचयनम्<br>✓ विशेषण – विशेष्य चयनम्<br>✓ पर्याय – विलोमपद – चयनम्<br>✓ सर्वनामस्थाने संज्ञाप्रयोगः | 10 |
| **'ख' भागः**<br>**रचनात्मकं कार्यम्** | **(15 अङ्काः)** |
| 2. औपचारिकम् अनौपचारिकं पत्रम्/प्रार्थनापत्रम्<br>(मञ्जूषायाः सहायतया रिक्तस्थानपूर्तिं कृत्वा पूर्णं पत्रं लेखनीयम्) | 5 |
| 3. लघुकथा (शब्दसूचीसाहाय्येन, रिक्तस्थानपूर्ति-माध्यमेन)/वार्तालापे एकपक्षपूरणम् | 5 |
| 4 हिन्दीभाषया आङ्ग्लभाषया वा लिखितानां वाक्यानां संस्कृतभाषया अनुवादः | 5 |
| **'ग' भागः**<br>**अनुप्रयुक्त-व्याकरणम्** | **(20 अङ्काः)** |
| 5. पाठाधारिताः सन्धिविच्छेदाः – (2+2+2)<br>➢ स्वरसन्धिः<br>➢ व्यञ्जनसन्धिः<br>➢ विसर्गसन्धिः | 6 |
| 6. पाठाधारित-समासाः विग्रहाः च –<br>➢ अव्ययीभावः, द्विगुः, द्वन्द्वः, तत्पुरुषः, कर्मधारयः, बहुव्रीहिः। | 5 |
| 7. प्रत्ययाः - (प्रकृतिप्रत्यय-संयोजनं वियोजनञ्च)<br>(अ) कृत्- क्त, क्तवतु, तव्यत्, अनीयर्, शतृ, शानच्, क्तिन्<br>(आ) तद्धित- मतुप्, इन्, ठक्, त्व, तल् | 6 |
| (इ) स्त्री-प्रत्ययाः – टाप्, ङीप् | 3 |

| | |
|---|---|
| 8. उपपदविभक्तिप्रयोगः (पाठ्यपुस्तकम् आधृत्य) | |
| **'घ' भागः**<br>**(i) पठितावबोधनम्** | **(25 अङ्काः)** |
| 9. गद्यांशम् अधिकृत्य अवबोधनात्मकं कार्यम्<br>प्रश्नप्रकाराः – एकपदेन पूर्णवाक्येन च प्रश्नोत्तराणि<br>भाषिककार्यम् –<br>➢ वाक्ये कर्तृ – क्रिया पदचयनम्<br>➢ विशेषण – विशेष्य चयनम्<br>➢ पर्याय – विलोमपद – चयनम्<br>➢ सर्वनामस्थाने संज्ञाप्रयोगः | 5 |
| 10. पद्यांशम् अधिकृत्य अवबोधनात्मकं कार्यम्<br>प्रश्नप्रकाराः – एकपदेन पूर्णवाक्येन च प्रश्नोत्तराणि<br>भाषिककार्यम् –<br>➢ वाक्ये कर्तृ – क्रिया पदचयनम्<br>➢ विशेषण – विशेष्य चयनम्<br>➢ पर्याय – विलोमपद – चयनम्<br>➢ सर्वनामस्थाने संज्ञाप्रयोगः | 5 |
| 11. नाट्यांशम् अधिकृत्य अवबोधनात्मकं कार्यम्<br>प्रश्नप्रकाराः – एकपदेन पूर्णवाक्येन च प्रश्नोत्तराणि<br>भाषिककार्यम् –<br>➢ वाक्ये कर्तृ – क्रिया पदचयनम्<br>➢ विशेषण – विशेष्य चयनम्<br>➢ पर्याय – विलोमपद – चयनम्<br>➢ सर्वनामस्थाने संज्ञाप्रयोगः | 5 |
| 12. भावार्थे रिक्तस्थानपूर्तिः / प्रदत्ते भावार्थत्रये शुद्धभावार्थचयनम् | 3 |
| 13. प्रदत्तेषु अन्वयेषु रिक्तस्थानपूर्तिः | 3 |
| 14. प्रदत्तवाक्यांशानां सार्थकं संयोजनम् । | 2 |
| 15. प्रदत्तपङ्क्तिषु प्रसङ्गानुसारं पदानाम् अर्थलेखनम् । | 2<br>2 |
| **'घ' भागः**<br>**(ii) संस्कृत-साहित्येतिहासस्य सामान्यः परिचयः** | **(10 अङ्काः)** |
| 16. भास्वतीपाठ्यपुस्तकस्थ-पाठानां सन्दर्भग्रन्थाः, रचयितारः तेषां रचनाः च (1+1+1) | 3 |
| 17. महाकाव्यम्, गद्यकाव्यम्, चम्पूकाव्यम् | 3 |
| 18. नाट्यतत्त्वानां मुख्यविशेषतानां परिचयः | 4 |

**आहत्याङ्काः - 80 अङ्काः**

## परीक्षायै निर्धारिताः पाठाः

| पाठ्यपुस्तकम् – भास्वती - द्वितीयो भागः | | | |
|---|---|---|---|
| **पाठसङ्ख्या** | **पाठनाम** | **पाठसङ्ख्या** | **पाठनाम** |
| प्रथमः पाठः | अनुशासनम् | षष्ठः पाठः | सूक्तिसौरभम् |
| तृतीयः पाठः | मातुराज्ञा गरीयसी | सप्तमः पाठः | नैकेनापि समं गता वसुमती |
| चतुर्थः पाठः | प्रजानुरञ्जको नृपः | नवमः पाठः | मदालसा |
| पञ्चमः पाठः | दौवारिकस्य निष्ठा | एकादशः पाठः | कार्याकार्यव्यवस्थितिः |

पाठ्यपुस्तकम्-संस्कृत साहित्य परिचयः

| **पाठसङ्ख्या** | **पाठनाम** |
|---|---|
| चतुर्थः अध्यायः | महाकाव्य |
| सप्तमः अध्यायः | गद्य काव्य एवं चम्पू काव्य |
| नवमः अध्यायः | नाट्य साहित्य |

**पुस्तकानि**

- भास्वती - द्वितीयो भागः (पाठ्यपुस्तकम्) रा. शै. अनु. प्र. परि. द्वारा प्रकाशितम् ।
- व्याकरणसौरभम् (संशोधितसंस्करणम्) रा. शै. अनु. प्र. परि. द्वारा प्रकाशितम् ।
- रचनानुवादकौमुदी (सहायकपुस्तकम्) कपिलदेवद्विवेदीलिखितम् विश्वविद्यालयप्रकाशनम्, वाराणसी ।
- संस्कृतसाहित्यपरिचयः (सन्दर्भपुस्तकम्) (संशोधितसंस्करणम्) रा. शै. अनु. प्र. परि. द्वारा प्रकाशितम् ।
- वेदपारिजात (अतिरिक्ताध्ययनार्थम्) रा. शै. अनु. प्र. परि. द्वारा प्रकाशितम् ।

**************************

# आन्तरिक-मूल्याङ्कनम्
## (20 अङ्काः)

**उद्देश्यानि**

- ❖ छात्राणां सृजनात्मकक्षमतायाः विकासः।
- ❖ श्रवण-भाषण-पठन-लेखनकौशलानां विकासः।
- ❖ चिन्तनक्षमतायाः आत्मविश्वासस्य च संवर्धनम्।

| क्र. सं. | गतिविधयः | उदाहरणानि | अङ्काः | निर्देशाः | मूल्याङ्कनबिन्दवः |
|---|---|---|---|---|---|
| 1. | **आवधिक-परीक्षाः (पीरियोडिक् - असैस्मैंट)** | लिखितपरीक्षा | 05 | विद्यालयेन समये समये लिखितपरीक्षाणाम् आयोजनं करणीयं भवति। | परीक्षासु यत्र विद्यार्थिनः श्रेष्ठाः अङ्काः स्युः तयोः द्वयोः परीक्षयोः एव अधिभारः ग्रहीतव्यः। अपि च आवधिकपरीक्षासु अपि प्रश्नेषु आन्तरिकविकल्पाः देयाः। मूल्याङ्कनसमये यदि छात्रः सर्वान् प्रश्नान् उत्तरति तर्हि छात्रहिताय यत्र अधिकाः अङ्काः सन्ति तेषाम् एव मूल्याङ्कनं करणीयम्। |
| 2 | **बहुविधमूल्याङ्कनम्** | ❖ कक्षायां पाठितस्य पाठस्य लघुमूल्याङ्कनम्<br>❖ निर्गतपत्राणि<br>❖ प्रश्नोत्तरी<br>❖ मौखिकी परीक्षा<br>❖ प्रतियोगिताः<br>❖ प्रश्नमञ्चस्यायोजनम् | 05 | कक्षायां पाठित-पाठस्य विषयस्य वा बहुविधं मूल्याङ्कनम् अपेक्षितम् अस्ति। अनेन विद्यार्थिनां विविधकौशलानां मूल्याङ्कनं भवेत्। | ❖मौलिकता<br>❖विषयसम्बद्धता<br>❖शुद्धता<br>❖समयबद्धता<br>❖प्रस्तुतीकरणम् |
| 3. | **निवेशसूचिका (पोर्टफोलियो)** | ❖ कक्षाकार्यम्<br>❖ सामूहिक-मूल्याङ्कनम्<br>❖ स्वमूल्याङ्कनम्<br>❖ विद्यार्थिनः विषयगताः उपलब्धयः | 05 | विद्यार्थिभिः कक्षायां कृतानां कार्याणाम् उपलब्धीनां च संरक्षणं संयोजनं च सञ्चिकायां पत्रावल्यां वा करणीयम्। एतेन समग्रं मूल्याङ्कनं प्रमाणिकत्वेन भवितुं शक्नोति। | ❖ सुलेखः<br>❖ तथ्यात्मकता<br>❖ प्रामाणिकता<br>❖ समयबद्धता |

| | | | | | |
|---|---|---|---|---|---|
| 4. | **भाषा-संवर्धनाय गतिविधयः**<br>**(क) श्रवण-भाषण-कौशलम्** | ❖ कथा<br>❖ संवादः/ वार्तालापः<br>❖ भाषणम्<br>❖ नाटकम्<br>❖ वार्ताः<br>❖ आशुभाषणम्<br>❖ संस्कृतगीतानि<br>❖ श्लोकोच्चारणम्<br>❖ प्रहेलिकाः | 05 | ❖ छात्राः कामपि कथां श्रावयितुं शक्नुवन्ति।<br>❖ शिक्षकः कमपि विषयं सूचयित्वा परस्परं संवादं कारयितुं शक्नोति।<br>❖ दूरदर्शने वार्तावली इत्याख्यः संस्कृत-कार्यक्रमः प्रसारितः भवति तं द्रष्टुं छात्राः प्रेरणीयाः।<br>❖ श्रवण-कौशल-मूल्याङ्कनाय शिक्षकः स्वयम् अपि कथां श्रावयित्वा ततः सम्बद्ध-प्रश्नान् प्रष्टुं शक्नोति। | ❖ उच्चारणम्<br>❖ शुद्धता<br>❖ समयबद्धता<br>❖ प्रस्तुतीकरणम्<br>(आरोहावरोह-गतियति-प्रयोगः) |
| | **(ख) लेखनकौशलम्** | ❖ विविधविषयान् आधृत्य मौलिकलेखनम् यथा– देशः, माता, पिता, गुरुः, विद्या पर्यावरणम्, योगः, समयस्य सदुपयोगः, शिक्षा, अनुशासनम् इत्यादयः।<br>❖ शैक्षिकभ्रमणस्य संस्कृतेन प्रतिवेदनलेखनम्।<br>❖ दैनन्दिनीलेखनम्।<br>❖ सङ्केताधारितं कथालेखनम्।<br>❖ भित्तिपत्रिकायाः निर्माणम्।<br>❖ श्रुतलेखः।<br>❖ सूक्तिलेखनम्। | | ❖ छात्राः यथाशक्यं कक्षायामेव लेखनकार्यं कुर्युः।<br>❖ टिप्पणी- पुस्तिकायाः निर्माणम्।<br>❖ वैयक्तिकपरीक्षणम्। | ❖ विषय-सम्बद्धता<br>❖ शुद्धता (विशेषतः पञ्चमवर्णस्यप्रयोगः)<br>❖ समयबद्धता<br>❖ सुलेखः<br>❖ प्रस्तुतीकरणम् |
| | **अवधातव्यम्** –उपर्युक्त-गतिविधयः उदाहरणरूपेण प्रदत्ताः सन्ति। एतदतिरिच्य एतादृशाः अन्यगतिविधयः अपि भवितुमर्हन्ति। | | | | |

# संशोधित सहायक सामग्री-संस्कृत

## (केन्द्रिक) कूट संख्या-322)

## 'क' भागः

### अपठित-अवबोधनम् पूर्णांकाः 10

**1. अधोलिखितं गद्यांशं पठित्वा दत्त- प्रश्नान् संस्कृतेन उत्तरत**

एकदा शरीरस्य सर्वाणि इन्द्रियाणि हस्तौ, पादौ, मुखं, नासिका, कर्णौ इत्यादीनि मिलित्वा अचिन्तयन्-"वयं सर्वे प्रतिदिनं परिश्रमं कुर्मः परम् एतत् उदरं सर्वं स्वीकरोति, स्वयं किमपि कार्यं न करोति। अद्यप्रभृति वयमपि कार्यं न करिष्यामः। "एवं चिन्तयित्वा सर्वाणि अङ्गानि कार्यम् अत्यजन्। पादौ स्थिरौ भूत्वा अतिष्ठताम्। हस्तौ निश्चलौ अभवताम्। मुखम् अन्नकणम् अपि न प्राविशत्। एवं द्वे दिने व्यतीते जाते। शनैः-शनैः सर्वाणि अंगानि शिथिलानि अभवन्। कार्यशक्तिः क्षीणा अभवत्। कथमपि सर्वे पुनः मिलित्वा विचारम् अकुर्वन्-

"अहो! अस्माकं प्रमादः। भुक्तस्य अन्नस्य पाचनं तु उदरमेव करोति। एतद् एव अस्मभ्यं शक्तिं ददाति। अस्य कृपया एव वयं जीवामः। अतः अस्माभिः सर्वैः उदरेण सह सहयोगः करणीयः।" नूनं संहतिः एव कार्यसाधिका।

(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) 1 × 2 = 2

(i) कौ निश्चलौ अभवताम्?

(ii) इन्द्रियैः केन सह सहयोगः करणीयः?

(iii) कस्य पाचनम् उदरं करोति?

(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 2 × 2 = 4

(i) एकदा सर्वाणि इन्द्रियाणि मिलित्वा किम् अचिन्तयन्?

(ii) कौ स्थिरौ भूत्वा अतिष्ठताम्?

(iii) सर्वे पुनः मिलित्वा किं विचारम् अकुर्वन्?

(इ) गद्यांशस्य समुचितं शीर्षकं लिखत। 1×1=1

(ई) निर्देशानुसारम् उत्तरत - (केवलं प्रश्नत्रयम्) 1×3=3

(i) 'आलस्यम्' इत्यस्य विलोमपदं किम्?

(1) निद्रा (2) परिश्रमः

(3) प्रमादः (4) शनैः-शनैः ।

(ii) 'चरणौ' इत्यर्थे कः शब्दः अनुच्छेदे प्रयुक्तः?

(1) पादौ (2) हस्तौ

(3) इन्द्रियाणि (4) अङ्गनि

(iii) 'सर्वाणि अङ्गानि कार्यम् अत्यजन्' अत्र क्रियापदं किम्?

(1) 'सर्वाणि (2) अङ्गानि

(3) अत्यजन् (4) कार्यम्

(iv) 'भुक्तस्य अन्नस्य' अत्र विशेषणपदं किं ?

(1) भुक्तस्य (2) अन्नस्य

(4) पाचनं (4) उदरमेव

**2. अधोलिखितं अपठितं गद्यांशं पठित्वा प्रदत्त - प्रश्नान् संस्कृतेन उत्तरत-**

**पूर्णाकाः 10**

प्रकृतिः मनुष्यस्य उपकारिणी। मनुष्यैः सह तस्याः शाश्वतः सम्बन्धः। सा विविधरूपेषु अस्मिन् जगति आत्मानं प्रकटयति। पशवः, पक्षिणः वनस्पतयः च तस्याः एव अंगानि। निराशाः असहायाः जनाः तस्याः एव आश्रयं प्राप्नुवन्ति । सा स्वमनोहरेण सौन्दर्येण नीरसं हृदयम् अपि सरसं करोति । सूर्यः चन्द्रः च तस्याः नेत्रे। शस्य -श्यामला एषा भूमिः, विविधाः औषधयः सकलानि खनिजानि च प्रकृतेः एव शोभा। सा तु नित्यम् एव एतैः साधनैः सर्वेषाम् उपकारं करोति परम् अधन्यः अयं जनः कृतज्ञतां विहाय असाधुसेवितं पथं गच्छति विविधानि कष्टानि च अनुभवति। नरः शाश्वतं सुखं वाञ्छति चेत् तर्हि प्रकृतेः प्रतिकूलं कदापि न आचरेत् इति।

(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) 1×2=2

(i) प्रकृतिः कस्य उपकारिणी?

(ii) सूर्यः चन्द्रः च प्रकृतेः के?

(iii) शस्य श्यामला का?

(आ) पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) 2×2=4

(1) प्रकृते: अङ्गानि कानि?

(2) कीदृशा: जना: प्रकृते: आश्रयं प्राप्नुवन्ति?

(3) प्रकृति: स्वमनोहरेण सौन्दर्येण किं करोति?

(इ) अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत। 1×1=1

(ई) निर्देशानुसारम् उत्तरत - (केवलं प्रश्नत्रयम्) 1×3=3

(1) "सा विविधरूपेषु अस्मिन् जगति आत्मानं प्रकटयति" अत्र 'सा' इति सर्वनामपदं कस्यै प्रयुक्तम्?

(i) प्रकृति: (ii) भूमि:

(iii) औषधय: (iv) वनस्पतय:

(2) "नित्यम्" इत्यस्य क: पर्यायशब्द: अनुच्छेदे प्रयुक्त:?

(i) सुखं (ii) शाश्वतम्

(iii) प्रतिकूलं (4) कदापि

(3) "नर: शाश्वतं सुखं वाञ्छति" अत्र कर्तृपदं किम्?

(i) नर: (ii) वाञ्छति

(iii) सुखं (iv) शाश्वतम्

(4) "असाधुसेवितं पथं" अत्र विशेष्यपदं किम्?

(i) विहाय (ii) असाधुसेवितं

(iii) पथम् (iv) कृतज्ञतां

**3.** परीक्षाया: दिनानि अतिविचित्राणि भवन्ति । यथा-यथा परीक्षाकाल: समीपम् आयाति तथा छात्राणां हृदयगति: वर्धते। परीक्षा प्राय: छात्रेभ्य: भयप्रदा एव प्रतीयते। अस्मिन् काले न निद्रैव आयाति। बुभुक्षापि सम्यक्प्रकारेण नानुभूयते। कदाचित् कस्मिंश्चित् विषये अभ्यासाल्पता कदाचिच्च अन्यस्मिन् । मस्तिष्क: सदैव तनावयुक्त: एव प्रतीयते। न केवलं

छात्राणाम् अभिभावकानामपि दशा एतादृशी एव भवति। परन्तु ये छात्राः कक्षायां दत्तावधानाः तिष्ठन्ति वर्षस्य प्रारम्भात् एवं पठितस्य अभ्यासं कुर्वन्ति, ते सर्वथा शान्तमनसा सरलतया च उत्तमाङ्कैः परीक्षाम् उत्तरन्ति। अतः सर्वैः छात्रैः एवमेव आचरणीयम्।

(अ) एकपदेन उत्तरत–(केवलं प्रश्नद्वयम्) 1×2=2

(i) परीक्षाकाले का न आयाति?

(ii) कः सदैव तनावयुक्तः एव प्रतीयते?

(iii) वर्षस्य प्रारम्भात् पठितस्य किं करणीयम्?

(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 2×2=4

(1) परीक्षाकाले किं किं भवति?

(2) कीदृशाः छात्राः उत्तमाङ्कैः परीक्षाम् उत्तरन्ति?

(3) परीक्षा प्रायशः छात्रेभ्यः कीदृशी प्रतीयते?

(इ) अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत। 1×1=1

(ई) निर्देशानुसारम् उत्तरत (केवलं प्रश्नत्रयम्) 1×3=3

(1) "ये छात्राः कक्षायां दत्तावधानाः तिष्ठन्ति'' अत्र क्रियापदं किम्?

(i) छात्राः (ii) कक्षायां

(iii) दत्तावधानाः (iv) तिष्ठन्ति

(2) "मस्तिष्कः तनावयुक्तः" अनयोः विशेष्यपदं किम्?

(i) मस्तिष्कः (ii) तनावयुक्तः

(iii) सदैव (iv) प्रतीयते

(3) "यथा-यथा परीक्षाकालः समीपम् आयाति" अत्र कर्तृपदं किम्?

(i) परीक्षाकालः (ii) समीपम्

(iii) यथा-यथा (iv) आयाति

(4) "दूरम्" इत्यस्य विलोमपदम् अनुच्छेदात् चित्वा लिखत?

(i) समीपम् (ii) परीक्षाकालः

(iii) सदैव (iv) यथा-यथा

4. जीवने धनस्य अत्यधिकं महत्त्वम् अस्ति। धनेन जीवननिर्वाहः भवति। धनं विना वयं कथं भोजनम् अपि प्राप्तुं शक्नुमः? परन्तु यदि लोभेन वयं अन्धाः भूत्वा अधिकाधिकं धनं प्राप्तुम् अनुचितसाधनानां प्रयोगं कुर्मः तर्हि तेन धनेन दुःखमेव भविष्यति । तस्य रक्षणे एव समयो व्यतीतो भवति। कोऽपि तद् हरिष्यति इति चिन्ता प्रतिक्षणं वर्धते। अभिमानः विवेकं नाशयति। कुत्सितधनस्य प्रच्छादनाय महान् क्लेशो भवति। अतः वयम् उचितसाधनैः एव धनार्जनं कुर्याम। कस्मै अपि ईर्ष्यां न कुर्याम अपितु यथाशक्ति ये असहायाः सन्ति तेषां साहाय्यं कुर्याम। त्यागेन एव धनस्य संरक्षणं भवति। त्यागपूर्वकम् उपभोगेन एव वयं जीवने आनन्दं प्राप्तुं शक्नुमः। अन्यस्य धनं प्रति कदापि अस्माभिः लोभो नैव कर्तव्यः।

(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) 1×2=2

(i) जीवननिर्वाहः केन भवति?

(ii) अभिमानः कं नाशयति?

(iii) केन धनस्य संरक्षणं भवति?

(आ) पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्) 2×2=4

(1) कीदृशेन धनेन दुःखमेव भवति?

(2) अस्माभिः कं प्रति लोभो न कर्तव्यः?

(3) वयम् उचितसाधनैः किं कुर्याम?

(इ) अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत। 1×1=1

(ई) निर्देशानुसारम् उत्तरत - (केवलं प्रश्नत्रयम्) 1×3=3

(1) "वयं जीवने आनन्दं प्राप्तुं शक्नुमः" अत्र क्रियापदं किम्?

(i) शक्नुमः (ii) जीवने

(iii) प्राप्तुं (iv) वयं

(2) "महान् क्लेशो" अनयोः विशेष्यपदं किम्?

(i) महान् (ii) प्रच्छादनाय

(iii) क्लेशो (iv) भवति

(3) "तस्य रक्षणे एव समयो व्यतीतो भवति" अत्र "तस्य" इति सर्वनामपदं कस्मै प्रयुक्तम्?

(i) धनेन (ii) धनस्य

(iii) धनं (iv) धनाय

(4) "दुःखम्" इत्यस्य पर्यायपदम् अनुच्छेदात् चित्वा लिखत?

(i) आनन्दं (ii) क्लेशः

(iii) लोभो (iv) असहायाः

**5.** सूर्यवंशे दधीचिनामा नृपः अभवत्। एकदा देवासुराणां मध्ये युद्धोऽभवत्। देवाः युद्धे अशक्ताः आसन्। ते भगवतः विष्णोः समीपं गतवन्तः। विष्णुना उक्तं–यदि महर्षेः दधीचेः अस्थिभ्यः वज्रं निर्मीयेत तदा तेन वज्रेण असुराः पराजिताः भविष्यन्ति। ततः इन्द्रः ब्राह्मणवेशं धारयित्वा दधीचेः पुरतः तस्य अस्थीनि अयाचत। दधीचिः उक्तवान्–हे विप्र! मदीयं शरीरं नश्वरम् अस्ति। अनेन यदि केषामपि उपकारः भवेत् तदाहम् आत्मानं धन्यं मन्ये। एवम् उक्त्वा सः योगबलेन स्वप्राणान् अजहात्। इन्द्रः तस्य अस्थिभिः वज्रनिर्माणं कृत्वा वृत्रासुरं हतवान् असुरेषु च विजयं प्राप्तवान्। अद्यापि मानवांगानां शरीरस्य च दानं संसारस्य उपकाराय आवश्यकं वर्तते परं दधीचिसमाः त्यागिनः जनाः लोके अधुना न दृश्यन्ते।

(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) 1×2=2

(i) कस्मिन् वंशे दधीचिनामा नृपः अभवत्?

(ii) दधीचिः योगबलेन कान् अजहात्?

(iii) इन्द्रः कं हतवान्?

(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)

(1) केषां मध्ये युद्धः अभवत्?

(2) विष्णुना देवाः किम् उक्तम्?

(3) दधीचिः इन्द्रं किम् उक्तवान्?

(इ) अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत। 1×1=1

(ई) निर्देशनुसारम् उत्तरत - (केवलं प्रश्नत्रयम्) 1×3=3

(1) "तेन वज्रेण असुरा: पराजिता: भविष्यन्ति'' अत्र क्रियापदं किम्?

(i) तेन (i) भविष्यन्ति

(iii) असुरा: (iv) पराजिता:

(2) "महर्षे: दधीचे:" अनयो: विशेष्यपदं किम्?

(i) महर्षे: (ii) अस्थिभ्य:

(iii) दधीचे: (iv) वज्रं

(3) "एवम् उक्त्वा - स: योगबलेन स्वप्राणान् अजहात्।" अत्र 'स:' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(i) दधीचे: (ii) दधीचये

(iii) दधीचिना (iv) दधीचि:

(4) "राजा" इत्यस्य पर्यायपदम् अनुच्छेदात् चित्वा लिखत?

(i) देवा: (ii) असुरा:

(iii) नृप: (iv) इन्द्र:

**6.** भारतीया संस्कृति: कर्मसिद्धान्तं प्रतिपादयति। जीवा: कर्मवशात् विविधा: योनी: लभन्ते। मनुष्ययोनिं लब्ध्वा यदि कश्चित् जीव: धर्मार्थकामनया सामञ्जस्यं स्थापयित्वा जीवनं निर्वहति तदा स: पुनरागमनचक्रात् विमुक्तो भूत्वा मोक्षं लभते। विश्वस्य सर्वासु अपि संस्कृतिषु भारतीया संस्कृति: प्राचीनतमा वर्तते। समन्वयात्मकस्वभावात् सहिष्णुताप्रकर्षत्वात् च अनन्तान् भीषणतमान् प्रहारान् सोढ्वा अपि एषा जीवति । भारतीया संस्कृति: सर्वेषां देशानां जातीनां च कल्याणं कर्तुं सक्षमाऽस्ति।

(अ) एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) 1×2=2

(i) भारतीया संस्कृति: किं प्रतिपादयति?

(ii) का संस्कृति: प्राचीनतमा वर्तते?

(iii) जीवा: कथं/कस्मात् विविधा: योनी: लभन्ते?

(आ) पूर्णवाक्येन उत्तरत-(केवलं प्रश्नद्वयम्) 2×2=4

(1) कदा मनुष्य: पुनरागमनचक्रात् विमुक्तो भूत्वा मोक्षं लभते?

(2) भारतीया संस्कृतिः किं कर्तुं सक्षमाऽस्ति?

(3) भारतीया संस्कृतिः कान् अपि सोढ्वा जीवति?

(इ) अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।

(ई) **यथानिर्देशम् उत्तरत– ( केवलं प्रश्नत्रयम् )** 1×1=1

(1) 'लभन्ते' इति क्रियायाः कर्तृपदं किम्? 1×3=3

(क) योनिः (ख) विविधाः

(ग) कर्मवशात् (घ) जीवाः

(2) "समर्था" इति पदस्य अत्र किं पर्यायपदम्?

(क) सर्वासु (ख) सहिष्णुता

(ग) सक्षमा (घ) स्वभावा

(3) "परतन्त्रः" इति पदस्य अत्र किं विलोमपदम्?

(क) मोक्षः (ख) जीवः

(ग) विमुक्तः (घ) संस्कृतिः

(4) 'देशानाम्' अस्य पदस्य विशेषणं किम्?

(क) भारतीया (ख) सर्वेषाम्

(ग) संस्कृतिः (घ) जातीनाम्

**7.** सायंकाले अस्ताचलं प्रति गच्छन् भगवान् सूर्यः चिन्तितः अभवत्–"मयि गते सम्पूर्णः संसारः अन्धकारे निमग्नः भविष्यति। लोकानां व्यवहारः कथं चलिष्यति? मां विना सर्वे जीवाः दुःखम् अनुभविष्यन्ति।" तस्य एतं भावं विज्ञाय एकः लघुदीपः निवेदितवान् –"भगवन्! अलं चिन्तया। यद्यपि मम प्रकाशः क्षीणः तथापि जनानां सेवायाम् अहं यथाशक्ति स्वजीवनं समर्पयिष्यामि, कार्याणि च साधयिष्यामि।" प्रसङ्गोयं शिक्षयति यदस्माभिरपि स्वकर्तव्यस्य निर्वाहो यथाशक्ति कर्तव्यः । कदापि एतन्न चिन्तनीयं यदहं लघुः एषः दीर्घः। मम कार्यं सुकरं तस्य कार्यं दुष्करमिति। यस्मिन् समाजे सर्वे जनाः प्रसन्नमनसा आत्मकर्तव्यं पालयन्ति सः समाजः सदैव उन्नतिमधिगच्छति।

(अ) एकपदेन उत्तरत- (केवल प्रश्नद्वयम्) 1×2=2

(i) सायंकाले अस्ताचलं क: गच्छति?

(ii) सूर्ये गते संसार: कस्मिन् निमग्न: भविष्यति?

(iii) जीवा: किम् अनुभविष्यन्ति?

(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 2×2=4

(1) अस्ताचलं प्रति गच्छन् सूर्य: किं चिन्तयति?

(2) सूर्यस्य भावं विज्ञाय लघुदीप: किं निवेदितवान्?

(3) कीदृश: समाज: उन्नतिम् अधिगच्छति?

(इ) अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत। 1×1=1

(ई) यथानिर्देशम् उत्तरत-(केवलं प्रश्नत्रयम्) 1×3=3

(1) 'दीर्घ:' इत्यस्य विलोमपदम् अनुच्छेदे किं प्रयुक्तम्?

(i) क्षीण: (ii) लघु:

(iii) कार्याणि (iv) अन्धकारे

(2) 'लोकम्' इत्यस्य पर्यायपदम् अनुच्छेदे किं प्रयुक्तम्?

(i) प्रकाश: (ii) संसार:

(iii) समाजे (iv) जनानां

(3) 'सर्वे जीवा:' अनयो: विशेष्यपदं किम्?

(i) सर्वे (ii) दु:खम्

(iii) विना (iv) जीवा:

(4) "स: समाज: सदैव उन्नतिम् अधिगच्छति" अत्र क्रियापदं किम्?

(i) अधिगच्छति (ii) समाज:

(iii) उन्नतिम् (iv) सदैव

8. संसारे सर्वाधिकभाषासु अनूदित: ग्रन्थोऽस्ति श्रीमद्भगवद्गीता। गीताया: एक: प्रसिद्ध: श्लोकांशोऽस्ति-"यद्यदाचरति श्रेष्ठ: तत्तदेवेतरो जन:"। अस्या: पंक्ते: अर्थ: अस्ति यथा श्रेष्ठा: ज्येष्ठा: समाचरन्ति तथैव कनिष्ठा: अपि व्यवहरन्ति। यदि शिक्षका: विद्वांस:, विनम्रा: संयमादिगुणोपेता: च भवन्ति तेषां छात्रा: तान् आदर्शान् मत्वा तेषां गुणानाम् अनुसरणं कर्तुं प्रयतन्ते। मातापितरौ यथा सन्ततिं पालयत: शिक्षयत: च, स्वजीवने अपि

यथा व्यवहरत: तथैव सन्ततय: अपि गुणान् अङ्गीकुर्वन्ति । अत एव श्रेष्ठानां जनानां, वरिष्ठानां नागरिकाणां, नेतॄणाम्, अभिनेतॄणां क्रीडकानां च इदं प्रमुखं कर्तव्यं भवेत् यत् ते स्वचरित्रस्य निर्मलतां रक्षेयु: परोपकारादिकर्मसु च निरता: भवेयु:। यत: सामान्यजना: तान् आदर्शान् मन्यन्ते।

(अ) एकपदेन उत्तरत-(केवलं प्रश्नद्वयम्) 1×2=2

(i) सर्वाधिकभाषासु अनूदित: ग्रन्थ: क:?

(ii) यथा श्रेष्ठा: समाचरन्ति तथा के व्यवहरन्ति?

(iii) मातापित्रो: गुणान् के अंगीकुर्वन्ति?

(आ) पूर्णवाक्येन उत्तरत-(केवलं प्रश्नद्वयम्) 2×2=4

(1) 'यद्यदाचरति श्रेष्ठ:' अस्या: पंक्ते: अर्थ: क:?

(2) श्रेष्ठानां, वरिष्ठानां क्रीडकानां च कर्तव्यं किं भवेत्?

(3) छात्रा: कान् आदर्शान् मत्वा अनुसरणं कुर्वन्ति?

(इ) अस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत। 1×1=1

(ई) यथानिर्देशम् उत्तरत-(केवलं प्रश्नत्रयम्) 1×3=3

(1) 'अनूदित: ग्रन्थ:' अनयो: विशेषणपदं किम्?

(i) ग्रन्थ: (i) अनूदित:

(iii) संसारे (iv) गीताया:

(2) 'यथा श्रेष्ठा: ज्येष्ठा: समाचरन्ति' अत्र क्रियापदं किम्?

(i) श्रेष्ठा: (ii) ज्येष्ठा:

(iii) यथा (iv) समाचरन्ति

(3) 'पुस्तकम्' इत्यस्य पर्यायपदम् अनुच्छेदात् चित्वा लिखत।

(i) पंक्ते: (ii) ग्रन्थ:

(ii) शिक्षका: (iv) विद्वांस:

(4) 'सामान्यजना: तान् आदर्शान् मन्यन्ते' अत्र कर्तृपदं किम्?

(i) सामान्यजना: (ii) तान्

(iii) आदर्शान् (iv) मन्यन्ते

9. एकत्वभावनया यत्कार्यं क्रियते तद् 'एकता' इति कथ्यते। एकतया मानव: बलवान् भवति। एकतया समाज: राष्ट्रं जगत् च उन्नतिपथम् आरोहति । अद्यत्वे अस्या: अतीवावश्यकता वर्तते। यस्मिन् देशे एकताया: अभावो भवति स: देश: स्वकीयां स्वतन्त्रतां रक्षितुं नैव शक्नोति। अस्माकमपि देश: एकताया: अभावात् चिरं परतन्त्र: आसीत्, परं यदा भारते एकत्वभावना समुत्पन्ना तदा भारतं स्वातन्त्र्यम् अलभत । एकताया: प्रभाव: जडवस्तुषु अपि दृश्यते। जलबिन्दव: सम्मिल्य नदीरूपं धारयन्ति। क्षुद्रतन्तव: अपि मिलित्वा यदा रज्जुरूपं धारयन्ति तदा ते बलशालिनं गजम् अपि नियन्त्रयितुं समर्था: भवन्ति । यदा अस्माकं विचारा:, मनांसि, गमनं, भाषणं संकल्पश्च एकत्वभावनया परिपूर्णा: भवन्ति, तदा न किमपि असाध्यं भवति। संसारस्य प्राचीनतमे ग्रन्थे ऋग्वेदे अयमेव सन्देश: "संगच्छध्वं संवदध्वम्" इत्यादिमन्त्रेण मानवकल्याणाय प्रदत्त: ।

(अ) एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) 1×2=2

(i) एकतया क: बलवान् भवति?

(ii) क्षुद्रतन्तव: मिलित्वा किं रूपं धारयन्ति?

(iii) कया समाज: राष्ट्रं च उन्नतिपथम् आरोहति?

(आ) पूर्णवाक्येन उत्तरत-(केवलं प्रश्नद्वयम्) 2×2=4

(1) भारतं कदा स्वातन्त्र्यम् अलभत?

(2) कदा किमपि असाध्यं न भवति?

(3) संसारस्य प्राचीनतमे ग्रन्थे क: सन्देश: प्रदत्त:?

(इ) अस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत। 1×1=1

(ई) यथानिर्देशम् उत्तरत-(केवलं प्रश्नत्रयम्) 1×3=3

(1) 'दुर्बल:' इत्यस्य विपर्ययपदम् अनुच्छेदात् चित्वा लिखत।

(i) अभावात् (ii) बलवान्

(iii) असाध्यं (iv) गमनं

(2) 'प्राचीनतमे ग्रन्थे' अनयो: विशेषणपदं किम्?

(i) ग्रन्थे (ii) ऋग्वेदे

(iii) प्राचीनतमे (iv) संसारस्य

(3) 'ते बलशालिनं गजम् अपि नियन्त्रयितुं समर्था: भवन्ति'

अत्र 'ते' इति पदं केभ्य: प्रयुक्तम्?

(i) क्षुद्रतन्तव: (ii) गजम्

(iii) बलशालिनं (iv) समर्था:

(4) 'तदा भारतं स्वातन्त्र्यम् अलभत' अत्र क्रियापदं किम्?

(i) भारतं (ii) स्वातन्त्र्यम्

(iii) तदा (iv) अलभत

**10.** वर्तमानयुगं यन्त्राणां युगमस्ति। वैज्ञानिका: सञ्चार-साधनेष्वपि प्रतिदिनं नवीनतमान् आविष्कारान् कुर्वन्ति येन सन्देशप्रेषणे अधिकतमा सुविधा स्यात्। जङ्गमवाणी (मोबाइल फोन) तादृशम् एव लोकप्रियं यन्त्रम्। बाला:, वृद्धा:, पुरुषा:, महिला:, नागरिका:, ग्रामीणा: वा सर्वेषां पार्श्वे एतत् यन्त्रं प्राप्यते। यानानि आरूढ़ा:, कार्यालयेषु कार्यं कुर्वन्त:, मार्गेषु चलन्त:, सभागारेषु प्रवचनं शृण्वन्त: जना: अस्या: ध्वनिं श्रुत्वा वार्तामग्ना: भवन्ति। शिशु: जङ्गमवाण्या एव क्रीडति, जागर्ति स्वपिति च। अविवेकपूर्ण: अस्या: प्रयोग: कार्येषु व्यवधानं करोति। मार्गेषु दुर्घटना: भवन्ति। सत्यमस्ति यत् आविष्कार: कदापि हानिकर: न परन्तु तस्य दुष्प्रयोगेण जीवनस्य शान्ति: नश्यति। स्वास्थ्यस्य समयस्य च हानि: भवति। वस्तुत: वयं यन्त्रस्य अधीना: न स्याम अपितु यन्त्रम् अस्माकम् अधीनं स्यात्। ते एव बुद्धिमन्त: ये विज्ञानस्य सदुपयोगं कुर्वन्ति।

(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) $1\times2=2$

(i) वर्तमानयुगं केषां युगम् अस्ति?

(ii) शिशु: कया क्रीडति?

(iii) लोकप्रियस्य यन्त्रस्य नाम किम्?

(आ) पूर्णवाक्येन उत्तरत-(केवलं प्रश्नद्वयम्) $2\times2=4$

(1) के खलु बुद्धिमन्त:?

(2) आविष्कारस्य दुष्प्रयोगेण किं किं भवति?

(3) केषां पार्श्वे एतत् यन्त्रं प्राप्यते?

(इ) अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत। 1×1=1

(ई) यथानिर्देशम् उत्तरत-(केवलं प्रश्नत्रयम्) 1×3=3

(1) 'नवीनतमान् आविष्कारान्' अनयोः विशेषणपदं किम्?

(i) सन्देशप्रेषणे (ii) सुविधा

(iii) आविष्कारान् (iv) नवीनतमान्

(2) 'न्यूनतमा' इत्यस्य विलोमपदम् अनुच्छेदात् चित्वा लिखत।

(i) अधिकतमा (ii) नवीनतमान्

(iii) हानिकारः (iv) आविष्कारः

(3) 'शिशुः जङ्गमवाण्या एव क्रीडति' अत्र कर्तृपदं किम्?

(i) जङ्गमवाण्या (ii) शिशुः

(iii) क्रीडति (iv) एव

(4) 'तस्य दुष्प्रयोगेण जीवनस्य शान्तिः नश्यति' अत्र क्रियापदं किम्?

(i) तस्य (ii) दुष्प्रयोगेण

(iii) नश्यति (iv) जीवनस्य

## उत्तराणि

1. (अ) एकपदेन उत्तरत

(1) हस्तौ (2) उदरेण

(3) अन्नस्य

(आ) पूर्णवाक्येन उत्तरत

   (क) आचार्यम्

   (ख) आचार्येण

   (ग) आचार्याय

   (घ) आचार्यात्

4. **........... न प्रमदितव्यम्।**

   (क) देवपितृकार्यस्य

   (ख) देवपितृकार्याभ्याम्

   (ग) देवपितृकार्यात्

(घ) देवपितृकार्येण

5. ........... न प्रमदितव्यम्।

(क) धर्मात्

(ख) धर्मेण

(ग) धर्मस्य

(घ) धर्माय

## तृतीयः पाठः

6. .................... सह सीता वनं गन्तुम् इच्छति।

(क) रामेण

(ख) रामस्य

(ग) रामाय

(घ) रामात्

7. अतः परं मातुः ................. श्रोतुं न इच्छामि।

(क) परिवादं

(ख) परिवादाय

(ग) परिवादः

(घ) परिवादेन

8. हा धिक्! ................ अविज्ञाय उपालभसे।

(क) अस्मदं

(ख) अस्मान्

(ग) अहम्

(घ) वयम्

9. अरिः .................... प्रहरति।

(क) शरीर

(ख) शरीरे

(ग) शरीरस्य

(घ) शरीराणाम्

10. तस्याः कस्मिन् ............... स्पृहा, येन अकार्यं करिष्यति।

(क) फले

(ख) फलाय

(ग) फलात्

(घ) फलस्य

11. त्रिषु पातकेषु किं...............रुचिरम्।

(क) रोषणेन

(ख) रोषणात्

(ग) रोषणाय

(घ) रोषणस्य

12. यत्कृते महति ............... राज्ये मे न मनोरथः।

(क) क्लेशम्

(ख) क्लेश

(ग) क्लेशे

(घ) क्लेशेण

## चतुर्थः पाठः

13. दिलीपस्य ............ सदृशः आगमः आसीत्।

(क) प्रज्ञया

(ख) प्रज्ञाम्

(ग) प्रज्ञाया:

(घ) प्रज्ञायै

14. वैवस्वतः मनुः ..............आद्यः आसीत्।

(क) महीक्षित्

(ख) महीक्षिताम्

(ग) महीक्षित:

(घ) महीक्षितेषु

15. तद्गुणैः...............आगत्य चापलाय प्रचोदितः।

(क) कर्णम्

(ख) कर्णे

(ग) कर्णस्य

(घ) कर्णेन

16. प्रजानामेव भूत्यर्थं स ............. बलिमग्रहीत्।

(क) तुभ्यम्

(ख) ताभ्य:

(ग) तेभ्य:

(घ) तेभि:

17. ............... तदन्वये दिलीपःप्रसूतः।

(क) शुद्धिमति

(ख) शुद्धिमत्

(ग) शुद्धिमते

(घ) शुद्धिमताम्

## पञ्चमः पाठः

18. ..........समीपम् आगत्य दौवारिकः उवाच।

(क) दीपेषु

(ख) दीपम्

(ग) दीपस्य

(घ) दीपात्

19. दौवारिक! इत आयाहि किमपि .......... कथयिष्यामि।

(क) कर्णात्

(ख) कर्णस्य

(ग) कर्णे

(घ) कर्णम्

20. महाराजशिववीरस्याज्ञां वयं...........वहामः।

(क) शिरसा

(ख) शिरसि

(ग) शिरस्

(घ) शिरसे

21. अहं...........परिष्कृतपारदभस्म दद्याम्।

(क) तुभ्यम्

(ख) त्वाम्

(ग) त्वयि

(घ) त्वया

22. ते केचन अन्ये नीचाः भवन्ति ये..............आत्मानम् अन्धतमसि पातयन्ति।

(क) उत्कोचलोभेन

(ख) उत्कोचलोभस्य

(ग) उत्कोचलोभात्

(घ) उत्कोचलोभे

23. द्वादशवर्षेण ............... अनुगम्यमानः संन्यासी दृष्टः।

(क) भिक्षावटुवे

(ख) भिक्षावटुना

(ग) भिक्षावटुभिः

(घ) भिक्षावटुम्

षष्ठः पाठः

24. ..............अन्ते च वारि अमृतं भवति।

(क) भोजनस्य

(ख) भोजनम्

(ग) भोजने

(घ) भोजनेन

25. खलानां ............... महान् यत्नः भवति।

(क) दोषेण

(ख) दोषेषु

(ग) दोषात्

(घ) दोषस्य

26. शठः ............ अपि शिक्ष्यमाणः सज्जनतां न उपैति।

(क) सहस्रैः

(ख) सहस्रेभ्यः

(ग) सहस्रात्

(घ) सहस्रस्य

## सप्तमः पाठः

27. **राजा राज्यं ............ दत्त्वा तदुत्सङ्गे भोजं मुमोच।**

(क) मुञ्जम्

(ख) मुञ्जाय

(ग) मुञ्जस्य

(घ) मुञ्जेन

28. **कश्चन कापालिकः ............... समागतः।**

(क) सभायाम्

(ख) सभाम्

(ग) सभया

(घ) सभाभ्यः

29. **...............स जीवितो भविष्यति।**

(क) शिवप्रसादेन

(ख) शिवप्रसादात्

(ग) शिवप्रसादस्य

(घ) शिवप्रसादम्

30. **मुञ्जः ...............सह वनम् अगच्छत्।**

(क) राज्ञीभिः

(ख) रानीभिः

(ग) राज्ञीनाम्

(घ) राज्ञीम्

31. **न ................ अपि समं गता वसुमती नूनं त्वया यास्यति।**

(क) एकेन

(ख) एकस्य

(ग) एकात्

(घ) एकम्

**नवमः पाठः**

32. ..................... शिक्षणं प्रदास्यामि।

(क) शिशून्

(ख) शिशूणाम्

(ग) शिशुभ्यः

(घ) शिशुना

33. आकारये अहं ................ तुम्बुरुम्।

(क) कुलगुरुः

(ख) कुलगुरुणा

(ग) कुलगुरुम्

(घ) कुलगुरवे

34. आचार्येति पदं प्राप्य शिष्येभ्यः .............. शिक्षयिष्यामि।

(क) जीवनकलाम्

(ख) जीवनकला

(ग) जीवनकलायाः

(घ) जीवनकलायै

35. अहं शिशुभ्यः .................... प्रदास्यामि।

(क) शिक्षणम्

(ख) शिक्षणस्य

(ग) शिक्षणात्

(घ) शिक्षणाय

36. दुर्लभो जनः ईदृशः यः गृहस्थप्रयोगशालायां ................ स्वतन्त्रतां दद्यात्।

(क) स्वपत्नीं

(ख) स्वपत्न्याः

(ग) स्वपत्न्यै

(घ) स्वपत्न्याम्

37. अपि श्रुताः ............. मम सखी विचाराः।

(क) भवद्भिः

(ख) भवान्

(ग) भवन्तः

(घ) भवन्तौ

38. आगम्यतां---- पितृभ्यां च समाचारं श्रावयिष्यावः।

(क) गुरुभ्यः

(ख) गुरुन्

(ग) गुरुणा

(घ) गुरुषु

## एकादशः पाठः

39. कोऽन्योऽस्ति सदृशो..............।

(क) माम्

(ख) मम

(ग) मया

(घ) अहम्

40. दैवी सम्पद् .................. भवति।

(क) विमोक्षाय

(ख) विमोक्षस्य

(ग) विमोक्षात्

(घ) विमोक्षम्

## उत्तरसंकेत:

### प्रथमः पाठः

1. आचार्यः ............... अनुशास्ति।

(ख) अन्तेवासिनम्

2. ........... न प्रमदितव्यम्।

(क) स्वाध्यायात्

3. .................. प्रियधनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः।

(ग) आचार्याय

4. ........... न प्रमदितव्यम्।

(ख) देवपितृकार्याभ्याम्

5. ........... न प्रमदितव्यम्

(क) धर्मात्

### तृतीयः पाठः

6. ................... सह सीता वनं गन्तुम् इच्छति।

(क) रामेण

7. अतः परं मातुः ......... श्रोतुं न इच्छामि।

(क) परिवादं

8. हा धिक्!------अविज्ञाय उपालभसे।

(ख) अस्मान्

9. अरिः ........... प्रहरति।

(ख) शरीरे

10. तस्याः कस्मिन् ............. स्पृहा, येन अकार्यं करिष्यति।

(क) फले

11. त्रिषु पातकेषु किं ............... रुचिरम्।

(ग) रोषणाय

12. यत्कृते महति ............... राज्ये मे न मनोरथः।

(ग) क्लेशे

## चतुर्थः पाठः

13. दिलीपस्य .................. सदृशः आगमः आसीत्।

(क) प्रज्ञया

14. वैवस्वतः मनुः..............आद्यः आसीत्।

(ख) महीक्षिताम्

15. तद्गुणैः...............आगत्य चापलाय प्रचोदितः।

(क) कर्णम्

16. प्रजानामेव भूत्यर्थं स ...........बलिमग्रहीत्।

(ख) ताभ्यः

17. ..................... तदन्वये दिलीपःप्रसूतः।

(क) शुद्धिमति

## पञ्चमः पाठः

18. .................समीपम् आगत्य दौवारिकः उवाच।

(ग) दीपस्य

19. दौवारिक! इत आयाहि किमपि .......... कथयिष्यामि।

(ग) कर्णे

20. महाराजशिववीरस्याज्ञां वयं...........वहामः।

(क) शिरसा

21. अहं...........परिष्कृतपारदभस्म दद्याम्।

(क) तुभ्यम्

22. ते केचन अन्ये नीचाः भवन्ति ये ............ आत्मानम् अन्धतमसि पातयन्ति।

(क) उत्कोचलोभेन

23. द्वादशवर्षेण .............. अनुगम्यमानः संन्यासी दृष्टः।

(ख) भिक्षावटुना

षष्ठः पाठः

24. .............अन्ते च वारि अमृतं भवति।

(क) भोजनस्य

25. खलानां .............. महान् यत्नः भवति।

(ख) दोषेषु

26. शठः ................. अपि शिक्ष्यमाणः सज्जनतां न उपैति।

(क) सहस्रैः

सप्तमः पाठः

27. राजा राज्यं ............... दत्त्वा तदुत्सङ्गे भोजं मुमोच।

(ख) मुञ्जाय

28. कश्चन कापालिकः ............... समागतः।

(क) सभायाम्

29. ...............स जीवितो भविष्यति।

(क) शिवप्रसादेन

30. मुञ्जः...............सह वनम् अगच्छत्।

(क) राज्ञीभिः

31. न ............... अपि समं गता वसुमती नूनं त्वया यास्यति।

(क) एकेन

नवमः पाठः

32. .......... शिक्षणं प्रदास्यामि।

(ग) शिशुभ्यः

33. आकारये अहं ...................... तुम्बुरुम् ।

(ग) कुलगुरुम्

34. आचार्येति पदं प्राप्य शिष्येभ्यः ............... शिक्षयिष्यामि।

(क) जीवनकलाम्

35. अहं शिशुभ्यः ...................... प्रदास्यामि।

(क) शिक्षणम्

36. दुर्लभो जनः ईदृशः यः गृहस्थप्रयोगशालायां..................स्वतन्त्रतां दद्यात्।

(ग) स्वपत्न्यै

37. अपि श्रुताः .................... मम सखी विचाराः।

(क) भवद्भिः

38. आगम्यतां ................ पितृभ्यां च समाचारं श्रावयिष्यावः।

(क) गुरुभ्यः

## एकादशः पाठः

39. कोऽन्योऽस्ति सदृशो ...............।

(ग) मया

40. दैवी सम्पद् ................भवति।

(क) विमोक्षाय

# 'घ' (I) भागः पठितावबोधनम्

## पाठ–1 अनुशासनम्

**(क)** वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति। सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः। आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्। कुशलान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाध्याय-प्रवचनाभ्यां न प्रमदितव्यम्। देवपितृकार्याभ्यां न प्रमदितव्यम्। मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव।

**1. एकपदेन उत्तरत–**

(क) कम् अनूच्य आचार्यः अन्तेवासिनम् अनुशास्ति?

(ख) कं मा व्यवच्छेत्सीः?

**2. पूर्णवाक्येन उत्तरत–**

(क) केभ्यः न प्रमदितव्यम्?

(ख) आचार्याय किम् आहरणीयम्?

**3. भाषिककार्यम्–**

(क) ''प्रियं धनम्'' अनयोः पदयोः विशेषणपदं किम्?

(ख) ''आचार्यः'' इत्यस्य पदस्य क्रियापदं किम्?

**(ख)** यान्यनवद्यानि कर्माणि, तानि सेवितव्यानि, नो इतराणि। यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि, नो इतराणि। अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात्। ये तत्र ब्राह्मणाः सम्मर्शिनः, युक्ता, आयुक्ताः, अलूक्षाः, धर्मकामाः स्युः, यथा ते तत्र वर्तेरन् तथा तत्र वर्तेथाः। एष आदेशः। एष उपदेशः। एषा वेदोपनिषत्। एतदनुशासनम्। एवमुपासितव्यम्। एवं चैतदुपास्यम्।

**1. एकपदेन उत्तरत–**

(क) कानि कर्माणि सेवितव्यानि?

**2. पूर्णवाक्येन उत्तरत–**

(क) ब्राह्मणा: कीदृशा: स्यु:?

(ख) कर्मविचिकित्सायां वा वृत्तविचिकित्सायां केन प्रकारेण वर्तितव्यम्?

**3. भाषिककार्यम्-**

(क) ''ब्राह्मणा: सम्मर्शिन:'' अनयो: पदयो: विशेष्यपदं किम् ?

(ख) ''अपराणि'' इत्यस्य पदस्य पर्यायपदं किम् ?

**(ग) 'अ' वाक्यांशस्य मेलनं 'आ' वाक्यांशेन सह कुरुत-**

| 'अ' वाक्यांश: | 'आ' वाक्यांश: |
|---|---|
| 1. वेदमनूच्याचार्य: | (क) प्रजातन्तुं मा व्यवच्छेत्सी:। |
| 2. आचार्याय प्रियं धनमाहृत्य | (ख) अन्तेवासिनमनुशास्ति। |
| 3. देवपितृकार्याभ्याम् | (ग) तानि त्वयोपास्यानि। |
| 4. यान्यस्माकं सुचरितानि | (घ) न प्रमदितव्यम् |

**(घ) अधोलिखितवाक्येषु रेखांकितानां पदानां प्रसंगानुसारं शुद्धम् अर्थं लिखत-**

1. वेदमनूच्याचार्योऽन्तेवासिनमनुशस्ति।
2. सत्यं वद।
3. तानि सेवितव्यानि, नो इतराणि।
4. ये तत्र ब्राहमणा: सम्मर्शिन:।

## उत्तराणि

**(क) 1. एकपदेन उत्तरत–**

(क) वेदम्

(ख) प्रजातन्तुम्

**2. पूर्णवाक्येन उत्तरत–**

(क) सत्यात्, धर्मात्, कुशलात्, भूत्यै, स्वाध्याय-प्रवचनाभ्यां देवपितृकार्याभ्याम् च न प्रमदितव्यम्।

(ख) आचार्याय प्रियं धनम् आहरणीयम्।

**3. भाषिकं कार्यम्–**

(क) प्रियम्

(ख) अनुशास्ति

**(ख) (1) एकपदेन उत्तरत–**

(क) अनवद्यानि

**(2) पूर्णवाक्येन उत्तरत–**

(क) ब्राह्मणाः सम्मर्शिनः, युक्ता आयुक्ताः, अलूक्षा धर्मकामाः स्युः।

(ख) कर्मविचिकित्सायां वा वृत्तविचिकित्सायां, ये तत्र ब्राह्मणाः सम्मर्शिनः, युक्ता आयुक्ताः, अलूक्षा धर्मकामा : स्युः, यथा ते तत्र वर्तेरन् तथा तत्र वर्तेथाः।

**(3) भाषिकं कार्यम्–**

(क) ब्राह्मणाः

(ख) इतराणि

**(ग) वाक्यांशमेलनम्**

1. (ख) 2. (क) 3. (घ) 4. (ग)

**(घ) पदानां शुदधार्थं लेखनम्-**

1. शिष्यम् 2. कथय

3. अन्यानि 4. विचारशीलाः

# पाठ–3 मातुराज्ञा गरीयसी





**( क ) ( प्रविश्य )**

काञ्चुकीयः – परित्रायतां परित्रायतां कुमारः।

रामः – आर्य! कः परित्रातव्यः।

काञ्चुकीयः – महाराज!

रामः – महाराजः इति। आर्य! ननु वक्तव्यम्। एकशरीर-संक्षिप्ता पृथिवी रक्षितव्येति। अथ कुत उत्पन्नोऽयं दोषः?

काञ्चुकीयः – स्वजनात्।

रामः – स्वजनादिति। हन्तः नास्ति प्रतीकारः।

**शरीरेऽरिः प्रहरति हृदये स्वजनस्तथा।**

**कस्य स्वजनशब्दो मे लज्जामुत्पादयिष्यति ॥1॥**

**1. एकपदेन उत्तरत–**

(क) अरिः कुत्र प्रहरति?

(ख) हृदये कः प्रहरति?

**2. पूर्णवाक्येन उत्तरत–**

(क) काञ्चुकीयः किं कथयति?

(ख) स्वजनशब्दः मे काम् उत्पादयिष्यति?

**3. भाषिककार्यम्–**

(क) ''एकशरीरसंक्षिप्ता पृथिवीः'' अनयोः पदयोः विशेष्यपदं किम्?

(ख) ''मनसि'' इत्यस्य पदस्य पर्यायपदं किम्?

**( ख )** काञ्चुकीयः – तत्र भवत्याः कैकेय्याः।

रामः – किमम्बायाः, तेन हि उदर्केण गुणेनात्र भवितव्यम्।

काञ्चुकीयः – कथमिव?

राम: – श्रूयताम्,

यस्याः शक्रसमो भर्ता मया पुत्रवती च या।
फले कस्मिन् स्पृहा तस्या येनाकार्यं करिष्यति ।।2।।

काञ्चुकीय: – कुमार! अलमुपहतासु स्त्रीबुद्धिम् स्वमार्जवमुपनिक्षेप्तुम्। तस्या एव खलु वचनात् भवदभिषेको निवृत्तः।

राम: – आर्य! गुणाः खल्वत्र।

काञ्चुकीय: – कथमिव?

राम: – श्रूयताम्

**वनगमननिवृत्तिः पार्थिवस्यैव ताव-**
**न्मम पितृपरवत्ता बालभावः स एव।**
**नवनृपतिविमर्शे नास्ति शंका प्रजाना-**
**मथ च न परिभोगैर्वञ्चिता भ्रातरो मे ।।3।।**

**1. एकपदेन उत्तरत–**

(क) कस्याः शक्रसमो भर्ता?

(ख) कैकेयी केन पुत्रवती?

(ग) प्रजानां शंका कुत्र नास्ति?

**2. पूर्णवाक्येन उत्तरत–**

(क) केन गुणेनात्र भवितव्यम्?

(ख) कुत्र स्वमार्जवं निक्षेप्तुम् अलम्?

**3. भाषिककार्यम्–**

(क) ''मम'' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(ख) ''उपहतासु स्त्रीबुद्धिषु'' अनयोः पदयोः विशेषणपदं किम्?

(ग) काञ्चुकीय: - अथ च तयाऽनाहूतोपसृतया भरतोऽभिषिच्यतां राज्य इत्युक्तम् अत्राप्यलोभ:?

राम: - आर्य:! भवान् खल्वस्मत्पक्षपातादेव नार्थमवेक्षते। कुत:,

शुल्के विपणितं राज्यं पुत्रार्थे यदि याच्यते।
तस्या लोभोऽत्र नास्माकं भ्रातृराज्यापहारिणाम् ।।4।।

काञ्चुकीय: - अथ ............

राम: - अत: परं न मातु: परिवादं श्रोतुमिच्छामि। महाराजस्य वृत्तान्तस्तावदभिधीयताम्।

काञ्चुकीय: - ततस्तदानीम्,

**शोकादवचनाद् राज्ञा हस्तेनैव विसर्जित:।**
**किमप्यभिमतं मन्ये मोहं च नृपतिर्गत: ।।5।**

**1. एकपदेन उत्तरत–**

(क) शुल्के विपणितं राज्यं कस्मै याच्यते?

(ख) क: मोहं गत:?

**2. पूर्णवाक्येन उत्तरत–**

(क) मातु: परिवादं क: न श्रोतुम् इच्छति?

(ख) कीदृशं राज्यं कैकय्या पुत्राय याचितम्?

**3. भाषिककार्यम्–**

(क) ''भवान्'' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(ख) ''न अर्थम् अवेक्षते'' इत्यत्र क्रियापदं किम्?

**( नेपथ्ये )**

(घ) कथं कथं मोहमुपगत इति।

यदि न सहसे राज्ञो मोहं धनु: स्पृश मा दयाम्।।

राम: – (आकर्ण्य पुरतो विलोक्य)

**अक्षोभ्यः क्षोभितः केन लक्ष्मणो धैर्यसागरः।**

**येन रुष्टेन पश्यामि शताकीर्णमिवाग्रतः ॥6॥**

(ततः प्रविशति धनुर्बाणपाणिर्लक्ष्मणः)

लक्ष्मणः – (सक्रोधम्) कथं कथं मोहमुपगत इति।

यदि न सहसे राज्ञो मोहं धनुः स्पृश मा दयां

स्वजननिभृतः सर्वोप्येवं मृदुः परिभूयते।

**अथ न रुचितं मुञ्च त्वं मामहं कृतनिश्चयो**

**युवतिरहितं लोकं कर्तुं यतश्छलिता वयम् ॥7॥**

**1. एकपदेन उत्तरत–**

(क) ततः धनुर्बाणपाणिः कः प्रविशति?

(ख) कः लोकं युवतिरहितं कर्तुं कथयति?

**2. पूर्णवाक्येन उत्तरत–**

(क) लक्ष्मणः कं निश्चयं करोति?

**3. भाषिककार्यम्–**

(क) ''लक्ष्मणो धैर्यसागरः'' इत्यनयोः पदयोः विशेष्यपदं किम्?

(ख) ''क्षोभ्यः'' पदस्य विपर्ययपदं किम्?

(ङ)

सीता – आर्यपुत्र! रोदितव्ये काले सौमित्रिणा धनुर्गृहीतम्। अपूर्वः खल्वस्यायासः।

रामः – सुमित्रामातः! किमिदम्?

लक्ष्मणः – कथं कथं किमिदं नाम।

**क्रमप्राप्ते हृते राज्ये भुवि शोच्यासने नृपे।**

**इदानीमपि सन्देहः किं क्षमा निर्मनस्विता ॥8॥**

रामः - सुमित्रामातः! अस्मद्राज्यभ्रंशो भवत उद्योगं जनयति। आः अपण्डितः खलु भवान्।

**भरतो वा भवेद् राजा वयं वा ननु तत् समम्।**
**यदि तेऽस्ति धनुश्श्लाघा स राजा परिपाल्यताम् ॥9॥**

लक्ष्मणः - न शक्नोमि रोषं धारयितुम्। भवतु भवतु। गच्छामस्तावत्। (प्रस्थितः)

**रामः - त्रैलोक्यं दग्धुकामेव ललाटपुटसंस्थिता।**
**भृकुटिर्लक्ष्मणस्यैषा नियतीव व्यवस्थिता ॥10॥**

**1. एकपदेन उत्तरत–**

(क) रोदितव्ये काले केन धनुर्गृहीतम्?

(ख) रामः ''अपण्डितः'' कं कथयति?

**2. पूर्णवाक्येन उत्तरत–**

(क) लक्ष्मणस्य धनुश्श्लाघा कस्मिन् कार्ये अस्ति?

(ख) त्रैलोक्यं दग्धुकामेव का संस्थिता?

**3. भाषिककार्यम्–**

(क) ''गच्छामस्तावत्'' अत्र क्रियापदं किम्?

(ख) ''ललाटपुटसंस्थिता भृकुटिः'' अनयोः पदयोः विशेष्यपदं किम्?

**(च)** सुमित्रामातः! इतस्तावत्।

लक्ष्मणः - आर्य! अयमस्मि ॥

रामः - भवतः स्थैर्यमुत्पादयता मयैवमभिहितम्। उच्यतामिदानीम्।

**ताते धनुर्नमयि सत्यमवेक्ष्यमाणे**
**मुञ्चानि मातरि शरं स्वधनं हरन्त्याम्।**
**दोषेषु बाह्यमनुजं भरतं हनानि**
**किं रोषणाय रुचिरं त्रिषु पातकेषु ॥11॥**

लक्ष्मणः – (सबाष्पम्) हा धिक्! अस्मानविज्ञायोपालभसे।

**यत्कृते महति क्लेशे राज्ये मे न मनोरथः।**
**वर्षाणि किल वस्तव्यं चतुर्दश वने त्वया ॥12॥**

रामः – अत्र मोहमुपगतस्तत्रभवान्। हन्त! निवेदितमप्रभुत्वम्। मैथिलि!

**मङ्गलार्थेऽनया दत्तान् वल्कलाँस्तावदानय।**
**करोम्यन्यैर्नृपैर्धर्मं नैवाप्तं नोपपादितम् ॥13॥**

**1. एकपदेन उत्तरत–**

(क) लक्ष्मणस्य मनोरथः कुत्र नास्ति?

(ख) रामेण कति वर्षाणि वने वस्तव्यम्?

**2. पूर्णवाक्येन उत्तरत–**

(क) रामेण कानि त्रीणि पातकानि कथितानि?

**3. भाषिककार्यम्–**

(क) ''पुण्येषु'' इत्यस्य पदस्य विलोमपदं किम्?

(ख) ''दत्तान् वल्कलान्'' अनयोः पदयोः विशेषणपदं किम्?

(ग) ''मया एवम् अभिहितम्'' अत्र क्रियापदं किम्?

**(छ)** सीता – गृह्णात्वार्यपुत्रः।

रामः – मैथिलि! किं व्यवसितम्?

सीता – ननु सहधर्मचारिणी खल्वहम्।

रामः – मयैकाकिना किल गन्तव्यम्।

सीता – अतो नु खल्वनुगच्छामि।

रामः – वने खलु वस्तव्यम्।

सीता – तत् खलु मे प्रासादः।

राम – श्वश्रूश्वशुरशुश्रूषापि च ते निर्वर्तयितव्या।

सीता - एनामुद्दिश्य देवतानां प्रणामः क्रियते।

रामः - लक्ष्मण! वार्यतामियम्।

लक्ष्मणः - आर्य! नोत्सहे श्लाघनीये काले वारयितुमत्रभवतीम्।

**1. एकपदेन उत्तरत–**

(क) रामस्य सहचारिणी का?

(ख) केन एकाकिना गन्तव्यम्?

**2. पूर्णवाक्येन उत्तरत–**

(क) लक्ष्मणः श्लाघनीये काले कां वारयितुं नोत्सहते?

**3. भाषिककार्यम्–**

(क) ''श्लाघनीये काले'' अनयोः पदयोः विशेषणपदं किम्?

(ख) ''खल्वनुगच्छामि'' अत्र क्रियापदं किम्?

**(ज) (I) 'अ' वाक्यांशस्य मेलनं 'आ' वाक्यांशेन सह कुरुत-**

| 'अ' वाक्यांशः | 'आ' वाक्यांशः |
|---|---|
| 1. शरीरेऽरिः प्रहरति | (क) स राजा परिपाल्यताम् |
| 2. यस्याः शक्रसमो भर्ता | (ख) पुत्रार्थे यदि याच्यते। |
| 3. शुल्के विपणितं राज्यम् | (ग) हृदये स्वजनस्तथा। |
| 4. यदि तेऽस्ति धनुश्श्लाघा | (घ) मया पुत्रवती च या। |

**(II) 'अ' वाक्यांशस्य मेलनं 'आ' वाक्यांशेन सह कुरुत-**

| 'अ' वाक्यांशः | 'आ' वाक्यांशः |
|---|---|
| 1. यत्कृते महति क्लेशे | (क) हस्तेनैव विसर्जितः |
| 2. भृकुटिर्लक्ष्मणस्यैषा | (ख) राज्ये मे न मनोरथः |
| 3. क्रमप्राप्ते हते राज्ये | (ग) नियतीव व्यवस्थिता। |
| 4. शोकादवचनाद् राज्ञा | (घ) भुविशोच्यासने नृपे। |

(झ) **अधोलिखितवाक्येषु रेखांकितानां पदानां प्रसंगानुसार शुद्धम् अर्थं लिखित-**

1. शरीरेऽरिः प्रहरति हृदये स्वजनस्तथा।
2. यस्याः शक्रसमो भर्ता मया पुत्रवती च या।
3. तस्या एव खलु वचनात् भवदभिषेको निवृत्तः।
4. अपूर्वः खल्वस्यायासः।
5. स्त्रीबुद्धिषु स्वमार्जवमुपनिक्षेप्तुम्।

## उत्तराणि

**(क) (1) एकपदेन उत्तरत–**

(क) शरीरे

(ख) स्वजनः

(2) **पूर्णवाक्येन उत्तरत–**

(क) काञ्चुकीयः ''परित्रायतां परित्रायतां कुमार'' इति कथयति।

(ख) स्वजनशब्दः मे लज्जाम् उत्पादयिष्यति।

(3) **भाषिककार्यम्-**

(क) पृथिवीः (ख) हृदये

**(ख) (1) एकपदेन उत्तरत–**

(क) कैकेय्याः (ख) रामेण

(ग) नवनृपतिविमर्शे

(2) **पूर्णवाक्येन उत्तरत–**

(क) उदर्केण गुणेनात्र भवितव्यम्।

(ख) उपहतासु स्त्रीबुद्धिषु स्वमार्जवं निक्षेप्तुम् अलम्।

(3) **भाषिककार्यम्-**

(क) रामाय (ख) उपहतासु

(ग) (1) **एकपदेन उत्तरत–**

(क) पुत्राय (ख) नृपतिः

(2) **पूर्णवाक्येन उत्तरत–**

(क) मातुः परिवादं रामः न श्रोतुम् इच्छति।

(ख) शुल्के विपणितं राज्यं कैकय्या पुत्राय याचितम् ।।

(3) **भाषिककार्यम्-**

(क) काञ्चुकीयाय

(ख) अवेक्षते

(घ) (1) **एकपदेन उत्तरत–**

(क) लक्ष्मणः

(ख) लक्ष्मणः

(2) **पूर्णवाक्येन उत्तरत–**

(क) लक्ष्मणः लोकं युवतिरहितं कर्तुं वाञ्छति।

(3) **भाषिककार्यम्-**

(क) लक्ष्मणः

(ख) अक्षोभ्यः

(ङ) (1) **एकपदेन उत्तरत–**

(क) सौमित्रिणा

(ख) लक्ष्मणम्

(2) **पूर्णवाक्येन उत्तरत–**

(क) लक्ष्मणस्य धनुश्श्लाघा राज्ञः परिपालने अस्ति।

(ख) लक्ष्मणस्य भृकुटिः त्रैलोक्यं दग्धुकामेव संस्थिता।

(3) **भाषिककार्यम्-**

(क) गच्छामः

(ख) भृकुटिः

(च) (1) **एकपदेन उत्तरत–**

(क) महति क्लेशे राज्ये

(ख) चतुर्दश वर्षाणि

(2) **पूर्ववाक्येन उत्तरत–**

(क) रामेण –ताते धनुर्नमयि, मुञ्चानि मातरि शरं, अनुजं भरतं हनानि, एतानि त्रीणि पातकानि कथितानि।

(3) **भाषिककार्यम्-**

(क) पातकेषु

(ख) दत्तान्

(ग) अभिहितम्

(छ) (1) **एकपदेन उत्तरत–**

(क) सीता

(ख) रामेण

(2) **पूर्णवाक्येन उत्तरत–**

(क) लक्ष्मण: श्लाघनीये काले सीतां वारयितुं नोत्सहते।

(3) **भाषिककार्यम्-**

(क) श्लाघनीये

(ख) अनुगच्छामि

(ज) **(I) वाक्यांशमेलनम्**

1. (ग) 2. (घ) 3. (ख) 4. (क)

**(II) वाक्यांशमेलनम्**

1. (घ) 2. (ग) 3. (ख) 4. (क)

(झ) **पदानां शुद्धार्थं लेखनम्-**

1. शत्रु: 2. इन्द्रसम:

3. अवरूद्ध: 4. प्रयास:

5. सरलताम्

# पाठ–4 प्रजानुरञ्जको नृपः

**( क ) त्यागाय सम्भृतार्थानां सत्याय मितभाषिणाम्।**
**यशसे विजिगीषूणां प्रजायै गृहमेधिनाम्॥**
**शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्।**
**वार्द्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्॥**

**1. एकपदेन उत्तरत–**

(क) रघुवंशीया: नृपा: किमर्थं मितभाषिण:?

(ख) रघुवंशीया: नृपा: कस्यै गृहमेधिन:?

**2. पूर्णवाक्येन उत्तरत–**

(क) रघुवंशीया: राजान: कदा विषयैषिण:?

(ख) रघुवंशीया: नृपा: कदा मुनिवृत्तिन:?

**3. भाषिककार्यम्–**

(क) ''बाल्ये'' इत्यर्थे अत्र किं पदं प्रयुक्तम्?

(ख) ''युवा-अवस्थायाम्'' इत्यर्थे किं पदम्।

**( ख ) रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन्।**
**तद्गुणै: कर्णमागत्य चापलाय प्रचोदित:॥**
**वैवस्वतो मनुर्नाम माननीयो मनीषिणाम्।**
**आसीन्महीक्षितामाद्य: प्रणवश्छन्दसामिव ॥**

**1. एकपदेन उत्तरत–**

(क) कवि: केषाम् अन्वयं वक्ष्यति?

(ख) महीक्षिताम् आद्य: क: आसीत्?

2. पूर्णवाक्येन उत्तरत–

(क) कविः कीदृशः सन् अपि रघूणाम् अन्वयं वक्ष्यति?

(ख) मनीषिणां माननीयः कः आसीत्।

3. भाषिककार्यम्–

(क) ''तद्गुणैः'' इत्यत्र ''तत्' पदं केभ्यः प्रयुक्तम्?

(ख) ''वक्ष्ये'' इत्यस्याः क्रियायाः कर्तृपदं किम्?

(ग) **तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः।**
**दिलीप इव राजेन्दुरिन्दुः क्षीरनिधाविव ॥**
**आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः।**
**आगमैः सदृशारम्भ आरम्भसदृशोदयः॥**
**प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत्।**
**सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः ॥**

1. एकपदेन उत्तरत–

(क) दिलीपः कः इव आसीत्?

(ख) दिलीपस्य प्रज्ञा केन समा आसीत्?

(ग) दिलीपस्य आगमः कया सदृशः आसीत्?

2. पूर्णवाक्येन उत्तरत–

(क) रविः रसं कथमादत्ते?

(ख) दिलीपः किमर्थं प्रजाभ्यः बलिम् अग्रहीत्?

3. भाषिककार्यम्–

(क) ''अन्तः'' अस्य पदस्य विलोमपदं किम्?

(ख) ''सूर्यः'' इत्यस्य पदस्य पर्यायपदं किम्?

(घ) **ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः।**
**गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव ॥**

**1. एकपदेन उत्तरत्–**

(क) दिलीपस्य ज्ञाने किम् आसीत्?

(ख) दिलीपस्य त्यागे किम् आसीत्?

**2. पूर्णवाक्येन उत्तरत्–**

(क) दिलीपस्य गुणा: कथं सप्रसवा इव आसन्?

**3. भाषिककार्यम्–**

(क) ''सहोदरा:'' अस्य पदस्य किं पर्यायपदम्?

(ख) ''अवगुणा:'' इत्यस्य विलोमपदं किम्?

(ङ) **प्रजानां विनयाधानाद्रक्षणाद् भरणादपि।**
**स पिता पितरस्तासां केवलं जन्महेतव: ॥**
**द्वेष्योऽपि संमत: शिष्टस्तस्यार्तस्य यथौषधम्**
**त्याज्यो दुष्ट: प्रियोऽप्यासीदङ्गुलीवोरगक्षता ॥**
**स वेलावप्रवलयां परिखीकृतसागराम्।**
**अनन्यशासनामुर्वीं शशासैकपुरीमिव ॥**

**1. एकपदेन उत्तरत–**

(क) दिलीप: कासां पिता आसीत्?

(ख) दिलीपस्य कृते शिष्ट: द्वेष्य: अपि किमिव सम्मत: आसीत्?

**2. पूर्णवाक्येन उत्तरत्–**

(क) दिलीप: कथं प्रजानां पिता आसीत्?

(ख) दिलीपस्य कृते क: उरगक्षता-अंगुलीव त्याज्य: आसीत्?

**3. भाषिककार्यम्–**

(क) स: ''इति पदं कस्मै प्रयुक्तम्?

(ख) ''शशास'' इत्यस्या: क्रियाया: कर्तृपदं किम्

**( च ) अधोप्रदत्तानां श्लोकानाम् अन्वयस्य रिक्तस्थानपूर्ति मञ्जूषा प्रदत्तैः पदैः कुरुत-**

**1. शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्।**

**वार्द्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्॥**

**अन्वयः** - शैशवे ......., यौवने विषयैषिणाम्, ..... मुनीवृत्तीनां, ..... योगेन तनुत्यजाम्।

**मञ्जूषा**

| |
|---|
| **वार्द्धके, अभ्यस्तविद्यानाम्, अन्ते** |

**2. रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन्।**

**तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः ॥**

**अन्वयः** - तनुवाग्विभवः .......... सन्.......... कर्णम् आगत्य .......... प्रचोदितः रघूणाम् ..... वक्ष्ये।

**मञ्जूषा**

| |
|---|
| अन्वयम्, अपि, तद्गुणैः, चापलाय |

**3. वैवस्वतो मनुर्नाम माननीयो मनीषिणाम्।**

**आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव ॥**

**अन्वयः** - वैवस्वतः ............. माननीयः, छन्दसाम् .... इव ..... आद्यः ....... नाम आसीत्।

**मञ्जूषा**

| |
|---|
| प्रणवः, महीक्षिताम्, मनीषिणाम्, मनुः |

**4. तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः।**

**दिलीप इव राजेन्दुरिन्दुः क्षीरनिधाविव॥**

**अन्वयः** - शुद्धिमति तदन्वये ..... इन्दु ....., शुद्धिमत्तरः, .... इव दिलीपः ......।

**मञ्जूषा**

| |
|---|
| प्रसूतः, क्षीरनिधौ, इव, राजेन्दुः |

**5. प्रजानां विनयाधानाद्रक्षणाद् भरणादपि।**

**स पिता पितरस्तासां केवलं जन्महेतवः ॥**

**अन्वयः** - सः ............, रक्षणात्, .... अपि प्रजानां पिता। तासाम् ..... केवलं .....।

**मञ्जूषा**

| |
|---|
| जन्महेतवः, भरणात्, विनयाधानात्, पितरः |

**(छ) अधोप्रदत्तानां श्लोकानां भावार्थस्य रिक्तस्थानपूर्तिं मञ्जूषा प्रदत्तैः पदैः कुरुत-**

**1. आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः।**

**आगमैः सदृशारम्भ आरम्भसदृशोदयः ।**

**भावार्थः**—यथा राज्ञः दिलीपः ..... विशालः आसीत् तथैव तस्य ..... अपि विशाला आसीत्। बुद्धेः अनुसारं .... अभ्यासमपि करोति स्म। शास्त्रोक्तविधिना कार्यं करोति स्म तदनुरूपमेव ..... प्राप्नोति स्म।

**मञ्जूषा**

| |
|---|
| शास्त्राणाम्, शरीरेण, फलम्, बुद्धिः |

**2. ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः।**

**गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव ॥**

**भावार्थः**—राजा दिलीपः ज्ञाने सत्यपि ..... धारयति, ..... सति अपि अपरान् .... करोति, महान्तं ..... कृत्वा अपि स्वकीयां प्रशंसां न करोति। एवं राज्ञः दिलीपस्य गुणाः गुणानुसारित्वात् सहोदराः इव सन्ति।

**मञ्जूषा**

| |
|---|
| शक्तौ, त्यागम्, क्षमाम्, मौनम् |

**3. प्रजानां विनयाधानाद्रक्षणाद् भरणादपि।**

**स पिता पितरस्तासां केवलं जन्महेतवः॥**

**भावार्थः**—राजा दिलीपः .... इव स्वकीयायाः प्रजायाः विनम्रतादि-शिक्षाप्रदाने, तस्याः .... भरणपोषणे च रतः आसीत्। ..... पितरः तु जन्मनः कारणमात्रम् आसन् परं प्रजायाः यथार्थे पिता तु ..... एव आसीत्।

**मञ्जूषा**

| दिलीपः, पिता, रक्षणे, प्रजायाः |
|---|

**4. द्वेष्योऽपि संमतः शिष्टस्तस्यार्तस्य यथौषधम्।**
**त्याज्यो दुष्टः प्रियोऽप्यासीदङ्गुलीवोरगक्षता ॥**

**भावार्थः**–राजा दिलीपः द्वेष्यं ..... अपि तथैव स्वीकरोति यथा .... कटु-औषधम्। . ... च प्रिये सति अपि तं तथैव त्यजति यथा ..... क्षता अङ्गुली विषप्रसरणभयात् त्यज्यते।

**मञ्जूषा**

| रोगी, सर्पेण, सज्जनम्, दुष्टस्य |
|---|

**(ज) (I) 'अ' वाक्यांशस्य मेलनं 'आ' वाक्यांशेन सह कुरुत-**

| 'अ' वाक्यांशः | 'आ' वाक्यांशः |
|---|---|
| 1. त्यागाय सम्भृतार्थनाम् | (क) स ताभ्यो बलिमग्रहीत्। |
| 2. आकारसदृश-प्रज्ञः | (ख) प्रणवश्छन्दसामिव। |
| 3. आसीन्महीक्षितामाद्यः | (ग) प्रज्ञया सदृशागमः। |
| 4. प्रजानामेव भूत्यर्थम् | (घ) सत्याय मितभाषिणाम्। |

**(II) 'अ' वाक्यांशस्य मेलनं 'आ' वाक्यांशेन सह कुरुत-**

| 'अ' वाक्यांशः | 'आ' वाक्यांशः |
|---|---|
| 1. स वेलावप्रवलयाम् | (क) यौवने विषयैषिणाम्। |
| 2. ज्ञाने मौनं क्षमा शक्तौ | (ख) त्यागे श्लाघाविपर्ययः। |
| 3. आगमैः सदृशारम्भः | (ग) परिखीकृतसागराम्। |
| 4. शैशवेऽभ्यस्तविद्यानाम् | (घ) आरम्भसदृशोदयः। |

**(झ) अधोलिखितवाक्येषु रेखांकितानां पदानां प्रसंगानुसारं शुद्धम् अर्थं लिखित-**

1. त्यागाय सम्भृतार्थानां सत्याय मितभाषिणाम्।
2. शैशवेऽभ्यस्तविद्यानों यौवने विषयैषिणाम्।
3. आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव।
4. तदन्वये शुद्धिमति प्रसुतः शुदधिमतरः।
5. तदगुणैः कर्ममागत्य चापलाप प्रचोदितः।

# उत्तराणि

**(क) (1) एकपदेन उत्तरत–**

(क) सत्याय।

(ख) प्रजायै।

**(2) पूर्णवाक्येन उत्तरत–**

(क) रघुवंशीयाः राजानः यौवने विषयैषिणः।

(ख) रघुवंशीयाः नृपाः वार्धक्ये मुनिवृत्तिनः।।

**(3) भाषिककार्यम्-**

(क) शैशवे

(ख) यौवने

**(ख) (1) एकपदेन उत्तरत–**

(क) रघूणाम् राज्ञाम्।

(ख) मनुः।

**(2) पूर्णवाक्येन उत्तरत–**

(क) कविः तनुवाग्विभवः अपि रघूणाम् अन्वयं वक्ष्यति?

(ख) मनीषिणां माननीयः मनुः आसीत्।

**(3) भाषिककार्यम्-**

(क) रघूणां राज्ञां कृते।

(ख) अहम् (कालिदासः)।

**(ग) (1) एकपदेन उत्तरत–**

(क) राजेन्दुः इव।

(ख) आकारेण समा।

(ग) प्रज्ञया सदृशः।

(2) **पूर्णवाक्येन उत्तरत–**

(क) रवि: सहस्रगुणमुत्स्रष्टुं रसं आदत्ते।

(ख) दिलीप: भूत्यर्थं प्रजाभ्य: बलिम् अग्रहीत्।

(3) **भाषिककार्यम्-**

(क) आरम्भ:।

(ख) रवि:।

(घ) (1) **एकपदेन उत्तरत–**

(क) मौनम्।

(ख) श्लाघाविपर्यय:।

(2) **पूर्णवाक्येन उत्तरत–**

(क) दिलीपस्य गुणा: गुणानुबान्धित्वात् सप्रसवा इव आसन्।

(3) **भाषिकं कार्यम्–**

(क) सप्रसवा:।

(ख) गुणा:।

(ङ) (1) **एकपदेन उत्तरत–**

(क) प्रजानाम्।

(ख) आर्तस्य औषधम् इव।

(2) **पूर्णवाक्येन उत्तरत–**

(क) दिलीप: विनयाधानात्, रक्षणात्, भरणात् च प्रजानां पिता आसीत्।

(ख) दिलीपस्य कृते प्रियोऽपि दुष्ट: उरगक्षताङ्गुलीव त्याज्य: आसीत्।

(3) **भाषिककार्यम्-**

(क) दिलीपाय।

(ख) स:।

**( च ) अन्वयस्य रिक्तस्थानपूर्तिः-**

1. (1) अभ्यस्तविद्यानाम्
   (2) वार्द्धके
   (3) अन्ते
2. (1) अपि
   (2) तद्गुणैः
   (3) चापलाय
   (4) अन्वयम्
3. (1) मनीषिणाम्
   (2) प्रणवः
   (3) महीक्षिताम्
   (4) मनुः
4. (1) क्षीरनिधौ
   (2) इव
   (3) राजेन्दुः
   (4) प्रसूतः
5. (1) विनयाधानात्
   (2) भरणात्
   (3) पितरः
   (4) जन्महेतवः

**( छ ) भावार्थानाम् रिक्तस्थानपूर्तिः**

1. (1) शरीरेण
   (2) बुद्धिः
   (3) शास्त्राणाम्
   (4) फलम्

2. (1) मौनम्

(2) शक्तौ

(3) क्षमाम्

(4) त्यागम्

3. (1) पिता

(2) रक्षणे

(3) प्रजाया:

(4) दिलीप:

4. (1) सज्जनम्

(2) रोगी

(3) दुष्टस्य

(4) सर्पेण

**(ज) (I) वाक्यांशमेलनम्**

1. (घ) 2. (ग) 3. (ख) 4. (क)

**(II) वाक्यांशमेलनम्**

1. (ग) 2. (ख) 3. (घ) 4. (क)

**(झ) पदानां शुदधार्थलेखनम्-**

1. अल्पभाषिणाम् 2. युवा-अवस्थायाम्

3. ओंकार: 4. जात:

5. प्रेरित:

# पाठ–5 दौवारिकस्य निष्ठा

**(क) संवृत्ते किञ्चिदन्धकारे भुशुण्डीं स्कन्धे निधाय निपुणं निरीक्षमाणः, आगत-प्रत्यागतं च विदधानः, प्रतापदुर्गदौवारिकः कस्यापि पादक्षेपध्वनिमिवा-श्रौषीत्। ततः स्थिरीभूय पुरतः पश्यन् सत्यपि दीपप्रकाशे कमप्यनवलोकयन् गम्भीरस्वरेणैवम् अवादीत्–''कः कोऽत्र भोः?'' इति।**

**अथ क्षणानन्तरं पुनः स एव पादध्वनिरश्रावीति भूयः साक्षेपमवोचत्–''क एष मामनुत्तरयन् मुमूर्षुः समायाति बधिरः?**

**ततो ''दौवारिक! शान्तो भव किमिपि व्यर्थ मुमूर्षुरिति बधिर इति च वदसि?'' इति वक्तारमपश्यतैवाऽऽकर्णि मन्द्रस्वरमेदुरा वाणी। अथ ''तत् किं नाज्ञायि अद्यापि भवता प्रभुवर्याणामादेशो यद् दौवारिकेण प्रहरिणा वा त्रिःपृष्टोऽपि प्रत्युत्तरमददद् हन्तव्यः इति'' इत्येवं भाषमाणेन द्वाःस्थेन ''क्षम्यतामेष आगच्छामि, आगत्य च निखिलं निवेदयामि'' इति कथयन् द्वादशवर्षेण केनापि भिक्षावटुनानुगम्यमानः कोऽपि काषायवासाः धृततुम्बीपात्रः भव्यमूर्तिः संन्यासी दृष्टः। ततस्तयोरेवम् अभूदालापः–**

**1. एकपदेन उत्तरत–**

(क) दौवारिकः किं शृणोति?

(ख) दौवारिकः भुशुण्डीं कुत्र निधाय भ्रमति?

**2. पूर्णवाक्येन उत्तरत–**

(क) दौवारिकः साक्षेपं किम् अवोचत्?

(ख) संन्यासी केन अनुगम्यमानः आसीत्?

**3. भाषिककार्यम्–**

(क) ''भव्यमूर्तिः संन्यासी'' अनयोः पदयोः विशेषणपदं किम्?

(ख) ''मुमूर्षुः समायाति बधिरः'' अत्र क्रियापदं किम्?

(ग) ''प्रकाशे'' इति पदस्य विलोमपदं किम्?

**(ख) संन्यासी - कथमस्मान् संन्यासिनोऽपि कठोरभाषणैस्तिरस्करोषि?**

**दौवारिकः - भगवन्! संन्यासी तुरीयाश्रमसेवीति प्रणम्यते, परन्तु प्रभूणामाज्ञामुल्लंघ्य निजपरिचयमददेवाऽऽयातीत्याक्रुश्यते।**

**संन्यासी - सत्यं क्षान्तोऽयमपराधः, परं संन्यासिनो ब्रह्मचारिणः पण्डिताः, स्त्रियो बालाश्च न किमपि प्रष्टव्याः। आत्मानम् अपरिचाययन्तोऽपि प्रवेष्टव्याः।**

**दौवारिकः - संन्यासिन्! संन्यासिन्! बहूक्तम्, विरम, न वयं दौवारिका ब्रह्मणोऽप्याज्ञां प्रतीक्षामहे, केवलं महाराजशिववीरस्याज्ञां वयं शिरसा वहामः। प्राह्णे महाराजस्य सन्ध्योपासनसमये भवादृशानां प्रवेशसमयो भवति, न तु रात्रौ।**

**1. एकपदेन उत्तरत–**

(क) दौवारिकः संन्यासिनः कैः तिरस्करोषि?

(ख) कः तुरीयाश्रमसेवी?

**2. पूर्णवाक्येन उत्तरत–**

(क) दौवारिकः कस्य आज्ञां वहति?

(ख) संन्यासिनः मते प्रवेशकाले के किमपि न प्रष्टव्याः?

**3. भाषिककार्यम्–**

(क) 'वयम्' इति सर्वनामपदं केभ्यः प्रयुक्तम्?

(ख) 'वहामः' इत्यस्य क्रियापदस्य कर्तृपदं किम्?

**(ग) संन्यासी - तत् किं कोऽपि न प्रविशति रात्रौ?**

**दौवारिकः - (साक्षेपम्) कोऽपि कथं न प्रविशति? परिचिता वा, प्राप्तपरिचयपत्रा वा, आहूता वा प्रविशन्ति, न तु ये केऽपि समागता भवादृशाः।**

**संन्यासी - दौवारिक! इत आयाहि किमपि कर्णे कथयिष्यामि।**

**दौवारिकः - (तथा कृत्वा) कथ्यताम्।**

**संन्यासी - यदि त्वं मां प्रविशन्तं न प्रतिरुन्धेः तदधुनैव परिष्कृतपारदभस्म तुभ्यं दद्याम् यथा त्वं गुञ्जामात्रेणापि द्वापञ्चाशत्संख्याकतुलापरिमितं ताम्रं सुवर्णं विधातुं शक्नुयाः।**

**दौवारिकः - हेहे, कपटसंन्यासिन्! कथं विश्वासघातं स्वामिवञ्चनं च शिक्षयसि ते केचनान्ये भवन्ति नीचा ये उत्कोचलोभेन स्वामिनं वञ्चयित्वा आत्मानम् अन्धतमसि पातयन्ति न वयं शिवगणास्तादृशाः। (संन्यासिनो हस्तं धृत्वा) इतस्तु सत्यं कथय कस्त्वम्? कुत आयातः? केन वा प्रेषितः?**

**1. एकपदेन उत्तरत–**

(क) कर्णे कः कथयितुम् इच्छति?

(ख) दौवारिकः हस्तेन कं गृह्णाति?

**2. पूर्णवाक्येन उत्तरत–**

(क) रात्रौ के प्रवेष्टुं शक्नुवन्ति?

(ख) दौवारिकस्य मते के नीचाः भवन्ति?

**3. भाषिकं कार्यम्–**

(क) ''त्वम्'' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(ख) ''सत्यं कथय कस्त्वम्'' अत्र कर्तृपदं किम्?

(ग) ''दिवसे'' इत्यस्य पदस्य विलोमपदं किम्?

**(घ) संन्यासी - (स्मित्वा) अथ त्वं मां कं मन्यसे?**

**दौवारिकः - अहं तु त्वां कस्यापि देशद्रोहिणो गूढ़चरं मन्ये। (हस्तमाकृष्य) तदागच्छ दुर्गाध्यक्षसमीपे, स एवाभिज्ञाय त्वया यथोचितं व्यवहरिष्यति।**

**ततः संन्यासी तु 'त्यज! नाहं पुनरायास्यामि, नाहं पुनरेवं कथयिष्यामि, महाशयोऽसि दयस्व इति बहुधा अकथयत्, दौवारिकस्तु तमाकृष्य नयन्नेव प्रचलितः।**

**अथ दीपस्य समीपमागत्य संन्यासिनोक्तम् ''दौवारिक! न मां प्रत्यभिजानासि?''**

**ततः पुनर्निपुणं निरीक्षमाणो दौवारिकस्तं पर्यचिनोत्–'आः! कथं श्रीमान् गौरसिंहः? आर्य! क्षम्यतामनुचितव्यवहार एतस्य ग्राम्यवराकस्य।' तदवधार्य तस्य पृष्ठे हस्तं विन्यस्यन् संन्यासिरूपो गौरसिंहः समवोचत्–**

**''दौवारिक! मया दृढं परीक्षितोऽसि, यथायोग्य एव पदे नियुक्तोऽसि, त्वादृक्षा एव वस्तुतः पुरस्कारभाजनानि भवन्ति लोकद्वयं च विजयन्ते।''**

**1. एकपदेन उत्तरत–**

(क) दौवारिकः कम् आकृष्य प्रचलितः?

(ख) संन्यासीरूपः गौरसिंहः कस्य पृष्ठे हस्तं विन्यस्यति?

**2. पूर्णवाक्येन उत्तरत–**

(क) दौवारिकः कं दुर्गाध्यक्षसमीपे नेतुम् इच्छति?

(ख) गौरसिंहेन कः दृढं परीक्षितोऽस्ति?

**3. भाषिकं कार्यम्–**

(क) ''श्रीमान् गौरसिंहः'' इत्यनयोः पदयोः विशेषणपदं किम्?

(ख) ''गुप्तचरम्'' इति पदस्य किं पर्यायपदमत्र प्रयुक्तम्?

(ग) ''तम्'' इति सर्वनामपदं कस्मै प्रयुक्तम्?

**(ङ) अधोलिखितवाक्येषु रेखांकितानां पदानां प्रसंगानुसार शुद्धम् अर्थं लिखित-**

1. मुमूर्षुः समायाति बधिरः।
2. क्षम्यतामेष आगच्छामि, आगत्य च निखिलं निवेदयामि।
3. संन्यासी तुरीयाश्रमसेवीति प्रणम्यते।
4. स एवाभिज्ञाय त्वया यथोचितं व्यवहरिष्यति।
5. कस्यापि देशद्रोहिणो गूढचरं मन्ये।

## उत्तराणि

**(क) (1) एकपदेन उत्तरत–**

(क) पादक्षेपध्वनिम्

(ख) स्कन्धे

(2) **पूर्णवाक्येन उत्तरत–**

(क) दौवारिकः साक्षेपमवोचत् – क एषः मामनुत्तरयन् मुमूर्षुः समायाति बधिरः?

(ख) संन्यासी भिक्षाबटुना अनुगम्यमानः आसीत्।

(3) **भाषिककार्यम्–**

(क) भव्यमूर्तिः

(ख) समायाति

(ग) अन्धकारे

(ख) (1) **एकपदेन उत्तरत–**

(क) कठोरभाषणैः

(ख) संन्यासी

(2) **पूर्णवाक्येन उत्तरत–**

(क) दौवारिकः महाराज शिववीरस्य आज्ञां वहति।

(ख) संन्यासिनः मते प्रवेशकाले ब्रह्मचारिणः, पण्डिताः, स्त्रियो बालाश्च किमपि न प्रष्टव्याः।

(3) **भाषिककार्यम्–**

(क) दौवारिकेभ्यः

(ख) वयम्

(ग) (1) **एकपदेन उत्तरत–**

(क) संन्यासी

(ख) संन्यासिनम्

2. **पूर्णवाक्येन उत्तरत–**

(क) रात्रौ परिचिता वा, प्राप्तपरिचयपत्रा वा, आहूता वा प्रवेष्टुं शक्नुवन्ति।

(ख) ये उत्कोचलोभेन स्वामिनं वञ्चयित्वा आत्मानम् अन्धतमसि पातयन्ति, ते नीचा भवन्ति।

**( 3 ) भाषिककार्यम्–**

(क) संन्यासिने

(ख) त्वम्

(ग) रात्रौ

**( घ ) ( 1 ) एकपदेन उत्तरत–**

(क) सन्यासिनम्

(ख) दौवारिकस्य

**( 2 ) पूर्णवाक्येन उत्तरत–**

(क) दौवारिकः सन्यासिनं दुर्गाध्यक्षसमीपे नेतुम् इच्छति।

(ख) गौरसिंहेन दौवारिकः दृढ़ं परीक्षितोऽस्ति।

**( 3 ) भाषिकं कार्यम्–**

(क) श्रीमान्

(ख) गूढचरम्

(ग) सन्यासिने

**( ङ ) पदानां शुदधार्थं लेखनम्-**

1. आगच्छति।
2. सर्वम्।
3. चतुर्थः
4. ज्ञात्वा।
5. गुप्तचरम्।

# पाठ–6 सूक्ति–सौरभम्




**(क) स्वायत्तमेकान्तगुणं विधात्रा**
**विनिर्मितं छादनमज्ञतायाः।**
**विशेषतः सर्वविदां समाजे**
**विभूषणं मौनमपण्डितानाम् ॥**

**1. एकपदेन उत्तरत–**

(क) अज्ञतायाः छादनं किम्?

(ख) मौनं केन विनिर्मितम्?

**2. पूर्णवाक्येन उत्तरत–**

(क) सर्वविदां समाजे मौनं केषां विभूषणम्?

**3. भाषिककार्यम्–**

(क) 'मूर्खाणाम्' इत्यस्य किं पर्यायपदम् अत्र प्रयुक्तम्?

(ख) ''विधात्रा'' इति कर्तृपदस्य क्रियापदं किम्?

**(ख) रूपं प्रसिद्धं न बुधास्तदाहु-**

**विद्यावतां वस्तुत एव रूपम्।**

**अपेक्षया रूपवतां हि विद्या**

**मानं लभन्तेऽतितरां जगत्याम्॥**

**1. एकपदेन उत्तरत–**

(क) वस्तुतः रूपं केषाम् एव भवति?

(ख) के रूपं प्रसिद्धं न आहुः?

**2. पूर्णवाक्येन उत्तरत–**

(क) बुधाः रूपवताम् अपेक्षया किं लभन्ते?

**3. भाषिककार्यम्–**

(क) 'मूर्खाः' इत्यस्य पदस्य किं विलोमपदम्?

(ख) 'संसारे' इत्यस्य पदस्य पर्यायपदं किम्?

**(ग) न दुर्जनः सज्जनतानुपैति शठः सहस्रैरपि शिक्ष्यमाणः।**

**चिरं निमग्नोऽपि सुधा-समुद्रे न मन्दरो मार्दवमभ्युपैति ॥**

**1. एकपदेन उत्तरत–**

(क) दुर्जनः काम् न उपैति?

**2. पूर्णवाक्येन उत्तरत–**

(क) मन्दर: सुधासमुद्रे निमग्नोऽपि किं न अभ्युपैति?

**3. भाषिककार्यम्–**

(क) ''अभ्युपैति'' इति क्रियाया: कर्तृपदं किम्?

(ख) ''दुर्जनता'' इत्यस्य पदस्य विलोमपदं किम्?

**(घ) कर्णामृतं सूक्तिरसं विमुच्य दोषेषु यत्न: सुमहान् खलानाम्।**
**निरीक्षते केलिवनं प्रविश्य क्रमेलक: कण्टकजालमेव ॥**

**1. एकपदेन उत्तरत–**

(क) खलानां कुत्र यत्न: भवति?

(ख) सूक्तिरस: कीदृश: भवति?

**2. पूर्णवाक्येन उत्तरत–**

(क) क्रमेलक: कुत्र प्रविश्य कण्टकजालमेव निरीक्षते?

**3. भाषिककार्यम्–**

(क) 'सज्जनानाम्'' इति पदस्य विलोमपदं किम्?

(ख) ''निरीक्षते'' इति क्रियाया: कर्तृपदं किम्?

**(ङ) उत्साह-सम्पन्नमदीर्घसूत्रं क्रियाविधिज्ञं व्यसनेष्वसक्तम्।**
**शूरं कृतज्ञं दृढ़सौहृदञ्च लक्ष्मी: स्वयं याति निवासहेतो: ॥**

**1. एकपदेन उत्तरत–**

(क) निवासहेतो: का स्वयं याति?

**2. पूर्णवाक्येन उत्तरत–**

(क) लक्ष्मी: कीदृशं जनं प्रति स्वयं याति?

**3. भाषिककार्यम्–**

(क) ''याति'' इति क्रियायाः कर्तृपदं किम्?

(ख) ''दृढ़मित्रता'' इत्यर्थे किं पदं प्रयुक्तम्?

**(च) दीर्घप्रयासेन कृतं हि वस्तु निमेषमात्रेण भजेद् विनाशम्।**
**कर्तुं कुलालस्य तु वर्षमेकं भेत्तुं हि दण्डस्य मुहूर्तमात्रम्॥**

**1. एकपदेन उत्तरत–**

(क) निमेषमात्रेण किं विनाशं भजेत्?

**2. पूर्णवाक्येन उत्तरत–**

(क) कुलालेन कृतं कुम्भादिं भेत्तुं कस्य मुहूर्तमात्रम् अलम्?

**3. भाषिककार्यम्–**

(क) 'लघुप्रयासेन' अस्य विलोमपदं किम्?

(ख) ''वस्तु'' इत्यस्य कर्तृपदस्य क्रियापदं किम्

**(छ) आरभेत हि कर्माणि श्रान्तः श्रान्तः पुनः पुनः।**
**कर्माण्यारभमाणं हि पुरुषं श्रीर्निषेवते ॥**

**1. एकपदेन उत्तरत–**

(क) श्रीः कीदृशं पुरुषं निषेवते?

**2. पूर्णवाक्येन उत्तरत–**

(क) का कर्माण्यारभमाणं पुरुषं निषेवते?

**3. भाषिककार्यम्–**

(क) 'लक्ष्मीः' इत्यस्य पदस्य पर्यायपदं किम्?

(ख) ''कर्माण्यारभमाणं पुरुषम्'' अनयोः पदयोः विशेष्यपदं किम्?

(ज) **एकेनापि सुपुत्रेण विद्यायुक्तेन साधुना।**

**आह्लादितं कुलं सर्व यथा चन्द्रेण शर्वरी ॥**

**1. एकपदेन उत्तरत–**

(क) चन्द्रेण का आह्लादिता भवति?

(ख) सर्वं कुलं केन आह्लादितं भवति?

**2. पूर्णवाक्येन उत्तरत–**

(क) कीदृशेन पुत्रेण कुलं आह्लादितं भवति?

**3. भाषिककार्यम्–**

(क) ''एकेन सुपुत्रेण'' इत्यत्र विशेष्यपदं किम्?

(ख) ''रात्रि:'' इत्यर्थे अत्र किं पदं प्रयुक्तम्?

(झ) **गुणी गुणं वेत्ति न वेत्ति निर्गुणः**

**बली बलं वेत्ति न वेत्ति निर्बलः।**

**पिको वसन्तस्य गुणं न वायसः**

**करी न सिंहस्य बलं न मूषकः ॥**

**1. एकपदेन उत्तरत–**

(क) गुणी किं वेत्ति?

(ख) वसन्तस्य गुणं कः वेत्ति?

**2. पूर्णवाक्येन उत्तरत–**

(क) सिंहस्य बलं कः न जानाति?

(ख) निर्बलः किं न वेत्ति?

**3. भाषिककार्यम्–**

(क) 'निर्बल:' इत्यस्य विलोमपदं किम्?

(ख) 'गज:' इत्यर्थे अस्मिन् श्लोके किं पदं प्रयुक्तम्?

(ञ) **अजीर्णे भेषजं वारि जीर्णे वारि बलप्रदम्।**

**भोजने चामृतं वारि भोजनान्ते विषावहम् ।**

1. **एकपदेन उत्तरत–**

(क) अजीर्णे किं भेषजम्?

(ख) जीर्णे बलप्रदं किं भवति?

2. **पूर्णवाक्येन उत्तरत–**

(क) वारि अमृतं कदा (कुत्र) भवति?

(ख) वारि विषापहं कदा भवति?

3. **भाषिककार्यम्–**

(क) ''जीर्णे'' इत्यस्य पदस्य विलोमपदं किम्?

(ख) ''जलम्'' इत्यर्थे किं पदं प्रयुक्तम्?

**(ट) अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम्।**

**सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः ॥**

1. **एकपदेन उत्तरत–**

(क) शास्त्रं सर्वस्य किम् अस्ति?

(ख) शास्त्रं यस्य लोचनं नास्ति सः कीदृशः भवति?

2. **पूर्णवाक्येन उत्तरत–**

(क) अत्र शास्त्रस्य के गुणाः कथिताः?

3. **भाषिककार्यम्–**

(क) ''नेत्रम्'' इत्यर्थे अत्र किं पदं प्रयुक्तम्?

(ख) ''प्रत्यक्षम्'' अस्य पदस्य किं विलोमपदमत्र प्रयुक्तम्?

**(ठ) अल्पज्ञ एव पुरुषः प्रलपत्यजस्रं**

**पाण्डित्यसम्भृतमतिस्तु मितप्रभाषी।**

**कांस्यं यथा हि कुरुतेऽतितरां निनादं**

**तद्वत् सुवर्णमिह नैव करोति नादम् ॥**

**1. एकपदेन उत्तरत–**

(क) अजस्रं कः प्रलपति?

(ख) अतितरां निनादं कः करोति?

**2. पूर्णवाक्येन उत्तरत–**

(क) मितप्रभाषी कः भवति?

(ख) कांस्यवत् नादं किं न करोति?

**3. भाषिककार्यम्–**

(क) ''काञ्चनम्'' इत्यर्थे किं पदं प्रयुक्तम्?

(ख) अत्र ''तत्'' सर्वनामपदं कस्मै प्रयुक्तम्?

**(ड) अधोप्रदत्तानां श्लोकानाम् अन्वयस्य रिक्तस्थानपूर्तिं मञ्जूषाप्रदत्तैः शब्दैः कुरुत–**

1. स्वायत्तमेकान्तगुणं विधात्रा, विनिर्मितं छादनमज्ञतायाः।
विशेषतः सर्वविदां समाजे विभूषणं मौनमपण्डितानाम्।।

**अन्वयः** - विधात्रा स्वायत्तम् ..... मौनम् ...... छादनं विनिर्मितम्।
विशेषतः .......... समाजे अपण्डितानां ........... (भवति)।

**मञ्जूषा**

| विभूषणम्, एकान्तगुणम्, अज्ञतायाः, सर्वविदाम् |
|---|

2. न दुर्जनः सज्जनतामुपैति शठः सहस्रैरपि शिक्ष्यमाणः।
चिरं निमग्नोऽपि सुधा-समुद्रे न मन्दरो मार्दवमभ्युपैति ।।

**अन्नयः** - शठः दुर्जनः सहस्रैः ..... शिक्ष्यमाणः सज्जनतां न.....।
मन्दरः ........ चिरं निमग्नः अपि ............ न अभ्युपैति।

**मञ्जूषा**

| उपैति, सुधासमुद्रे, मार्दवम्, अपि |
|---|

3. उत्साहसम्पन्नमदीर्घसूत्रं क्रियाविधिज्ञं व्यसनेष्वसक्तम्।

शूरं कृतज्ञं दृढ़सौहृदञ्च लक्ष्मीः स्वयं याति निवासहेतोः।।

**अन्वयः** – लक्ष्मीः .......... अदीर्घसूत्रं, ......... व्यसनेषु असक्तम्, ....... कृतज्ञं, दृढ़ सौहृदं च ..... स्वयं याति।

**मञ्जूषा**

| क्रियाविधिज्ञम्, उत्साहसम्पन्नम्, निवासहेतो, शूरम् |
|---|

4. आरभेत हि कर्माणि श्रान्तः श्रान्तः पुनः पुनः।

कर्माण्यारभमाणं हि पुरुषं श्रीर्निषेवते।।

**अन्वयः** – श्रान्तः .......... हि पुनः पुनः ..... आरभेत। ..... हि कर्माणि .... पुरुषं निषेवते।

**मञ्जूषा**

| आरभमाणम्, श्रान्तः, कर्माणि, श्रीः |
|---|

5. अनेकसंशयोच्छेदि, परीक्षार्थस्य दर्शकम्।

सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः।।

**अन्वयः** – अनेकसंशयोच्छेदि, ............. दर्शकम् ..... लोचनम् ..... यस्य न अस्ति सः ..... एव।

**मञ्जूषा**

| अन्धः, परोक्षार्थस्य, सर्वस्य, शास्त्रम् |
|---|

**( ढ ) अधोप्रदत्तानां श्लोकानां भावार्थानां रिक्तस्थानपूर्तिं मञ्जूषाप्रदत्तैः शब्दैः कुरुत–**

1. दीर्घप्रयासेन कृतं हि वस्तु निमेषमात्रेण भजेद् विनाशम्।

कर्तुं कुलालस्य तु वर्षमेकं भेत्तुं हि दण्डस्य मुहूर्तमात्रम्।।

**भावार्थः**– महता सुदीर्घप्रयासेन .... वस्तु क्षणे एव .... गच्छति। यथा ..... वर्षे निर्मितं घटं दण्डस्य ..... क्षणे एव विनाशं याति।

## मञ्जूषा

| |
|---|
| विनाशम्, निर्मितम्, प्रहारेण, कुम्भकारेण |

2. एकेनापि सुपुत्रेण विद्यायुक्तेन साधुना।

आह्लादितं कुलं सर्वं यथा चन्द्रेण शर्वरी।

**भावार्थः**- यथा एकाकिना ...... एव रात्रिः ....... भवति, तथैव एकेन ..... सुपुत्रेण ..... वंशः प्रसन्नतां याति।

## मञ्जूषा

| |
|---|
| सर्वः, विद्यायुक्तेन, चन्द्रेण, सुशोभिता |

3. गुणी गुणं वेत्ति न वेत्ति निर्गुणः

बली बलं वेत्ति न वेत्ति निर्बलः।

पिको वसन्तस्य गुणं न वायसः

करी च सिंहस्य बलं न मूषकः ।।

**भावार्थः** - गुणवान् नरः एव ....... जानाति न तु गुणहीनः यथा ..... एव वसन्तस्य गुणं जानाति काकः न। बलवान् ..... एव बलं जानाति, बलहीनः नरः न, यथा गजः एव ..... बलं जानाति, मूषकः न।

## मञ्जूषा

| |
|---|
| सिंहस्य, नरः, गुणान्, पिकः |

4. अजीर्णे भेषजं वारि जीर्णे वारि बलप्रदम्।

भोजने चामृतं वारि भोजनान्ते विषावहम्।

भावार्थः - अजीर्ण-अवस्थायां .... औषध इव भवति, जीर्ण-अवस्थायां जलं .... भवति। भोजनस्य .... जलं अमृततुल्यं भवति, भोजनस्य ..... जलं विषतुल्यं भवति।

## मञ्जूषा

| |
|---|
| अन्ते, मध्ये, जलम्, बलप्रदम् |

(ज) (I) 'अ' वाक्यांशस्य मेलनं 'आ' वाक्यांशेन सह कुरुत-

| 'अ' वाक्यांशः | 'आ' वाक्यांशः |
|---|---|
| 1. स्वायत्तमेकान्तगुणं विधात्रा | (क) विद्यावतां वस्तुत एव रूपम्। |
| 2. रूपं प्रसिद्धं न बुधास्तदाहुः | (ख) क्रमेलकः कण्टकजालमेव। |
| 3. न दुर्जनः सज्जनतामुपैति | (ग) विनिर्मितं छादनमज्ञतायाः। |
| 4. निरीक्षते केलिवनं प्रविश्य | (घ) शठः सहस्रैरपि शिक्ष्यमाणः। |

(II) 'अ' वाक्यांशस्य मेलनं 'आ' वाक्यांशेन सह कुरुत-

| 'अ' वाक्यांशः | 'आ' वाक्यांशः |
|---|---|
| 1. चिरं निमग्नोऽपि सुधासमुद्रे | (क) लक्ष्मीः स्वयं याति निवासहेतोः। |
| 2. शूरं कृतज्ञं दृढ़सौहदञ्च | (ख) न मन्दरो मार्दवमभ्युपैति। |
| 3. दीर्घप्रयासेन कृतं हि वस्तु | (ग) भोजनान्ते विषावहम्। |
| 4. भोजने चामृतं वारि | (घ) निमेषमात्रेण भजेद् विनाशम्। |

(III) 'अ' वाक्यांशस्य मेलन 'आ' वाक्याशेन सह कुरुत-

| 'अ' वाक्यांशः | 'आ' वाक्यांशः |
|---|---|
| 1. कर्तु कुलालस्य तु वर्षमेकम् | (क) बली बलं वेति व वेति निर्बलः। |
| 2. सर्वस्य लोचनं शास्त्रम् | (ख) भेत्तुं हि दण्डस्य मुहूर्तमात्रम्। |
| 3. गुणी गुणं वेत्ति न वेति निर्गुण | (ग) यथा चन्द्रेण शर्वरी। |
| 4. आह्लादितं कुलं सर्वम् | (घ) यस्य नास्त्यन्ध एव सः। |

(त) अधोलिखितवाक्येषु रेखांकितानां पदानां प्रसंगानुसार शुद्धम् अर्थं लिखित-

1. स्वायत्तमेकान्तगुणं <u>विधात्रा</u>।
2. रूपं प्रसिद्धं न <u>बुधा</u>स्तदाहुः
3. निरीक्षते केलिवनं प्रविश्य <u>क्रमेलक</u>ः कण्टकजालमेव।
4. कर्माण्यारभमाणं हि पुरूषं <u>श्री</u>निषेवते।
5. आह्लादित कुलं सर्व यथा चन्द्रेण <u>शर्वरी</u>।

## उत्तराणि

**(क) (1) एकपदेन उत्तरत–**

(क) मौनम्

(ख) विधात्रा

**(2) पूर्णवाक्येन उत्तरत–**

(क) सर्वविदां समाजे मौनं अपण्डितानां विभूषणम्।

**(3) भाषिककार्यम्–**

(क) अपण्डितानाम्

(ख) विनिर्मितम्

**(ख) (1) एकपदेन उत्तरत–**

(क) विद्यावताम्

(ख) बुधाः

**(2) पूर्णवाक्येन उत्तरत–**

(क) बुधाः रूपवताम् अपेक्षया विद्यामानं लभन्ते।

**(3) भाषिककार्यम्–**

(क) बुधाः

(ख) जगत्याम्

**(ग) (1) एकपदेन उत्तरत–**

(क) सज्जनताम्

**(2) पूर्णवाक्येन उत्तरत–**

(क) मन्दरः सुधा-समुद्रे निमग्नोऽपि मार्दवम् न अभ्युपैति।

**(3) भाषिककार्यम्–**

(क) मन्दरः

(ख) सज्जनता

**( घ ) ( 1 ) एकपदेन उत्तरत–**

( क ) दोषेषु

( ख ) कर्णामृतम्

**( 2 ) पूर्णवाक्येन उत्तरत–**

( क ) क्रमेलक: केलिवनं प्रविश्य कण्टकजालमेव निरीक्षते।

**( 3 ) भाषिककार्यम्–**

( क ) खलानाम्

( ख ) क्रमेलक:

**( ङ ) ( 1 ) एकपदेन उत्तरत–**

( क ) लक्ष्मी:

**( 2 ) पूर्णवाक्येन उत्तरत–**

( क ) लक्ष्मी: शूरं कृतज्ञं दृढ़सौहृदञ्च जनं प्रति स्वयं याति।

**( 3 ) भाषिककार्यम्–**

( क ) लक्ष्मी:

( ख ) दृढ़सौहृदञ्च

**( च ) ( 1 ) एकपदेन उत्तरत–**

( क ) वस्तु

**( 2 ) पूर्णवाक्येन उत्तरत–**

( क ) कुलालेन कृतं कुम्भादिं भेत्तुं दण्डस्य मुहूर्तमात्रम् अलम्।

**( 3 ) भाषिककार्यम्–**

( क ) दीर्घ प्रयासेन

( ख ) भजेत्

**( छ ) ( 1 ) एकपदेन उत्तरत–**

( क ) कर्माण्यारभमाणम्

**(2) पूर्णवाक्येन उत्तरत–**

(क) श्रीः कर्माण्यारभमाणं पुरुषं निषेवते।

**(3) भाषिककार्यम्–**

(क) श्रीः

(ख) पुरुषम्

**(ज) (1) एकपदेन उत्तरत–**

(क) शर्वरी (ख) सुपुत्रेण

**(2) पूर्णवाक्येन उत्तरत–**

(क) विधायुक्तेन सुपुत्रेण कुलम् आह्लादितं भवति।

**(3) भाषिककार्यम्–**

(क) सुपुत्रेण (ख) शर्वरी

**(झ) (1) एकपदेन उत्तरत–**

(क) गुणम् (ख) पिकः

**(2) पूर्णवाक्येन उत्तरत–**

(क) सिंहस्य बलं मूषकः न जानाति।

(ख) निर्बलः बलं न वेत्ति।

**(3) भाषिककार्यम्–**

(क) बली (ख) करी

**(ञ) (1) एकपदेन उत्तरत–**

(क) वारि (ख) वारि

**(2) पूर्णवाक्येन उत्तरत–**

(क) वारि भोजने अमृतं भवति।

(ख) वारि भोजनान्ते विषावहं भवति।

**( 3 ) भाषिककार्यम्–**

(क) अजीर्णे

(ख) वारि

**( ट ) ( 1 ) एकपदेन उत्तरत–**

(क) लोचनम्  (ख) अन्धः

**( 2 ) पूर्णवाक्येन उत्तरत–**

(क) अत्र अनेकसंशयोच्छेदि, परोक्षार्थस्य दर्शकम्, सर्वस्य लोचनम् शास्त्रस्य एते गुणाः कथिताः।

**( 3 ) भाषिककार्यम्–**

(क) लोचनम्  (ख) परोक्षम्

**( ठ ) ( 1 ) एकपदेन उत्तरत–**

(क) अल्पज्ञः पुरुषः  (ख) कांस्यम्

**( 2 ) पूर्णवाक्येन उत्तरत–**

(क) पाण्डित्यसम्भृतमतिः मितप्रभाषी भवति।

(ख) सुवर्णं कांस्यम्वत् नादं न करोति।

**( 3 ) भाषिककार्यम्–**

(क) सुवर्णम्

(ख) कांस्याय

**( ड ) श्लोकानाम् अन्वयस्य रिक्तस्थानपूर्तिः**

1. (1) एकान्तगुणम्  (2) अज्ञतायाः
   (3) सर्वविदाम्  (4) विभूषणम्
2. (1) अपि  (2) उपैति
   (3) सुधासमुद्रे  (4) मार्दवम्
3. (1) उत्साहसम्पन्नम्  (2) क्रियाविधिज्ञम्
   (3) शूरम्  (4) निवासहेतोः

4. (1) श्रान्तः (2) कर्माणि

(3) श्रीः (4) आरभमाणम्

5. (1) परोक्षार्थस्य (2) सर्वस्य

(3) शास्त्रम् (4) अन्धः

**(ढ) भावार्थानाम् रिक्तस्थानपूर्तिः**

1. (1) निर्मितम् (2) विनाशम्

(3) कुम्भकारेण (4) प्रहारेण

2. (1) चन्द्रेण (2) सुशोभिता

(3) विद्यायुक्तेन (4) सर्वः

3. (1) गुणान् (2) पिकः

(3) नरः (4) सिंहस्य

4. (1) जलम् (2) बलप्रदम्

(3) मध्ये (4) अन्ते

**(ज) (I) वाक्यांशमेलनम्**

1. (ग) 2. (क) 3. (घ) 4. (ख)

**(II) वाक्यांशमेलनम्**

1. (ख) 2. (क) 3. (घ) 4. (ग)

**(III) वाक्यांशमेलनम्**

1. (ख) 2. (घ) 3. (क) 4. (ग)

**(त) पदानां शुदधार्थ लेखनम्-**

1. ईश्वरेण। 2. विद्वांसः।

3. उष्ट्रः। 4. लक्ष्मीः।

5. रात्रिः।

# पाठ–7 नैकेनापि समं गता वसुमती






(क) पुरा धाराराज्ये सिन्धुल-संज्ञो राजा चिरं प्रजाः पर्यपालयत्। तस्य वार्धक्ये भोज इति पुत्रः समजनि। सः यदा पञ्चवार्षिकस्तदा पिता ह्यात्मनो जरां ज्ञात्वा मुख्यामात्यानाहूयानुजं मुञ्जं महाबलमालोक्य पुत्रं वा बालं संवीक्ष्य विचारयामास-यद्यहं राज्यलक्ष्मीभारधारणसमर्थं सहोदरमपहाय राज्यं पुत्राय प्रयच्छामि, तदा लोकापवादः। अथ वा बालं मे पुत्रं मुञ्जो राज्यलोभाद्विषादिना मारयिष्यति तदा दत्तमपि राज्यं वृथा। पुत्रहानिर्वंशोच्छेदश्च इति विचार्य राज्यं मुञ्जाय दत्त्वा तदुत्सङ्गे भोजमात्मानं मुमोच।

ततः क्रमाद् राजनि दिवंगते संप्राप्तराज्य-संपत्तिर्मुञ्जो मुख्यामात्यं बुद्धिसागरनामानं व्यापारमुद्रया दूरीकृत्य तत्पदेऽन्यं नियोजयामास। अथ कदाचन सभायां ज्योतिः-शास्त्रपारंगतः कश्चन ब्राह्मणः समागम्य राजानम् आह-देव! लोकाः मां सर्वज्ञं कथयन्ति। तत्किमपि यथेच्छं पृच्छ।

1. **एकपदेन उत्तरत–**

   (क) राज्ञः नाम किम् आसीत्?

   (ख) सभायाम् आगतः ब्राह्मणः कस्मिन् शास्त्रे पारंगत आसीत्?

2. **पूर्णवाक्येन उत्तरत–**

   (क) राजा किं विचार्य राज्यं मुञ्जाय दत्तवान्?

   (ख) लोकाः कं सर्वज्ञं कथयन्ति?

3. **भाषिककार्यम्–**

   (क) ''नृपे'' इत्यस्य पदस्य किं पर्यायपदम्?

   (ख) ''तस्य'' इति सर्वनामपदं कस्मै प्रयुक्तम्?

   (ग) ''शास्त्रपारंगतः ब्राह्मणः'' अनयोः पदयोः विशेषणपदं किम्?

**(ख)** ततो मुञ्जः प्राह-भोजस्य जन्मपत्रिकां विधेहि इति। विप्रः जन्मपत्रिकां विधाय उक्तवान्-

**पञ्चाशत्पञ्चवर्षाणि सप्तमासदिनत्रयम्।**

**भोजराजेन भोक्तव्यः सगौडो दक्षिणापथः॥**

भोजविषयिणीम् इमां भविष्यवाणीं निशम्य मुञ्जो विच्छावदनोऽभूत्। ततो राजा ब्राह्मणं संप्रेष्य निशीथे शयनमासाद्य व्यचिन्तयत्-यदि राजलक्ष्मीर्भोजकुमारं गमिष्यति, तदाहं जीवन्नपि मृतः। ततश्च अभुक्त एव सः एकाकी किमपि चिन्तयित्वा बंगदेशाधीश्वरं वत्सराजं समाकारितवान् वत्सराजश्च धारानगरीं सम्प्राप्य राजानं प्रणिपत्योपविष्टः।

राजा च सौधं निर्जनं विधाय वत्सराजं प्राह-त्वया भोजो भुवनेश्वरी-विपिने रात्रौ हन्तव्यः, छिन्नं च तस्य शिरः मत्पार्श्वे अन्तःपुरम् आनेतव्यम्। एतन्निशम्य वत्सराजः उत्थाय नृपं नत्वा प्रावोचत्-यद्यपि देवादेशः प्रमाणम्, पुनरपि किंचिद् वक्तुकामोऽस्मि, सापराधमपि मे वचः क्षन्तव्यम्। देव! पुत्रवधो न कदापि हिताय भवतीति।

1. **एकपदेन उत्तरत–**

   (क) विप्रः कस्य जन्मपत्रिकां अरचयत्?

   (ख) केन सगौडो दक्षिणापथः भोक्तव्यः भवेत्?

   (ग) कस्य वधः न कदापि हिताय भवति

2. **पूर्णवाक्येन उत्तरत–**

   (क) राजा निशीथे शयनमासाद्य किम् अचिन्तयत्?

   (ख) वत्सराजः कस्य देशस्य राजा आसीत्?

3. **भाषिककार्यम्–**

   (क) "मुञ्जः विच्छायवदनः" अनयोः पदयोः विशेष्यपदं किम्?

   (ख) ''रात्रौ'' इत्यस्य पदस्य पर्यायपदं किम्?

   (ग) ''सः'' इति सर्वनामपदं कस्मै प्रयुक्तम्?

**(ग)** वत्सराजस्य इदं वचनाकर्ण्य कुपितो राजा प्राह-त्वं मम सेवकोऽसि, मया यत्कथ्यते त्वया तद् विधेयम्। पुनः वत्सराजः राजाज्ञा पालीनयैवेति मत्वा तूष्णीं बभूव। अनन्तरम् अनिच्छन्नपि वत्सराजः भोजं रथे निवेश्य रात्रौ वनं नीतवान्। तत्र आत्मनो वधयोजनां ज्ञात्वा भोजः किमपि वत्सराजं कथितवान्। तद्वचनैःवैराग्यमापन्नो वत्सराजः तं न हतवान्, अपितु गृहमागत्य भोजं गृहाभ्यन्तरे भूमौ निक्षिप्य ररक्ष। पुनः कृत्रिमरूपेण भोजस्य मस्तकं कारयित्वा राजभवनं गत्वा वत्सराजो राजानं प्राह-श्रीमता यदादिष्टं तत्साधितमिति। ततो राजा भोजवधं ज्ञात्वा तं पृष्टवान्-वत्सराज! खड्गप्रहारसमये तेन किमुक्तम्?

वत्सराजेन च राज्ञे भोजस्य अन्तिमसन्देशरूपेण तत्प्रदत्त: श्लोक: समर्पित:–

**मान्धाता च महीपति: कृतयुगालंकारभूतो गत:।**

**सेतुर्येन महोदधौ विरचित: क्वासौ दशास्यान्तक:।**

**अन्ये वापि युधिष्ठिरप्रभृतयो याता दिवं भूपते!**

**नैकेनापि समं गता वसुमती नूनं त्वया यास्यति।।**

1. **एकपदेन उत्तरत–**

   (क) वत्सराज: भोजं रथे निवेश्य कुत्र नीतवान्?

   (ख) वत्सराज: कं न हतवान्?

2. **पूर्णवाक्येन उत्तरत–**

   (क) वत्सराजस्य वचनमाकर्ण्य कुपित: राजा किं प्राह?

   (ख) वत्सराज: भोजं कुत्र निक्षिप्य ररक्ष?

3. **भाषिककार्यम्–**

   (क) ''कुपित: राजा'' अनयो: पदयो: विशेषणपदं किम्?

   (ग) ''त्वं मम सेवकोऽसि'' अत्र ''त्वम्'' इति सर्वनामपदं कस्मै प्रयुक्तम्?

   (ग) ''वसुमती नूनं त्वया समं यास्यति'' अत्र क्रियापदं किम्?

**(घ)** शोकसन्तप्तो मुञ्ज: प्रायश्चित्तं कर्तुं आत्मनो वह्नौ प्रवेशनं निश्चितवान्। राज्ञ: वह्निप्रवेशकार्यक्रमं श्रुत्वा वत्सराज: बुद्धिसागरं नत्वा शनै:-शनै: प्राह-तात! मया भोजराजो रक्षित एवास्ति। पुन: बुद्धिसागरेण तस्य कर्णे किमपि कथितम्, यन्निशम्य वत्सराज: ततो निष्क्रान्त:। पुन: राज्ञो वह्निप्रवेशकाले कश्चन कापालिक: सभां समागत:।

सभामागतं कापालिकं दण्डवत् प्रणम्य मुञ्ज: प्रावोचद्–हे योगीन्द्र! महापापिना मया हतस्य पुत्रस्य प्राणदानेन मां रक्षेति। अथ कापालिकस्तं प्रावोचद्-राजन्! मा भैषी:। शिवप्रसादेन स जीवितो भविष्यति। तदा श्मशानभूमौ कापालिकस्य योजनानुसारं भोज: तत्र समानीत:। 'योगिना भोजो जीवित:' इति कथा लोकेषु प्रसृता। पुन: गजेन्द्रारूढो

भोजो राजभवनमगात्। संतुष्टो राजा मुञ्जः भोजं निजसिंहासने निवेश्य निजपट्टराज्ञीभिश्च सह तपोवनभूमिं गत्वा परं तपस्तेपे। भोजश्चापि चिरं प्रजाः पालितवान्।

1. **एकपदेन उत्तरत–**

(क) कः प्रायश्चित्तं कर्त्तुं निश्चितवान्?

(ख) गजेन्द्रारूढः कः राजभवनमगात्?

2. **पूर्णवाक्येन उत्तरत–**

(क) राज्ञः वह्निप्रवेशकाले कः सभाम् आगतवान्?

(ख) का कथा लोकेषु प्रसृता?

3. **भाषिककार्यम्–**

(क) "मया" इति सर्वनामपदं कस्मै प्रयुक्तम्?

(ख) "संतुष्टः राजा" अनयोः पदयोः विशेष्यपदं किम्?

(ग) "अगात्" अस्य क्रियापदस्य कर्तृपदं किम्?

**(ङ) अधोलिखितवाक्येषु रेखांकितानां पदानां प्रसंगानुसार शुद्धम् अर्थं लिखत-**

1. तस्य <u>वार्धक्ये</u> भोज इति पुत्रः समजनि।
2. राज्यं मुञ्जाय दत्वा <u>तद्उत्सङ्गे</u> भोजं मुमोच।
3. विप्रः जन्मपत्रिकां <u>विधाय</u> उक्तवान्
4. नैकेनापि समं गता <u>वसुमती</u> नूनं त्वया यास्यति।
5. ज्योति <u>शास्त्रपारङ्गतः</u> कश्चन ब्राह्मणः।

**(क) 1. एकपदेन उत्तरत–**

(क) सिन्धुलः

(ख) ज्योतिः शास्त्रे

**2. पूर्णवाक्येन उत्तरत–**

(क) पुत्रहानिर्वंशोच्छेदश्च इति विचार्य राजा राज्यं मुञ्जाय दत्तवान्।

(ख) लोकाः ज्योतिः - शास्त्रपारंगतं ब्राह्मणं सर्वज्ञं कथयन्ति।

3. **भाषिककार्यम्–**

(क) राजनि (ख) सिन्धुल-संज्ञाय राज्ञे

(ग) शास्त्रपारंगतः

**(ख) 1. एकपदेन उत्तरत–**

(क) भोजस्य (ख) भोजेन (ग) पुत्रस्य

**2. पूर्णवाक्येन उत्तरत–**

(क) राजा निशीथे शयनमासाद्य अचिन्तयत्–यदि राजलक्ष्मीः भोजकुमाारं गमिष्यति, तदाहं जीवन्नपि मृतः।

(ख) वत्सराजः बंगदेशस्य राजा आसीत्।

3. **भाषिककार्यम्–**

(क) मुञ्जः (ख) निशीथे (ग) मुञ्जाय

**(ग) 1. एकपदेन उत्तरत–**

(क) वनम् (ख) भोजम्

**2. पूर्णवाक्येन उत्तरत–**

(क) वत्सराजस्य वचनमाकर्ण्य कुपितः राजा प्राह-त्वं मम सेवकोऽसि, मया यत्कथ्यते त्वया तद् विधेयम्।

(ख) वत्सराजः भोजं गृहाभ्यन्तरे भूमौ निक्षिप्य ररक्ष।

3. **भाषिककार्यम्–**

(क) कुपितः (ख) वत्सराजाय

(ग) यास्यति

**(घ) 1. एकपदेन उत्तरत–**

(क) मुञ्जः (ख) भोजः

**2. पूर्णवाक्येन उत्तरत–**

(क) राज्ञ: वह्निप्रवेशकाले कश्चन कापालिक: सभाम् आगतवान्।

(ख) "योगिना भोज: जीवित:" इति कथा लोकेषु प्रसृता।

**3. भाषिककार्यम्–**

(क) वत्सराजाय (ख) राजा (ग) भोज:

**(ङ) पदानां शुदधार्थलेखनम्-**

1. वृद्ध-अवस्थायाम् 2. अंके

3. रचयित्वा। 4. पृथ्वी

5. निपुण:।

# पाठ—9 मदालसा



**( क ) ( ततः प्रविशति प्रकृतिसौन्दर्यमवलोकयन् महाराजस्य शत्रुजितः पुत्रः ऋतध्वजः )**

**ऋतध्वजः –** अहो शोभनं गन्धर्वराजविश्वावसोः राजोद्यानम्। आम्रमञ्जरीणां परां शोभां दृष्ट्वा कोकिलानां च मधुरवचांसि श्रुत्वा कस्य यूनो हृदयं सहसा उत्कण्ठितं न भविष्यति? वामपार्श्वे रमणीनामालाप इव श्रूयते। अत्रैव स्थित्वा श्रोष्यामि।

**कुण्डला –** सखि मदालसे! त्वं तु केवलं विद्याध्ययने एव रता कियन्तं कालं यावत् ब्रह्मचर्यव्रतं धारयिष्यसि?

**मदालसा –** ज्ञानोदधिस्तु अनन्तपारो गभीरश्च। मया सागरतटे स्थित्वा कतिपयबिन्दव एव प्राप्ता अद्यावधि।

**कुण्डला** – विनयशीले! विद्या ददाति विनयम् अत एव एवं भणसि। कुलगुरुतुम्बुरुमहाभागैस्तु गन्धर्वराजाय अन्यदेव सूचितम्।

**मदालसा** – किं श्रुतं त्वया यद् गुरुवर्यैः माम् अधिकृत्य पित्रे कथितम्?

**कुण्डला** – अथ किम्। राजकुमारी मदालसा सर्वविद्यानिष्णाता जाता परं तया स्वयं वरः न प्राप्तः। अतः तस्यै योग्यवरस्य अन्वेषणं कार्यम् इत्यासीद् गुरुपादानां मतम्।

**1. एकपदेन उत्तरत-**

(i) कस्य उद्यानं शोभनम् अस्ति?

(ii) विद्या किं ददाति?

(iii) मदालसायाः सख्युः नाम किम्?

(iv) कासां मधुरवचांसि भवन्ति?

(v) मदालसा कस्मिन् कार्ये रता आसीत्?

**2. पूर्णवाक्येन उत्तरत-**

(i) यूनः हृदयं किं दृष्ट्वा श्रुत्वा च उत्कण्ठितं भवति?

(ii) ज्ञानोदधिः कीदृशः भवति?

(iii) गुरुवर्यैः पित्रे मदालसाम् अधिकृत्य किं कथितम्?

**3. भाषिककार्यम्-**

(i) 'परां शोभाम्' अनयोः पदयोः विशेष्यपदं किम्?

(ii) 'विद्या ददाति विनयम्' अत्र क्रियापदं किम्?

(iii) 'युवकस्य' इति पदस्य पर्यायपदं नाट्यांशे किं प्रयुक्तम्?

**(ख) मदालसा** – (हसित्वा) नहि जानन्ति ते यदहं तु विवाहबन्धनं तु स्वीकर्तुं न इच्छामि।

**कुण्डला** – किं करिष्यसि तदा?

**मदालसा** – ब्रह्मवादिनी भविष्यामि। आचार्येति पदं प्राप्य शिष्येभ्य: जीवनकलां शिक्षयिष्यामि।

**कुण्डला** – जाने तेऽभिरुचिम् अध्ययने अध्यापने च। परं यथा लतेयं सहकारमवलम्बते तथैव नारी जीवनयात्रायां कमपि सहचरम् अपेक्षते य: तस्या: अवलम्बनं स्यात्।

**मदालसा** – नास्ति मत्कृते आवश्यकता अवलम्बनस्य। स्वयं समर्था जीवनपथे चलितुमहं न कस्यापि संकेतै: नर्तितुं पारयामि।

**कुण्डला** – नर्तिष्यसि तदा एकाकिनी एव?

**मदालसा** – (विहस्य) यदि त्वं शीघ्रमेव पतिगृहं गमिष्यसि तदा एकाकिनी भविष्यामि। परम् एक: उपाय: अपि चिन्तित: मया।

**कुण्डला** – क: उपाय:?

**मदालसा** – संगीतसाहित्यमाध्यमेन ब्रह्मविद्यां सरसां विधाय बहुभ्य: शिशुभ्य: शिक्षणं प्रदास्यामि।

**1. एकपदेन उत्तरत–**

(i) मदालसा कस्य बन्धनं स्वीकर्तुं न इच्छति?

(ii) मदालसा केभ्य: जीवनकलां शिक्षयिष्यति?

(iii) अध्ययने अध्यापने कस्या: अभिरुचि: अस्ति?

**2. पूर्णवाक्येन उत्तरत–**

(i) एकाकिन्या मदालसया क: उपाय: चिन्तित:?

(ii) नारी जीवनयात्रायां कम् अपेक्षते?

**3. भाषिककार्यम्-**

(i) 'एक: उपाय:' अनयो: विशेषणपदं किम्?

(ii) 'अहं तु विवाहबन्धनं स्वीकर्तुं न इच्छामि' अत्र 'अहं' इति पदं कस्यै प्रयुक्तम्?

(iii) 'त्वं शीघ्रमेव पतिगृहं गमिष्यसि' अत्र क्रियापदं किम्?

**(ग) कुण्डला** – गृहस्थाश्रमं प्रविश्य स्वशिशूनां चरित्रनिर्माणं मातुरधीनम्। तत्र का विचारणा?

**मदालसा** – यथाहं पश्यामि पुरुष: भार्यायां स्वाधिपत्यं स्थापयति। द्रौपदीं स्वीयां सम्पत्तिं मन्यमान: युधिष्ठिर: तां द्यूते हारितवान् यथा सा निर्जीवं वस्तु आसीत्।

**कुण्डला** – निर्जीवा तु नासीत् परं युधिष्ठिरस्य एषा एव चिन्तनसरणि: आसीत् इति प्रतीयते।

**मदालसा** – हरिश्चन्द्र: स्वपत्नीं शैव्यां पुत्रं रोहितं च जनसंङ्कुले आपणे विक्रीतवान्। नास्ति मे मनोरथ: ईदृशं पत्नीपदमङ्गीकर्तुम्।

**कुण्डला** – कटुसत्यं खल्वेतत्। परं सखि! अस्मिन् संसारे विभिन्नप्रकृतिका: पुरुषा: वसन्ति। स्वप्रकृत्यनुकूल: वर: अपि प्राप्यते। त्वं तु नवनवोन्मेषशालिन्या प्रतिभया विहितै: नूतनै: प्रयोगै: अस्मान् सर्वान् विस्मापयसि। गृहस्थाश्रमोऽपि एका प्रयोगशाला यस्यां त्वं स्वज्ञानविज्ञानयो: प्रयोगं कर्तुं शक्ष्यसि।

**1. एकपदेन उत्तरत–**

(i) युधिष्ठिर: कां द्यूते हारितवान्?

(ii) पुरुष: कस्यां स्वाधिपत्यं स्थापयति?

(iii) हरिश्चन्द्रस्य पुत्रस्य नाम किम्?

(iv) क: एका प्रयोगशाला अस्ति?

**2. पूर्णवाक्येन उत्तरत–**

(i) अस्मिन् संसारे कीदृशा: पुरुषा: वसन्ति?

(ii) मदालसा कथं सर्वान् विस्मापयति?

**3. भाषिककार्यम्-**

(i) 'निर्जीवं वस्तु' अनयो: पदयो: विशेष्यपदं किम्?

(ii) 'नास्ति मे मनोरथ:' इत्यत्र कर्तृपदं किम्?

(iii) 'युधिष्ठिर: तां द्यूते हारितवान्' इति वाक्ये 'ताम्' इति सर्वनामपदं कस्यै प्रयुक्तम्?

**(घ) मदालसा** – कुण्डले! दुर्लभो जन: ईदृश: य: गृहस्थप्रयोगशालायां स्वपत्न्यै स्वतन्त्रतां दद्यात्।

**ऋतध्वज:** – (स्वगतम्) अवसरोऽयमात्मानं प्रकाशयितुम्। (प्रकाशम्) उपस्थितोऽहं शत्रुजित: पुत्र: ऋतध्वज:। आज्ञा चेत् अहमपि अस्यां परिचर्चायां सम्मिलितो भवेयम्।

**कुण्डला** – स्वागतम् अतिथये। अपि श्रुता: भवद्‌भि: मम सखीविचारा:?

**ऋतध्वज:** – आम्। अत एव प्रष्टुमुत्सहे किं गन्धर्वराजविश्वासु-महाभागा: अपि स्वपत्नीं युधिष्ठिर इव हारितवन्त:। हरिश्चन्द्र इव विक्रीतवन्त:?

**कुण्डला** – मदालसे तूष्णीं किमर्थं तिष्ठसि? देहि प्रत्युत्तरम्।

**ऋतध्वज:** – एकस्य अपराधेन सर्वा जाति: दण्ड्या इति विचित्रो न्याय: तव सख्या:।

**मदालसा** – अत्रभवन्त: नारीस्वाधीनतामधिकृत्य किं कथयन्ति?

**ऋतध्वज:** – माता एव प्रथमा आचार्या इत्यस्ति मे अवधारणा। नारी एव समस्तसृष्टे: निर्मात्री। परं कथनेन किम्? परीक्ष्य एव ज्ञास्यति अत्रभवती। परीक्षार्थमुद्यतोऽस्मि गृहस्थाश्रमप्रयोगशालायाम्।

**मदालसा** – स्वीकृत: प्रस्ताव:।

**कुण्डला** – दिष्ट्या वर्धेथां युवाम्। मित्रवर, गन्धर्वकन्या मदालसा गान्धर्वविवाहविधिना वृणोति अत्रभवन्तम्। आकारये अहं कुलगुरुं तुम्बुरुम्। असौ अग्निं साक्षीकृत्य आशीर्वचांसि वक्ष्यति।

**ऋतध्वज:** – प्रथमं तु सखीवचनं श्रोष्याव:। तदनु स्वयमेव कुलगुरुं पितरौ च सभाजयितुं गमिष्याव:।

**1. एकपदेन उत्तरत–**

(i) का प्रथमा आचार्या अस्ति?

(ii) नारी समस्तसृष्टे: का अस्ति?

(iii) कुलगुरु: कं साक्षीकृत्य आशीर्वचांसि वक्ष्यति?

(iv) ऋतध्वजस्य पितु: नाम किम्?

**2. पूर्णवाक्येन उत्तरत–**

(i) कीदृश: जन: दुर्लभोऽस्ति?

(ii) ऋतध्वज: किं प्रष्टुम् उत्सहते?

(iii) मदालसाया: विचित्र: न्याय: क:?

**3. भाषिककार्यम्-**

(i) 'स्वीकृत: प्रस्ताव:' इत्यत्र क्रियापदं किम्?

(ii) 'आकारये अहं कुलगुरुं तुम्बुरुम्' अत्र अहम्' इति सर्वनामपदं कस्यै प्रयुक्तम्?

(iii) ''जन: ईदृश:' अनयो: पदयो: विशेषणपदं किम्?

(iv) 'स्त्री' इत्यस्य पर्यायपदं नाट्यांशात् चित्वा लिखत।

**(ङ) कुण्डला** – परस्परप्रीतिमतो: भवतो: उपदेशस्य नास्ति कोऽपि अवकाश: तदापि सखीस्नेह: मां भाषयति-भर्त्रा सदैव भार्या भर्तव्या रक्षितव्या च। यतोहि धर्मार्थकामसंसिद्धये यथा भार्या भर्तु: सहायिनी भवति तथा न कोऽपि अन्य:। परस्परमनुव्रतौ पतिपत्न्यौ त्रिवर्गं साधयत:। पति: यदि प्रभूतं धनम् अर्जयित्वा गृहमानयति तत् खलु पत्न्यभावे कुपात्रेषु दीयमानं क्षयमेति।

**ऋतध्वज:** – लक्ष्म्या: रक्षार्थं पत्न्या: सहयोग: अनिवार्य:।

**मदालसा** – कुण्डले! लक्ष्मीपूजायां न मे प्रवृत्ति:। यदि लक्ष्मी: पूज्या प्रिया च अतिथिवर्यस्य, तदा इदानीमेव मे नमस्कार:।

**ऋतध्वज:** – स्वाभिमानिनि प्रिये! समक्षं ते कथं कापि सपत्नी स्थातुं शक्नोति? लक्ष्मीस्तु तव दासी भविष्यति नैव सपत्नी। गार्हस्थ्यं तु त्वदधीनं भविष्यति। आत्मानं भाविसन्ततिं च ज्ञानविज्ञानानुसन्धात्र्या हस्ते समर्पयितुमीहे। आगम्यताम् गुरुभ्य: पितृभ्यां च समाचारं श्रावयाव:।

**1. एकपदेन उत्तरत–**

(i) लक्ष्म्या: रक्षार्थं कस्य सहयोग: अनिवार्य:?

(ii) केन भार्या भर्तव्या रक्षितव्या च?

(iii) परस्परप्रीतिमतो: भवतो: कस्य अवकाश: अस्ति?

**2. पूर्णवाक्येन उत्तरत–**

(i) मदालसाया: कस्यां प्रवृत्ति: नास्ति?

(ii) केषां सिद्धये भार्या भर्तु: सहायिनी भवति?

**3. भाषिककार्यम्-**

(i) 'भर्ता' इत्यस्य किं पर्यायपदं नाट्यांशे प्रयुक्तम्?

(ii) 'कुपात्रेषु दीयमानं क्षयमेति' इत्यत्र क्रियापदं किम्?

(iii) 'प्रभूतं धनम्' इत्यनयो: पदयो: विशेष्यपदं किम्?

**(च) अधोलिखितवाक्येषु रेखांकितानां पदानां प्रसंगानुसारं शुद्धम् अर्थं लिखत-**

1. कस्य यूनो हृदयं सहसा उत्कण्ठितं न भवति।
2. रमणीनाम् आलाप इव श्रूयते।
3. मदालसे तूष्णीं किमर्थं तिष्ठसि।
4. माता एवं प्रथमा आचार्या इत्यस्ति मे अवधारणा।
5. दिष्ट्या वर्धेथां युवाम्।

| **मञ्जूषाः**–, मौनम्, भाग्येन, युवकस्य, वार्तालापः, विचारः |
|---|

## उत्तराणि

(क) **1. एकपदेन उत्तरत-**

(i) विश्वावसोः

(ii) विनयम्

(iii) कुण्डला

(iv) कोकिलानां

(v) विद्याध्ययने

**2. पूर्णवाक्येन उत्तरत-**

(i) आम्रमञ्जरीणां परां शोभां दृष्ट्वा कोकिलानां च मधुरवचांसि श्रुत्वा यूनः हृदयम् उत्कण्ठितं भवति।

(ii) ज्ञानोदधिः तु अनन्तपारो गभीरः च भवति।

(iii) गुरुवर्यैः पित्रे मदालसाम् अधिकृत्य कथितम् यत्-राजकुमारी मदालसा सर्वविद्यानिष्णाता जाता परं तया स्वयं वरः न प्राप्तः। अतः तस्यै योग्यवरस्य अन्वेषणं कार्यम् इति।

**3. भाषिककार्यम्–**

(i) शोभाम् (ii) ददाति (iii) यूनः

(ख) **1. एकपदेन उत्तरत-**

(i) विवाहस्य (ii) शिष्येभ्यः (iii) मदालसायाः

**2. पूर्णवाक्येन उत्तरत-**

(i) एकाकिन्या मदालसया उपायः चिन्तितः यत् संगीतसाहित्यमाध्यमेन ब्रह्मविद्यां सरसां विधाय बहुभ्यः शिशुभ्यः शिक्षणं प्रदास्यामि।

(ii) नारी जीवनयात्रायां कमपि सहचरम् अपेक्षते।

**3. भाषिककार्यम्–**

(i) एकः (ii) मदालसायै (iii) गमिष्यसि

(ग) **1. एकपदेन उत्तरत–**

(i) द्रौपदीम् (ii) भार्यायाम् (iii) रोहितः (iv) गृहस्थाश्रमः

**2. पूर्णवाक्येन उत्तरत–**

(i) अस्मिन् संसारे विभिन्नप्रकृतिकाः पुरुषाः वसन्ति।

(ii) मदालसा नवनवोन्मेषशालिन्या प्रतिभया विहितैः नूतनैः प्रयोगैः अस्मान् सर्वान् विस्मापयति।

**3. भाषिककार्यम्–**

(i) वस्तु (ii) मनोरथः (ii) द्रौपदीम्

(घ) **1. एकपदेन उत्तरत-**

(i) माता (ii) निर्मात्री (iii) अग्निम् (iv) शत्रुजितः

**2. पूर्णवाक्येन उत्तरत–**

(i) दुर्लभो जनः ईदृशः यः गृहस्थप्रयोगशालायां स्वपत्न्यै स्वतन्त्रतां दद्यात्।

(ii) ऋतध्वजः प्रष्टुम् उत्सहते यत् किं गन्धर्वराज-विश्वावसुमहाभागाः अपि स्वपत्नीं युधिष्ठिर इव हारितवन्तः हरिश्चन्द्रः इव विक्रीतवन्तः?

(iii) एकस्य अपराधेन सर्वा जातिः दण्ड्या इति विचित्रो न्यायः मदालसायाः।

**3. भाषिककार्यम्–**

(i) स्वीकृतः (ii) कुण्डलायै (ii) ईदृशः (iv) नारी

(ङ) **1. एकपेदन उत्तरत–**

(i) पत्न्याः (ii) भर्त्रा (iii) उपदेशस्य

**2. पूर्णवाक्येन उत्तरत-**

(i) मदालसायाः लक्ष्मीपूजायां प्रवृत्तिः नास्ति।

(ii) धर्मार्थकामसिद्धये भार्या भर्तुः सहायिनी भवति।

**3. भाषिककार्यम्–**

(i) पतिः (ii) एति (ii) धनम्

(च) 1. युवकस्य 2. वार्तालापः 3. मौनम्

4. विचारः 5. भाग्येन

# पाठ–11 कार्याकार्यव्यवस्थितिः



**अधोलिखितानि पद्यानि पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत–**

**(क)** ''अभयं सत्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः।

दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम्।।

अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम्।

दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम्।।

**1. एकपदेन उत्तरत-**

(क) मनुष्यस्य कुत्र व्यवस्थितिः स्यात्?

(ख) कस्य संशुद्धिः महत्त्वपूर्णा?

(ग) केषु दया करणीया?

**2. पूर्णवाक्येन उत्तरत–**

(क) अत्र के गुणा: दैवी-सम्पद्-रूपेण निरूपिता:?

(ख) श्रीकृष्ण: अत्र कं सम्बोधयति?

**3. भाषिककार्यम्-**

(क) 'कोमलत्वम्' इत्यर्थे किं पदं प्रयुक्तम्?

(ख) 'अशान्ति:' इत्यस्य किं विलोमपदमत्र?

(ग) 'करुणा' इत्यस्य किं पर्यायपदमत्र?

(ख) ''दम्भो दर्पोऽभिमानश्च क्रोध: पारुष्यमेव च।
अज्ञानं चाभिजातस्य पार्थ संपदमासुरीम्।।
दैवी संपद् विमोक्षाय निबन्धायासुरी मता।
मा शुच: सम्पदं दैवीमभिजातोऽसि पाण्डव।।''

**1. एकपदेन उत्तरत–**

(क) विमोक्षाय का मता?

(ख) दैवीं सम्पदं क: अभिजात: अस्ति?

(ग) प्रथमे श्लोके कीदृशी सम्पद् व्याख्याता?

**2. पूर्णवाक्येन उत्तरत–**

(क) आसुरी-सम्पद: कानि लक्षणानि अत्र कथितानि?

(ख) निबन्धाय का मता?

**3. भाषिककार्यम्-**

(क) 'आसुरीम्' इति विशेषणपदस्य किं विशेष्यपदमत्र?

(ख) 'प्राप्त:' इत्यर्थे किं पदमत्र प्रयुक्तम्?

(ग) 'माधुर्यम्' इत्यस्य किं विलोमपदमत्र?

(ग) "प्रवृत्तिं च निवृत्तिं च जना न विदुरासुरा:।

न शौचं नापि चाऽऽचारो न सत्यं तेषु विद्यते।।

एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धय:।

प्रभवन्त्युग्रकर्माण: क्षयाय जगतोऽहिता:।।"

**1. एकपदेन उत्तरत–**

(क) आसुरा: जना: कस्य क्षयाय प्रभवन्ति?

(ख) कीदृशा: जना: प्रवृत्तिं निवृत्तिं च न विदु:?

(ग) उग्रकर्माण: के सन्ति?

**2. पूर्णवाक्येन उत्तरत-**

(क) कीदृशा: जना: जगत: क्षयाय प्रभवन्ति?

(ख) आसुरेषु जनेषु किं किं न विद्यते?

**3. भाषिककार्यम्-**

(क) 'दृष्टिम्' इत्यस्य किं विशेषणपदमत्र प्रयुक्तम्?

(ख) 'विनाशाय' इत्यर्थे किं पदमत्र?

(ग) 'न सत्यं तेषु विद्यते' अत्र क्रियापदं किम्।

(घ) "इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथम्।

इदमस्तीदमपि मे भविष्यति पुनर्धनम्।।

असौ मया हत: शत्रु: हनिष्ये चापरानपि।

ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान् सुखी।।

1. **एकपदेन उत्तरत-**

(क) मया कः हतः?

(ख) अहं किं प्राप्स्ये?

(ग) इदं मया कदा लब्धम्?

2. **पूर्णवाक्येन उत्तरत–**

(क) पुनः किं मे भविष्यति?

(ख) आसुरी-सम्पदायुक्तः जनः किं चिन्तयति?

3. **भाषिककार्यम्-**

(क) 'प्राप्तम्' इत्यर्थे किं पदमत्र प्रयुक्तम्?

(ख) 'मित्रम्' इत्यस्य किं विलोमपदमत्र?

(ग) 'भविष्यति' इति क्रियापदस्य कर्तृपदम् किमत्र?

(ङ) "अहंकारं बलं दर्पं क्रोधं मोहं च संश्रिताः।
मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः।।
तानहं द्विषतः क्रूरान्संसारेषु नराधमान्।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु।।"

1. **एकपदेन उत्तरत-**

(क) के प्रद्विषन्तः भवन्ति?

(ख) तान् अहं कीदृशीषु योनिषु क्षिपामि?

2. **पूर्णवाक्येन उत्तरत–**

(क) श्रीकृष्णः नराधमान् कुत्र क्षिपति?

(ख) आत्मपरदेहेषु कीदृशाः जनाः प्रद्विषन्ति?

3. **भाषिककार्यम्-**

(क) 'इच्छाम्' इतिपदस्य किं समानार्थकम् अत्र?

(ख) 'क्षिपामि' इति क्रियापदस्य कर्तृपदं किम्?

(ग) 'नरश्रेष्ठान्' इत्यस्य विलोमपदं चिनुत।

(च) ''आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि।
मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम्।।
त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत्।।''

1. **एकपदेन उत्तरत–**

(क) नरकस्य कतिविधं द्वारमत्र कथितम्?

(ख) मूढाः कीदृशीं योनिम् आपन्नाः भवन्ति?

2. **पूर्णवाक्येन उत्तरत–**

(क) मूढाः अधमां गतिं कथं यान्ति?

(ख) एतत्त्रयं किमर्थं त्यजेत्?

3. **भाषिककार्यम्-**

(क) 'गतिम्' इति पदस्य किं विशेषणपदमत्र?

(ख) 'मूर्खाः' इत्यर्थे कि पदं प्रयुक्तम्?

(ग) 'माम्' इति सर्वनामपदं कस्मै प्रयुक्तम्?

**(छ) अधोलिखितेषु अन्वयेषु रिक्तस्थानानि पूरयत–**

I. आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि।
मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम्।

**अन्वय:**

कौन्तेय! ततः (ते) (i) ............जन्मनि (ii) .......आसुरीं योनिम् आपन्ना

(iii) ...............अप्राप्य एव (iv) .................गतिं यान्ति।

II. असौ मया हतः शत्रुर्हनिष्ये चापरानपि।

ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान् सुखी।।

**अन्वय:**

असौ

(i) .................मया हतः (ii) .....................अपि च (अहम्) हनिष्ये

(iii) ..................भोगी अहम् (iv) ................अहं सिद्धः बलवान् सुखी (चास्मि)।

**(ज) अधोलिखितस्य पद्यस्य भावार्थं मञ्जूषाप्रदत्तपदैः पूरयित्वा पुनः लिखत–**

''प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः।

न शौचं नापि चाऽऽचारो न सत्यं तेषु विद्यते।।

**भावार्थ:–**

श्री कृष्णः कथयति यत् आसुरी-सम्पद्-युक्ताः जनाः कर्तव्याकर्तव्यभेदं न

(i) ........................। एतस्मात् एव आसुराणां जनानां कर्तव्यकर्मणि

(ii) ......................न भवति, तथा च दुष्टकार्येभ्यः

(iii) ................न भवति। एतादृशेषु जनेषु पवित्रता,

(iv) .......................सत्यवचनम् इत्यादि तु किञ्चिदपि न विद्यते।

**मञ्जूषा**

(निवृत्तिः, श्रेष्ठम्-आचरणम्, जानन्ति, प्रवृत्तिः)

**(झ) प्रदत्तभावार्थत्रयात् शुद्धं भावार्थं चित्वा लिखत–**

I. जना न विदुरासुराः।

(क) विदुरः जनः न अस्ति।

(ख) आसुराः मनुष्याः न जानन्ति।

(ग) जनान् आसुरान् विदुः।

II. त्रिविधं नरकस्येदं द्वारम्।

(क) नरकस्य द्वारं त्रिविधं कथितम्।

(ख) द्वारपालस्य नाम त्रिविधम् अस्ति।

(ग) नरकासुरस्य इदं द्वारम् अस्ति।

**(ञ) 'क' स्तम्भस्य वाक्यांशानां 'ख' स्तम्भस्य वाक्यांशैः सह मेलनं कुरुत–**

I.

| 'क' | 'ख' |
|---|---|
| (i) आसुरीं योनिमापन्ना | (i) संसारेषु नराधमान्। |
| (ii) त्रिविधं नरकस्येदं | (ii) मोहजालसमावृताः। |
| (iii) तानहं द्विषतः क्रूरान् | (iii) मूढा जन्मनि जन्मनि। |
| (iv) अनेकचित्तविभ्रान्ता | (iv) द्वारं नाशनमात्मनः। |

II.

| 'क' | 'ख' |
|---|---|
| (i) इदमद्य मया लब्धम् | (i) हनिष्ये चापरानपि। |
| (ii) ईश्वरोऽहमहं भोगी | (ii) इमं प्राप्स्ये मनोरथम्। |
| (iii) असौ मया हतः शत्रुः | (iii) न सत्यं तेषु विद्यते। |
| (iv) न शौचं नापि चाऽऽचारो | (iv) सिद्धोऽहं बलवान् सुखी। |

**(ट) अधोलिखितवाक्येषु रेखांकितानां पदानां प्रसंगानुसारं शुद्धम् अर्थं मञ्जूषायाः चित्वा लिखत-**

1. आसुरीं योनिमापन्ना <u>मूढा</u> जन्मनि जन्मनि।
2. प्रसक्ताः कामभोगेषु पतन्ति नरके <u>अशुचौ</u>।
3. तेजः क्षमा <u>धृतिः</u> शौचमद्रोहो नातिमानिता।
4. दम्भो दर्पोऽभिमानश्च क्रोधः <u>पारुष्यमेव</u> च।
5. मा शुचः संपदं दैवीमभिजातोऽसि <u>पाण्डव</u>।
6. <u>आढ्यः</u> अभिजनवानस्मि।
7. क्षिपामि <u>अजस्रम्</u> अशुभान् आसुरीष्वेव योनिषु।

**मञ्जूषा**-(अपवित्रे, कठोरता, निरन्तरम्, धनिकः, मूर्खाः, धैर्यम्, अर्जुनः)

## उत्तरमाला

**(क)** 1. (क) ज्ञानयोगे (ख) सत्त्वस्य (ग) भूतेषु

2. (क) अत्र अभयं सत्त्वसंशुद्धिः, दानं, दमः, यज्ञः, स्वाध्यायः, तपः, आर्जवम्, अहिंसा, सत्यम्, अक्रोधः, त्यागः, शान्तिः, अपैशुनः, भूतेषु दया, अलोलुप्त्वं, मार्दवं, ह्रीः अचापलं च दैवीसम्पद्रूपेण निरूपिताः।

(ख) श्रीकृष्णः अत्र अर्जुनं सम्बोधयति।

3. (क) मार्दवम् (ख) शान्तिः (ग) दया

(ख) 1. (क) दैवीसम्पद् (ख) पाण्डवः अर्जुनः (ग) आसुरी सम्पद्

2. (क) दम्भः दर्पः अभिमानः, क्रोधः, पारुष्यम् अज्ञानं च आसुरीसम्पदः लक्षणानि कथितानि।

(ख) निबन्धाय आसुरी सम्पद् मता।

3. (क) संपदम् (ख) अभिजातः (ग) पारुष्यम्

(ग) 1. (क) जगतः (ख) आसुराः (ग) आसुराः

2. (क) नष्टात्मानः, अल्पबुद्धयः उग्रकर्माणः च जनाः जगतः क्षयाय प्रभवन्ति।

(ख) शौचम्, आचारः, सत्यं च आसुरेषु जनेषु न विद्यते

3. (क) एताम् (ख) क्षयाय (ग) विद्यते

(घ) 1. (क) शत्रुः (ख) मनोरथम् (ग) अद्य

2. (क) पुनः धनं मे भविष्यति।

(ख) आसुरी सम्पदा-युक्तः जनः चिन्तयति यत् असौ शत्रुः मया हतः, अपरान्, शत्रून् अपि अहं हनिष्ये। अहमेव ईश्वरः, भोगी, सिद्धः, बलवान्, सुखी च अस्मि।

3. (क) लब्धम् (ख) शत्रुः (ग) धनम्

(ङ) 1. (क) अभ्यसूयकाः (ख) आसुरीषु

2. (क) श्रीकृष्णः नराधमान् आसुरीषु योनिषु एव क्षिपति।

(ख) अहंकारं, बलं, दर्पं, कामं क्रोधं च संश्रिताः जनाः आत्मपरदेहेषु द्विषन्ति।

3. (क) कामम्  (ख) अहम्  (ग) नराधमान्

(च) 1. (क) त्रिविधम्  (ख) आसुरीम्

2. (क) मूढाः माम् अप्राप्यैव अधमां गतिं यान्ति।

(ख) कामः, क्रोधः लोभः च त्रिविधं नरकस्य द्वारमस्ति, तस्मात् एतत्त्रयं त्यजेत्।

3. (क) अधमाम्  (ख) मूढाः  (ग) श्रीकृष्णाय

(छ) I (i) मूढाः (ii) जन्मनि (iii) माम् (iv) अधमाम्

II(i) शत्रुः (ii) अपरान् (iii) अहम् (iv) ईश्वरः

(ज) (i) जानन्ति (ii) प्रवृत्तिः (iii) निवृत्तिः (iv) श्रेष्ठम् आचरणम्

(झ) I (ख) आसुराः मनुष्याः न जानन्ति।

II(क) नरकस्य द्वारं त्रिविधं कथितम्।

(ञ) 'क' स्तम्भस्य वाक्यांशानां 'ख' स्तम्भस्य वाक्यांशैः सह मेलनं कुरुत–

I

| (क) | (ख) |
|---|---|
| (i) आसुरीं योनिमापन्ना | (iii) मूढा जन्मनि जन्मनि। |
| (ii) त्रिविधं नरकस्येदं | (iv) द्वारं नाशनमात्मनः। |
| (iii) तानहं द्विषतः क्रूरान् | (i) संसारेषु नराधमान्। |
| (iv) अनेक-चित्तविभ्रान्ता | (ii) मोहजालसमावृताः। |

II

| (क) | (ख) |
|---|---|
| (i) इदमद्य मया लब्धम् | (ii) इमं प्राप्स्ये मनोरथम्। |
| (ii) ईश्वरोऽहं भोगी | (iv) सिद्धोऽहं बलवान् सुखी। |
| (iii) असौ मया हतः शत्रुः | (i) हनिष्ये चापरानपि। |
| (iv) न शौचं नापि चाऽऽचारो | (iii) न सत्यं तेषु विद्यते। |

**(ट)** 1. मूर्खाः  2. अपवित्रे  3. धैर्यम्  4. कठोरता

5. अर्जुनः  6. धनिकः  7. निरन्तरम्

## संस्कृत-साहित्येतिहासपरिचयः

### कुल अंक - 10

प्रश्न - पाठ्यपुस्तके समागतानां कवीनां देश-काल-कृतिसम्बद्धानां प्रश्नानां समुचितम् उत्तरं चिनुत - (केवलं प्रश्नत्रयम्) 1 ×3 =3

**ध्यातव्य बिन्दु**

- इस प्रश्न के समुचित समाधान के लिए पाठ्यपुस्तक में संकलित समस्त कवियों के जीवन-परिचय का सम्यक् अध्ययन करें।
- पाठ का नाम; कृति व कवि का नाम अच्छे से समझकर स्मरण करें।
- पाठ व कवि परिचय के लिए यहाँ दिये गए रेखाचित्र का उपयोग करें।

| क्रम संख्या | कविः | पाठस्य नाम | कृतिः/रचना | देशः/स्थानम् | कालः |
|---|---|---|---|---|---|
| 1. | भासः | मातुराज्ञा गरीयसी | प्रतिमानाटकम् चारुदत्तम् | उज्जयिनी | 300-200 ई. पू. |
| 2. | कालिदासः | प्रजानुरञ्जको नृपः | रघुवंशम् कुमारसम्भवम् अभिज्ञान-शाकुन्तलम् रघुवंशम् | उज्जयिनी | 100 ई.पू. |
| 3. | अम्बिकादत्त-व्यासः | दौवारिकस्य निष्ठा | शिवराज-विजयः | जयपुरम् | 1858-1900ई. |
| 4. | भर्तृहरिः | सूक्तिसौरभम् | नीतिशतकम् | उज्जयिनी | षष्ठी शताब्दी |
| 5. | विल्हणः | सूक्तिसौरभम् | विक्रमाङ्कदेव-चरितम् | काश्मीरः | 11 शताब्द्याः उत्तरार्धः |
| 6. | चाणक्यः | सूक्तिसौरभम् | चाणक्यनीतिः अर्थशास्त्रम् | मगधराज्यम् | 300-400ई.पू. |
| 7. | बल्लाल-सेनः | नैकेनापि समं गता वसुमती | भोजप्रबन्धः | बंगाल राज्यम् | 1200 ई. |

| | | | | | |
|---|---|---|---|---|---|
| 8. | आचार्या वेदकुमारी घई | मदालसा | पुरन्ध्रीपञ्चकम् | जम्मू काश्मीर: | 16-12-1931 त: अधुना यावत् |
| 9. | महर्षि: वेदव्यास: | कार्याकार्य-व्यवस्थिति: | श्रीमद्भगव-द्गीता (महाभारत) | यमुनाद्वीप: | अज्ञात |

**अभ्यासार्थ प्रश्ना:**

1. 'बल्लालसेन' इति अस्य लेखकस्य रचना का?
2. "दौवारिकस्य निष्ठा" इति पाठ: कस्मात् ग्रन्थात् सङ्कलित:?
3. कालिदासस्य काल: क:?
4. "अम्बिकादत्तव्यास:" इत्यस्य लेखकस्य रचना का?
5. आचार्या वेद-कुमारी-घई- महोदयाया: जन्म कदा अभवत्?
6. नैकेनापि समं गता वसुमती" इति पाठ: कस्मात् ग्रन्थात् संङ्कलित:?
7. "महाभारतम्" इति अस्या: रचनाया: लेखक: क:?
8. "कुमारसंभवम्" इति अस्या: रचनाया: लेखक: क:?
9. "प. अम्बिकादत्त-व्यासस्य काल: क:?
10. भोजप्रबन्धम् इति अस्या: रचनाया: लेखक: क: ?
11. "मदालसा"इति पाठ: कस्मात् ग्रन्थात् संङ्कलित: ?
12. महाकवे: भासस्य काल: क:?
13. "चारुदत्तम्" इति कस्य रचना अस्ति?
14. "मातुराज्ञा गरीयसी" इति पाठ: कस्मात् ग्रन्थात् सङ्कलित:?
15. "पुरन्ध्रीपञ्चकम्" इति रूपकसङ्ग्रह: कस्य रचना?
16. "अनुशासनम्" इति पाठ: कस्या: उपनिषद: सङ्गृहीत:?
17. "प्रजानुरञ्जको नृप:" इति पाठ: कस्मात् ग्रन्थात् सङ्कलित:?

18. "भासः" इत्यस्य लेखकस्य कति नाटकानि?

19. 'पञ्चतन्त्रम्' इत्यस्याः रचनायाः लेखकः कः?

20. "कार्याकार्यव्यवस्थितिः" इति पाठः कस्मात् ग्रन्थात् सङ्कलितः?

21. "नीतिशतकम्" इति कस्य लेखकस्य रचना?

22. आचार्य-विष्णुशर्मणः कालः कः?

23. "अभिज्ञानशाकुन्तलम्" इत्यस्य नाटकस्य लेखकः कः?

24. "विष्णुशर्मा" इति अस्य लेखकस्य कृतिः का?

25. "बल्लालसेनस्य" कालः कः?

26. "विक्रमाङ्कदेवचरितम् इत्यस्य रचयिता कः?

27. श्रीमद्भगवद्गीतायाः रचयिता कः?

**प्रश्न महाकाव्य-गद्यकाव्य-चम्पूकाव्यस्य च विधानां समुचितं वैशिष्ट्यं चिनुत - (केवलं प्रश्नत्रयम्)**

**ध्यातव्य बिन्दुः**

- प्रश्नों को ध्यानपूर्वक पढ़ें व समझें ।
- प्रश्नों के उत्तर देने के लिए महाकाव्य, गद्य, तथा चंपूकाव्य से संबंधित यहाँ दी गयी सामग्री को अवश्य पढ़ें।

## महाकाव्य

लौकिक संस्कृत भाषा में काव्य-रचना का आरम्भ वाल्मीकि से हुआ। वाल्मीकि को मधुर उक्तियों का मार्गदर्शी महर्षि कहा गया है। विषय का अलंकृत वर्णन, सरल एवं मनोरम पदों से आकर्षक अर्थों की अभिव्यक्ति की रीति वाल्मीकि ने ही दिखाई। उन्होंने राम को नायक बनाकर आदिकाव्य प्रस्तुत किया। वाल्मीकि द्वारा अपनाई गई काव्य पद्धति कुछ काल तक सर्गबन्ध रचना नाम से प्रचलित रही, बाद में इसे महाकाव्य कहा गया। संस्कृत भाषा में कई महाकाव्यों की रचना के बाद उनके लक्षणों का निरूपण काव्यशास्त्रियों ने किया। भामह, दण्डी आदि आचार्यों के अनुसार महाकाव्य का जो लक्षण निश्चित किया है, वह इस प्रकार है-

महाकाव्य सर्गों में बँधा होता है। इसका नायक कोई देवता या उदात्त गुणों से युक्त उच्च कुल में उत्पन्न क्षत्रिय राजा होता है। कभी-कभी एक ही वंश में उत्पन्न अनेक

राजा भी इसके नायक हो सकते हैं, जैसा कि कालिदास के रघुवंश में है। महाकाव्य में शृङ्गार, वीर और शान्त इन तीन रसों में से कोई एक प्रधान रस होता है। अन्य रस भी सहायक के रूप में आते हैं। नाटकों में स्वीकृत कथावस्तु की सन्धियों के समान महाकाव्य में भी कथावस्तु के स्वाभाविक विकास हेतु मुख, प्रतिमुख आदि सन्धियों का प्रयोग होता है। धर्म, अर्थ, काम और मोक्ष में से कोई एक पुरुषार्थ महाकाव्य के उद्देश्य के रूप में होता है। इसके आरम्भ में नमस्कार, आशीर्वचन अथवा मुख्य कथा का सूचक मंगलाचरण होता है। इसमें कहीं दुष्टों की निन्दा और कहीं सज्जनों की प्रशंसा होती है।

महाकाव्य में सर्गों की संख्या आठ से अधिक होती है। एक सर्ग में प्राय: एक ही छन्द का प्रयोग होता है। उसके अन्त में छन्द का परिवर्तन किया जाता है। सर्ग के अंत में भावी कथा की सूचना दी जाती है। महाकाव्य में सन्ध्या, सूर्य, चन्द्र, रात्रि, प्रभात, आखेट, ऋतु, पर्वत, वन, समुद्र, संयोग, वियोग, मुनि, राजा, यज्ञ, युद्ध, यात्रा, विवाह, मन्त्रणा आदि का अवसर के अनुकूल वर्णन होता है। महाकाव्य का नामकरण कवि, कथानक, नायक आदि के आधार पर होता है।

संस्कृत महाकाव्यों के विकास-क्रम में क्रमश: कालिदास, अश्वघोष, भारवि, भट्टि, माघ, कुमारदास तथा श्रीहर्ष के नाम मुख्य रूप से लिए जाते हैं। इनकी रचनाएँ महाकाव्य साहित्य में अमर हैं। इनका विवरण निम्नलिखित है–

## कालिदास

'कालिदास' संस्कृत कवियों में श्रेष्ठ हैं। इन्हें परवर्ती कवियों ने कविकुल-गुरु की उपाधि दी है। उन्होंने दो महाकाव्य (कुमारसम्भव तथा रघुवंश), दो खण्डकाव्य (ऋतुसंहार तथा मेघदूत) और तीन नाटक (विक्रमोर्वशीय, मालविकाग्निमित्र तथा अभिज्ञानशाकुन्तल) लिखे हैं।

दुर्भाग्यवश कालिदास का काल निश्चित नहीं है। कुछ लोग इनका काल प्रथम शताब्दी ई. पू. में मानते हैं, तो दूसरे लोग इन्हें गुप्तवंश के चन्द्रगुप्त द्वितीय का समकालिक सिद्ध करते हैं। कालिदास ने अपने काव्यों में वाल्मीकि की शैली को स्वीकार किया है। इस महाकाव्य के द्वितीय सर्ग में दिलीप की गो-सेवा, चतुर्थ सर्ग में रघु की दिग्विजय यात्रा, षष्ठ सर्ग में इन्दुमती का स्वयंवर एवं त्रयोदश सर्ग में राम का अयोध्या लौटना वर्णित है। ये रघुवंश के उत्तम स्थल हैं। रघुवंश के अन्तिम (उन्नीसवें) सर्ग में राजा अग्निवर्ण के विलासमय जीवन का चित्र खींचा गया है और रघुकुल का पतन दिखाया गया है। रघुवंश गृहस्थ जीवन का समर्थन करता है और रघुवंशी राजाओं के उच्च आदर्शों का प्रतिपादक है।

इन दोनों महाकाव्यों में कालिदास ने वैदर्भी रीति का प्रयोग किया है और उनमें सभी रसों को प्रकाशित करने की क्षमता वाला प्रसाद गुण विद्यमान है।

## अश्वघोष

अश्वघोष के दो महाकाव्य हैं–बुद्धचरित और सौन्दरनन्द। इनका समय प्रथम शताब्दी ई. है। ये कुषाणवंश के राजा कनिष्क के समकालिक थे। अश्वघोष मूलतः अयोध्या के रहने वाले ब्राह्मण थे, जो बाद में बौद्ध बन गए थे। ये बहुत बड़े आचार्य और वक्ता थे। इन्होंने इन दो महाकाव्यों के अतिरिक्त एक नाटक (शारिपुत्र-प्रकरण) भी लिखा था, जो खण्डित रूप में मध्य एशिया से प्राप्त हुआ है।

- **बुद्धचरित**- यह भगवान् बुद्ध के जीवन और उपदेशों का वर्णन करता है। इसमें मूलतः 28 सर्ग थे, किन्तु आज इसके प्रथम चौदह सर्ग ही उपलब्ध हैं। वैसे पूरे महाकाव्य के तिब्बती और चीनी भाषा में अनुवाद भी हो चुके थे, जो उपलब्ध हैं। बुद्धचरित पर *रामायण* का बहुत अधिक प्रभाव है। इसके कई दृश्य *रामायण* से समता रखते हैं। घटनाओं का चयन तथा आयोजन करने में अश्वघोष अधिक प्रभाव डालते हैं। बौद्ध होते हुए भी प्राचीन वैदिक परम्पराओं के प्रति उनमें गहन निष्ठा है। बुद्धचरित के पूर्वार्द्ध में बुद्ध के निर्वाण तक का वर्णन है। शेष भाग में उनके उपदेशों तथा उत्तरकालिक जीवन का चित्रण है।
- **सौन्दरनन्द**- यह अश्वघोष का दूसरा महाकाव्य है, जिसमें 18 सर्ग हैं। इसमें बुद्ध के सौतेले भाई नन्द की धर्मदीक्षा का वर्णन है। इस महाकाव्य के आरम्भिक भाग में कवि ने नन्द और उसकी पत्नी सुन्दरी के परस्पर अनुराग को शृंगार रस के माध्यम से प्रस्तुत किया है।

नन्द के बुद्ध के विहार में चले जाने पर दोनों की विरह-व्यथा का पृथक्-पृथक् वर्णन किया गया है। नन्द के मानसिक संघर्ष का चित्रण करने में कवि ने पूर्ण सफलता पाई है। बौद्ध धर्म के उपदेशों का अत्यन्त रोचक उपमाओं के द्वारा इसमें प्रतिपादन किया गया है। जो नन्द काम में आसक्त था, वही धर्मोपदेशक बन जाता है। अश्वघोष के दोनों महाकाव्य वैदर्भी रीति में लिखे गए हैं। उनमें अलंकारों का प्रयोग स्वाभाविक रूप से है। अश्वघोष ने बौद्धधर्म के उपदेशों को काव्य का रूप देकर प्रस्तुत किया है, जिससे लोग संन्यास-धर्म के प्रति प्रवृत्त हों। भोग के प्रति अनासक्ति और संसार की असारता दिखाने में कवि को पूरी सफलता मिली है।

## भारवि

भारवि ने संस्कृत महाकाव्य को एक नई दिशा दी। इनके पहले के कवि कथावस्तु के विकास पर अधिक ध्यान देते थे, वर्णनों पर कम। भारवि ने कथानक से अधिक सम्बद्ध वस्तु के वर्णन-वैचित्र्य को महत्त्व दिया। महाकाव्य की इस पद्धति को अलंकृत पद्धति या विचित्र मार्ग कहा गया है।

भारवि का काल 500 ई. से 600 ई. के बीच माना गया है। ऐहोल अभिलेख (634 ई.) में भारवि का नाम कालिदास के साथ लिया गया है। उस समय तक ये प्रसिद्ध कवि हो गए थे।

- **किरातार्जुनीय**- यह भारवि की एकमात्र रचना है। इसमें 18 सर्ग हैं। इन्द्रकील पर्वत पर दिव्य अस्त्र प्राप्त करने वाले अर्जुन और किरातवेशधारी भगवान् शंकर का युद्ध इस काव्य में मुख्य रूप से वर्णित है। भगवान् शंकर ने प्रसन्न होकर अर्जुन को दिव्य अस्त्र प्रदान किया। इसका कथानक बहुत छोटा है, किन्तु भारवि की वर्णन पद्धति से इस महाकाव्य को विस्तार मिला है। चतुर्थ से एकादश सर्ग तक कवि ने ऋतु, पर्वत, अप्सराओं की क्रीड़ा, सूर्योदय, सूर्यास्त आदि का विस्तृत वर्णन किया है, जिसमें अलंकरण और कल्पना का आधिक्य है तथा स्वाभाविकता का अभाव है। भारवि का अर्थ-गौरव प्रसिद्ध है। इनके श्लोकों में बहुत से ऐसे अंश हैं, जो नीति वाक्य या लोकोक्ति के रूप में प्रचलित हैं, जैसे **हितं मनोहारि च दुर्लभं वचः** (ऐसी बातें दुर्लभ होती हैं, जो हितकर भी हों और मनोहर भी), **सहसा विदधीत न क्रियाम्** (कोई कार्य सहसा नहीं करना चाहिए) इत्यादि। भारवि ने चित्र काव्य का पर्याप्त प्रयोग किया है। कहीं एक ही व्यञ्जन से बना श्लोक है, तो कहीं दो व्यञ्जनों से। इस रचना में भारवि ने पाण्डित्य का प्रदर्शन किया है। इसलिए भारवि की कविता को नारियल के फल के समान कहा गया है, जो ऊपर से रूक्ष है, किन्तु भीतर से सरस है।

## भट्टि

अपने काव्य में व्याकरण के नियमों का प्रयोग कर भट्टि ने संस्कृत शास्त्रकाव्य-परम्परा का आरम्भ किया। वे काव्य के द्वारा सरलता से व्याकरण सिखाते हैं। उन्होंने अपना यह काव्य वल्लभी नगरी (गुजरात) में श्रीधरसेन नामक राजा के संरक्षण में लिखा है। श्रीधरसेन नाम के चार राजा 500 ई. से 650 ई. के बीच हुए। अतः भट्टि का समय अधिक से अधिक 650 ई. तक हो सकता है। सामान्यतः विद्वानों ने इनका समय छठी शताब्दी के उत्तरार्द्ध एवं सातवीं शताब्दी के आरंभ में माना है।

- **रावणवध या भट्टिकाव्य–** इनका रावणवध या भट्टिकाव्य 22 सर्गों में निबद्ध है। इसमें रामायण की कथा सरल तथा संक्षिप्त रूप से वर्णित है। मनोरञ्जन के साथ संस्कृत व्याकरण का पूर्ण ज्ञान देना इस महाकाव्य का उद्देश्य है। भट्टि ने कहा है कि व्याकरण की आँख रखने वालों के लिए यह काव्य दीपक के समान है। व्याकरण के अतिरिक्त अलंकारशास्त्र के ज्ञान का भी प्रदर्शन भट्टि ने इस महाकाव्य में किया है।

### कुमारदास

कुमारदास का समय छठी शताब्दी माना जाता है। कुछ लोग इन्हें आठवीं शताब्दी का भी मानते हैं। इनका जन्मस्थान सिंहल द्वीप (श्रीलंका) है।

- **जानकीहरण–** *जानकीहरण* कुमारदास द्वारा 20 सर्गों में रचित राम की कथा पर आश्रित महाकाव्य है। कालिदास के रघुवंश का अनुकरण इन्होंने अपने महाकाव्य में किया है। राजशेखर ने इनकी प्रशंसा में कहा है–

**जानकीहरणं कर्तुं रघुवंशे स्थिते सति।**
**कविः कुमारदासश्च रावणश्च यदि क्षमः॥**

रघुवंश (इस नाम का महाकाव्य, रघुवंशी राजा) के रहते हुए जानकीहरण (इस नाम का महाकाव्य, सीताहरण) करने की क्षमता यदि किसी में है, तो वह कुमारदास में है या रावण में।

*जानकीहरण* महाकाव्य अपने शीर्षक से केवल सीताहरण से सम्बद्ध प्रतीत होता है, किन्तु इसमें राम के जन्म से लेकर अभिषेक तक की पूरी कथा है।

### माघ

माघ राजस्थान के भीनमाल या श्रीमाल नगर के निवासी थे। इनके पितामह वहाँ के राजा के प्रधानमंत्री थे। इनका समय 700 ई. माना जाता है। माघ की एकमात्र रचना शिशुपालवध महाकाव्य है। माघ इस काव्य की रचना में भारवि और भट्टि से बहुत प्रभावित हैं। भारवि से प्रतिस्पर्धा तो उनके महाकाव्य में प्रारम्भ से अन्त तक दिखाई पड़ती है। भारवि शिव का यशोगान करते हैं, तो माघ विष्णु का। माघ अलङ्कृत काव्य रचना में भारवि से आगे बढ़ गए हैं।

- **शिशुपालवध–** शिशुपालवध 20 सर्गों का उत्कृष्ट महाकाव्य है, जिसमें कृष्ण द्वारा शिशुपाल के वध की कथा वर्णित है। छोटे कथानक को माघ ने महाकाव्य में विस्तृत

वर्णनों से बहुत बड़ा बना दिया है। व्याकरण, राजनीति, वेद, दर्शन, संगीत आदि विविध शास्त्रों के अपने ज्ञान को माघ ने इसमें प्रदर्शित किया है। इस महाकाव्य को लिखने में माघ का ऐसा उद्देश्य प्रतीत होता है कि महाकाव्य के छोटे से छोटे लक्षण को समाविष्ट करके इसे आदर्श महाकाव्य का रूप दिया जा सके। भाषा और छन्द दोनों पर माघ का अद्भुत अधिकार है। भारवि के समान इन्होंने चित्रकाव्य का भी प्रयोग किया है। इस महाकाव्य को पण्डितों के समाज में बहुत प्रशंसा मिली है जिसका प्रमाण यह सुभाषित है–**मेघे माघे गतं वयः**।

## श्रीहर्ष

यद्यपि माघ के बाद अन्य अनेक कवि हुए, किन्तु श्रीहर्ष को जो ख्याति मिली, वह अन्य किसी को नहीं मिली। श्रीहर्ष विशिष्ट पण्डित-परम्परा में उत्पन्न हुए थे। इन्होंने नैषधीयचरित महाकाव्य के अतिरिक्त वेदान्त का एक क्लिष्ट ग्रन्थ खण्डनखण्डखाद्य भी लिखा था। इनकी शैली पाण्डित्य से भरी हुई है। माघ के समान श्रीहर्ष भी पाण्डित्य प्रदर्शन करते हैं, किन्तु पदों का लालित्य भी सर्वत्र बनाए रखते हैं।

श्रीहर्ष का समय बारहवीं शताब्दी है। ये कान्यकुब्जनरेश जयचन्द्र की सभा में रहते थे। श्रीहर्ष ने अनेक ग्रन्थ लिखे जिनकी सूचना उन्होंने नैषधीयचरित के सर्गों के अन्त में दी है।

- **नैषधीयचरित–** *नैषधीयचरित* में निषध देश के राजा नल के जीवन का वर्णन है। नल और दमयन्ती के परस्पर प्रेम तथा विवाह की संक्षिप्त कथा को कल्पनाशक्ति के सहारे श्रीहर्ष ने 22 सर्गों में फैलाया है। उनके प्रेम में हंस तथा देवता बहुत महत्त्वपूर्ण योगदान करते हैं। नैषधीयचरित में श्रीहर्ष ने अपने प्रौढ़ पाण्डित्य का इतना अधिक प्रदर्शन किया है कि यह शास्त्र-काव्य बन गया है। साधारण संस्कृतज्ञ इसके साथ खिलवाड़ नहीं कर सकते। विद्वानों के गर्वरूपी रोग को दूर करने के लिए यह औषध माना गया है ( **नैषधं विद्वदौषधम्** )। इस महाकाव्य को भारवि और माघ के काव्यों से भी उत्कृष्ट कहा गया है

**तावद् भा भारवेर्भाति यावन्माघस्य नोदयः।**
**उदिते नैषधे काव्ये क्व माघः क्व च भारविः॥**

अर्थात् भारवि की शोभा तब तक है, जब तक माघ का उदय नहीं हुआ और जब नैषध काव्य का उदय हो गया, तो कहाँ माघ और कहाँ भारवि?

भारवि, माघ और श्रीहर्ष इन तीनों के महाकाव्यों (किरातार्जुनीय, शिशुपालवध, और नैषधीयचरित) को संस्कृत विद्वान् **बृहत्त्रयी** कहते हैं। इन तीनों ने अलंकृत पद्धति का अनुसरण किया है। कालिदास के तीन काव्यों (रघुवंश, कुमारसम्भव और मेघदूत) को सरल शैली का आश्रय लेने के कारण **लघुत्रयी** कहा जाता है। इन छः काव्यों का संस्कृत परम्परा में विशेष रूप से प्रचार है।

**अन्य महाकाव्य**

संस्कृत भाषा में महाकाव्य-रचना बहुत लोकप्रिय रही है। उपर्युक्त महाकाव्यों के अतिरिक्त प्राचीन काल में भी अनेक महाकाव्य लिखे गए थे और यह परम्परा आज तक चली आ रही है। यहाँ कुछ महाकाव्यों के नाम दिए जाते हैं। हरविजय नामक महाकाव्य कश्मीरी कवि रत्नाकर द्वारा लिखा गया, जिसका समय 850 ई. माना जाता है। इस महाकाव्य में भगवान् शिव की अन्धकासुर पर विजय का विस्तार से वर्णन है। इसमें 50 सर्ग हैं। महाकाव्य की विशालता के कारण रत्नाकर की कीर्ति बहुत फैल गई। रत्नाकर के समकालीन शिवस्वामी ने बौद्धग्रन्थ अवदानशतक की एक कथा पर आश्रित कप्फणाभ्युदय नामक महाकाव्य लिखा। यह 20 सर्गों का बौद्ध महाकाव्य है। कश्मीर के ही निवासी क्षेमेन्द्र ने तीन प्रसिद्ध महाकाव्यों का प्रणयन किया। ये हैं रामायणमञ्जरी, भारतमञ्जरी और बृहत्कथामञ्जरी। ये तीनों प्रसिद्ध कथाओं पर आश्रित हैं। क्षेमेन्द्र ने 1067 ई. में अपना अन्तिम महाकाव्य दशावतारचरित लिखा। क्षेमेन्द्र का जीवनकाल 995 ई. से 1070 ई. तक है।

एक अन्य कश्मीरी कवि मङ्खक ने श्रीकण्ठचरित नामक महाकाव्य 25 सर्गों में लिखा, जिसमें शिव द्वारा त्रिपुर के पराजय का वर्णन है। इनका समय बारहवीं शताब्दी ई. है। अन्य प्रदेशों के कवियों ने भी समय-समय पर महाकाव्यों की रचना की। नीलकण्ठ दीक्षित ने सत्रहवीं शताब्दी में शिवलीलार्णव महाकाव्य 12 सर्गों में लिखा। रामभद्र दीक्षित का पतञ्जलिचरित (आठ सर्ग), वेंकटनाथ का यादवाभ्युदय, धनेश्वर सूरि का शत्रुञ्जय महाकाव्य, वाग्भट का नेमिनिर्माणकाव्य, वीरनन्दी का चन्द्रप्रभचरित, हरिश्चन्द्र का धर्मशर्माभ्युदय इत्यादि महाकाव्य भी प्रसिद्ध हैं। कुछ महाकाव्य विभिन्न देवताओं तथा शास्त्रीय विषयवस्तु के निरूपण के लिए भी लिखे गए हैं। हेमचन्द्र (1088-1172 ई.) का कुमारपालचरित 28 सर्गों का महाकाव्य है, जिसके प्रथम 20 सर्गों में व्याकरण के नियमों के अनुसार संस्कृत भाषा के रूपों का प्रयोग दिखाया गया है और अन्तिम 8 सर्गों में प्राकृत तथा अपभ्रंश भाषा के व्याकरण-सम्बद्ध रूपों का प्रयोग है। इसे द्व्याश्रयकाव्य भी कहते हैं।

आधुनिक युग में भी संस्कृत महाकाव्यों की रचना हो रही है। वर्तमान महापुरुषों तथा घटनाओं को विषय बनाकर अनेक महाकाव्य लिखे गए हैं। महापुरुषों में गुरुगोविन्द सिंह, शिवाजी, स्वामी दयानन्द, रामकृष्ण परमहंस, विवेकानन्द, महात्मा गांधी, सुभाषचन्द्रबोस, जवाहरलाल नेहरु आदि पर अनेक संस्कृत महाकाव्य लिखे गए हैं। आधुनिक काल में प्राचीन विषयों पर भी अनेक महाकाव्य लिखे गए हैं। यही नहीं, विदेशी महापुरुष भी संस्कृत महाकाव्य के विषय बने हैं। नाटक के समान महाकाव्य भी आधुनिक संस्कृत कवियों की अत्यधिक लोकप्रिय विधा है।

**ध्यातव्य बिन्दुः**

- महाकाव्य– सर्गबन्ध रचना
- महाकाव्य का नामकरण कवि, कथानक अथवा नायक के नाम पर आधारित।
- कालिदास के दो प्रसिद्ध महाकाव्य

  (i) कुमारसम्भव– सर्ग-आठ, रीति-वैदर्भी।

  विषय : शिव-पार्वती के विवाह तथा कुमार कार्तिकेय के जन्म की कथा।
- कालिदास के शृंगार रस के प्रति विशिष्ट आकर्षण का द्योतक।

  (ii) **रघुवंश**- सर्ग- 19, रीति-वैदर्भी।

  विषय -- इक्ष्वाकुवंश के विभिन्न राजाओं का विस्तृत वर्णन,

  गृहस्थ जीवन की श्रेष्ठता का प्रतिपादन।

  रघुवंशी राजाओं के उच्च आदर्शों का द्योतन।

  सभी रसों के प्रकाशक प्रसाद गुण से परिपूर्ण
- अश्वघोष के दो महाकाव्य

  (i) **बुद्धचरित–** सर्ग-28, उपलब्ध सर्ग-14

  विषय - भगवान् बुद्ध के जीवन और उपदेशों का वर्णन।

  (ii) **सौन्दरनन्द–** सर्ग-18, रीति- वैदर्भी।

  विषय– नन्द और सुन्दरी के परस्पर अनुराग का शृंगारपूर्ण वर्णन।

  बुद्ध के सौतेले भाई नन्द की धर्मदीक्षा का वर्णन।

  बौद्धधर्म के उपदेशों की रोचक एवं काव्यमय प्रस्तुति।

- किरातार्जुनीय

 **लेखक-भारवि**

 सर्ग-18

 विषय– इन्द्रकील पर्वत पर दिव्य अस्त्र प्राप्त करने वाले अर्जुन और किरातवेशधारी भगवान् शंकर के युद्ध का वर्णन।

इस महाकाव्य के प्रसिद्ध नीतिवाक्य–

हितं मनोहारि च दुर्लभं वचः।

सहसा विदधीत न क्रियाम्।।

समय- छठी शताब्दी।

- रावणवध (भट्टिकाव्य)

 लेखक- भट्टि।

 समय– छठी शताब्दी का उत्तरार्द्ध एवं सातवीं शताब्दी का आरम्भ।

 विषय- रामायण की कथा का सरल एवं संक्षिप्त रूप में वर्णन।

- जानकीहरण

 लेखक– कुमारदास।

 विषय– राम की कथा पर आधारित।

 समय– छठी शताब्दी।

- शिशुपालवध

 लेखक- माघ।

 समय– 700 ई.।

 विषय– कृष्ण द्वारा शिशुपाल के वध की कथा का वर्णन।

- नैषधीयचरित

 लेखक- श्रीहर्ष।

 समय– बारहवीं शताब्दी।

 विषय– निषध देश के राजा नल एवं दमयन्ती के प्रणय का वर्णन।

- बृहत्त्रयी

  किरातार्जुनीय (भारविकृत), शिशुपालवध (माघकृत) एवं नैषधीयचरित (श्रीहर्षकृत) बृहत्त्रयी कहलाते हैं।

- हरविजय

  लेखक– रत्नाकर (कश्मीरी कवि)।

  समय– 850 ई.।

  विषय– भगवान् शिव की अन्धकासुर पर विजय का विस्तृत वर्णन।

- कप्फणाभ्युदय

  लेखक- शिवस्वामी।

  विषय बौद्धग्रन्थ अवदानशतक की कथा पर आश्रित।

- रामायणमञ्जरी, भारतमञ्जरी और बृहत्कथामञ्जरी

  लेखक– क्षेमेन्द्र।

  विषय- प्रसिद्ध कथाओं पर आश्रित।

- दशावतारचरित

  लेखक-क्षेमेन्द्र।

  समय– 995 ई. से 1070 ई.।

- श्रीकण्ठचरित

  लेखक– मंख (कश्मीरी कवि)।

  समय– बारहवीं शताब्दी।

  विषय- शिव द्वारा त्रिपुर की पराजय का वर्णन।

  सर्ग– 25 सर्ग।

- शिवलीलार्णव

  लेखक– नीलकण्ठ दीक्षित।

  समय– सत्रहवीं शताब्दी।

  सर्ग– बारह सर्ग।

- पतञ्जलिचरित

  लेखक–रामभद्र दीक्षित।

  सर्ग–आठ।

- यादवाभ्युदय

  लेखक– वेंकटनाथ।

- शत्रुञ्जय

  लेखक– धनेश्वर सूरि।

- नेमिनिर्माणकाव्य

  लेखक– वाग्भट।

- चन्द्रप्रभाचरित

  लेखक– वीरनन्दी।

- धर्मशर्माभ्युदय

  लेखक- हरिश्चन्द्र।

- कुमारपालचरित (द्वयाश्रयकाव्य)

  लेखक– हेमचन्द्र।

  सर्ग– 28।

- द्वयाश्रयकाव्य

  ऐसा काव्य जो दो कथानकों पर आधारित हो।

- वर्तमान संस्कृत महाकाव्य

  अनेक महापुरुषों यथा गुरुगोविन्द सिंह, शिवाजी, स्वामी दयानन्द, रामकृष्ण परमहंस, विवेकानन्द, सुभाषचन्द्र बोस आदि पर लिखे गए।

## गद्यकाव्य एवं चम्पूकाव्य

संस्कृत गद्य का आरम्भ ब्राह्मण-ग्रन्थों और उपनिषदों के गद्य में देखा जा सकता है। बहुत दिनों तक सरल स्वाभाविक शैली में गद्य लिखने की परम्परा चलती रही। प्राचीन शिलालेखों में गद्य का काव्यमय रूप प्राप्त होता है। इस दृष्टि से रुद्रदामन का गिरिनार शिलालेख (150 ई.) तथा हरिषेण रचित समुद्रगुप्त-प्रशस्ति (360 ई.) महत्त्वपूर्ण हैं। ये दोनों साहित्यिक गद्य के श्रेष्ठ उदाहरण हैं। गद्यकाव्य को स्मरण रखने का श्रम, आलोचकों की उपेक्षा और गद्यकाव्य का ऊँचा मानदण्ड इन तीनों कारणों से गद्यकाव्य की रचना कम हुई। पद्यविधा की सुकुमारता, लयात्मकता, संगीतात्मकता, रचनात्मक सुविधादि गुणों के कारण पद्य रचना द्वारा लोकयश एवं प्रशंसा प्राप्त करना कवियों के लिए सरल कार्य था। परन्तु गद्य रचना में इन गुणों को उत्पन्न करना थोड़ा कठिन था। इसीलिए अधिकांश कवियों की सहज प्रवृत्ति पद्य रचना की ही ओर अधिक रही। गद्य रचना के सन्दर्भ में यह उक्ति भी प्रसिद्ध है **गद्यं कवीनां निकषं वदन्ति**। गद्य काव्य के मुख्यत: दो भेद हैं– कथा और आख्यायिका। प्राय: छठी-सातवीं शताब्दी ई. में कुछ महत्त्वपूर्ण गद्य कवि हुए, जैसे– *दण्डी, सुबन्धु* और *बाणभट्ट।*

### दण्डी

दण्डी ने *दशकुमारचरित* के रूप में एक अद्‌भुत कथा-काव्य दिया है। दण्डी का समय विवादास्पद है, किन्तु अधिकांश विद्वान् इनका काल छठी शताब्दी मानते हैं। परम्परा से दण्डी के तीन ग्रन्थ प्रामाणिक माने जाते हैं। इनमें दूसरा ग्रन्थ काव्यादर्श और तीसरा अवन्तिसुन्दरीकथा है। इस तीसरे ग्रन्थ के रचयिता के विषय में कुछ विवाद है। दशकुमारचरित अव्यवस्थित रूप में मिलता है। इसके तीन भाग प्राप्त हैं पूर्वपीठिका (पाँच उच्छ्‌वास), मूलभाग (आठ उच्छ्‌वास) तथा उत्तरपीठिका (एक उच्छ्‌वास)। मूलभाग में आठ कुमारों की कथा का वर्णन है। पूर्वपीठिका को मिलाकर दस कुमारों की कथा पूरी हो जाती है। तीनों भागों की शैली में थोड़ा भेद दिखाई पड़ता है।

दशकुमारचरित का कथानक घटना प्रधान है, जिसमें अनेक रोमांचक घटनाएँ पाठकों को विस्मय और विषाद के बीच ले जाती हैं। कहीं भयंकर जंगल में घटनाक्रम पहुँचाता है, तो कहीं समुद्र में जहाज टूटने पर कोई तैरता हुआ मिलता है। घटनाएँ और विषय-वर्णन दोनों ही समान रूप से दण्डी के लिए महत्त्व रखते हैं। कथावस्तु कहीं भी वर्णनों के क्रम में अवरूद्ध नहीं होती। दण्डी के चित्रण में सामान्य समाज की प्रधानता है। जिसमें निम्न कोटि का जीवन बिताने वाले धूर्त, जादूगर, चालाक, चोर, तपस्वी,

सिंहासनच्युत राजा, पतिवञ्चक नारी, ठगने वाली वेश्याएँ, ब्राह्मण, व्यापारी और साधु। दण्डी का हास्य और व्यंग्य भी उच्च कोटि का है। दण्डी अपने वर्णनों में कहीं सहज और कहीं गम्भीर प्रतीत होते हैं।

दण्डी की सबसे बड़ी विशेषता सरल और व्यावहारिक किन्तु ललित पदों से युक्त गद्य लिखने में है। वे लम्बे समासों, कठोर ध्वनियों और शब्दाडम्बर से दूर रहते हैं। भाषा के प्रयोग में ऐसी स्वाभाविकता किसी अन्य गद्य कवि में नहीं मिलती। दण्डी का पद लालित्य संस्कृत आलोचकों में विख्यात है– **दण्डिनः पदलालित्यम्**। दशकुमारचरित की विषयवस्तु भी किसी आधुनिक रोमांचकारी उपन्यास से कम रोचक नहीं है।

## सुबन्धु

बाणभट्ट ने हर्षचरित की प्रस्तावना में वासवदत्ता को कवियों का दर्पभंग करने वाली रचना कहा है। इसी प्रकार कादम्बरी को उन्होंने दो कथाओं (वासवदत्ता तथा बृहत्कथा) से उत्कृष्ट कहा है। इससे ज्ञात होता है कि सुबन्धु बाण से पहले हो चुके थे। वासवदत्ता सुबन्धु की उत्कृष्ट गद्य रचना है, इसमें कथानक बहुत संक्षिप्त है। राजकुमार कन्दर्पकेतु स्वप्न में अपनी भावी प्रियतमा को देखता है और अपने मित्र के साथ उसकी खोज में निकल जाता है। वह विन्ध्यावटी में एक मैना के मुख से वासवदत्ता का वृत्तान्त सुनता है। उधर वासवदत्ता भी स्वप्न में कन्दर्पकेतु को देखकर उसके प्रति प्रेमासक्त हो जाती है। दोनों पाटलिपुत्र में मिलते हैं। प्रेमी-युगल जादू के घोड़े पर चढ़कर भाग जाते हैं और विंध्याचल में पहुँचकर सो जाते हैं। राजकुमार जब जागता है, तब वासवदत्ता को नहीं पाता। बहुत ढूँढ़ने के बाद वह एक प्रतिमा को देखता है। स्पर्श करते ही प्रतिमा वासवदत्ता बन जाती है। बाद में दोनों का विवाह हो जाता है।

इस संक्षिप्त कथानक को विस्तृत वर्णन और कल्पनाशक्ति से सुबन्धु बहुत फैलाते हैं। उनका लक्ष्य रोचक और सरस कथा का आख्यान नहीं है, अपितु वे वर्णन-कौशल से चमत्कार उत्पन्न कर गौरव अर्जित करना चाहते हैं। नायक-नायिका के रूप का वर्णन करने में, उनके गुण-गान में, उनकी तीव्र विरह-वेदना, मिलन की आकांक्षा और संयोग-दशा के चित्रण में सुबन्धु ने पर्याप्त शक्ति लगाई है। इस कार्य में सुबन्धु के व्यापक अनुभव तथा पाण्डित्य ने बड़ी सहायता की है।

सुबन्धु अपने श्लेष के प्रयोग पर बहुत गर्व करते हैं। वे इस कथा के अक्षर-अक्षर में श्लेष भरने का दावा करते हैं। अन्य अलंकारों का भी उन्होंने प्रचुर प्रयोग किया है। यत्र-तत्र पद्यों का प्रयोग करके अपनी शैली को उन्होंने बहुत रोचक बनाया है। वासवदत्ता

वास्तव में सुबन्धु की शैली का चमत्कार दिखाने का सुन्दर अवसर देती है। लम्बे समासों का प्रयोग तथा अनुप्रासों का अत्यधिक उपयोग सुबन्धु की शैली की विशेषता है। समासों में स्वरमाधुर्य है और अनुप्रासों में संगीत है। अपने युग के अनुरूप उन्होंने चमत्कार-प्रदर्शन किया है।

## बाणभट्ट

संस्कृत गद्य साहित्य में सर्वाधिक प्रतिभाशाली गद्यकार बाण ही हैं। इनके विषय में अन्य संस्कृत-कवियों की अपेक्षा अधिक जानकारी प्राप्त होती है। हर्षचरित के आरम्भ में इन्होंने अपना और अपने वंश का पूरा विवरण दिया है। ये वात्स्यायन-गोत्रीय ब्राह्मण थे। इनके पिता का नाम चित्रभानु था। अल्पावस्था में ही ये अनाथ हो गए थे। किंतु विद्वानों के परिवार में जन्म लेने के कारण इन्होंने सभी विद्याओं का अभ्यास किया था। युवावस्था में अनेक कलाओं और विद्याओं के जानकार मित्रों की मण्डली बनाकर इन्होंने पर्याप्त देशाटन किया था। जब अनेक अनुभवों से सम्पन्न होकर बाण अपने ग्राम प्रीतिकूट (शोण के तट पर) लौटे, तो हर्षवर्धन ने अपने अनुज कृष्ण के द्वारा इन्हें अपनी राजसभा में बुलाया। बाण राजकृपा से हर्ष की सभा में रहने लगे। हर्षवर्द्धन का समय 607 ई. से 648 ई. है। इसलिए बाण का भी यही समय होना चाहिए।

बाण ने दो गद्यकाव्य लिखे– हर्षचरित तथा कादम्बरी। परम्परा बाणभट्ट को चण्डीशतक का भी लेखक मानती है।

| (क) | सुबन्धुः | (i) | वासवदत्ता |
| (ख) | दण्डी | (ii) | दशकुमारचरितम् |
| (ग) | त्रिविक्रमभट्टः | (iii) | नलचम्पूः |
| (घ) | बाणभट्टः | (iv) | कादम्बरी |

**नाट्यसाहित्यम्**

**(अ)** 1. नाट्यवेदः

2. गीतम्

3. दश

4. चतुर्दश

5. महाकवेः भासस्य

6. अभिज्ञानशाकुन्तलम्

7. अश्वघोषः

8. मृच्छकटिकम्

9. मुद्राराक्षसम्

10. अभिज्ञानशाकुन्तलस्य

11. तिस्रः

12. भवभूतिः

13. उत्तररामचरिते

14. भवभूतिः

15. भट्टनारायणः

16. नाटकम्

17. मुरारि:

18. नाटकम्

19. जीमूतवाहन:

20. ताण्डवम्

21. हनुमन्नाटकम्

**(आ)** (क) नाट्यम् (ख) दुष्यन्त:

(ग) मुद्राराक्षसम् (घ) भवभूति:

| **(इ) खण्ड 'क'** | **खण्ड 'ख'** |
|---|---|
| (क) रत्नावली | (ई) नाटिका |
| (ख) मध्यमव्यायोग: | (अ) महाभारताश्रितं रूपकम् |
| (ग) मालतीमाधवम् | (आ) प्रकरणम् |
| (घ) मृच्छकटिकम् | (इ) सामाजिक रूपकम् |

## अभ्यास प्रश्नपत्रम् 1 ( 2023-24 )

## संस्कृतम् ( केन्द्रिकम् ) ( कोड न. 322 )

## कक्षा-द्वादशी (XII)

**80 अङ्का:,** **समय:- होरात्रयम्**

*सामान्यनिर्देशा:-*

- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 12 पृष्ठानि मुद्रितानि सन्ति।
- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रमुखा: प्रश्ना: सन्ति ।
- अस्य प्रश्नपत्रस्य पठनाय 15 निमेषा: निर्धारिता: सन्ति। अस्मिन् कालावधौ केवलं प्रश्नपत्रं पठनीयम् उत्तरपुस्तिकायां च किमपि न लेखनीयम्।
- उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्क: अवश्यं लेखनीय:।
- प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
- सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
- प्रश्नानां निर्देशा: ध्यानेन अवश्यं पठनीया:।

**प्रश्नपत्रस्वरूपम् -**

**अस्मिन् प्रश्नपत्रे चत्वार: खण्डा: सन्ति-**

खण्ड: (क) अपठित-अवबोधनम्- 10 अङ्का:

खण्ड: (ख) रचनात्मककार्यम्- 15 अङ्का:

खण्ड: (ग) अनुप्रयुक्तव्याकरणम्- 20 अङ्का:

खण्ड: (घ) I. पठित-अवबोधनम् - 25 अङ्का:

II. संस्कृत - साहित्येतिहास - परिचय:-10 अङ्का:

## खण्डः क

## अपठितावबोधनम् 10 अङ्काः

1. **अधोलिखितं गद्यांशं पठित्वा प्रदत्त-प्रश्नान् संस्कृतेन उत्तरत-** 10

अधुना योगदर्शनस्य चर्चा सर्वत्र भवति। एतद् दर्शनं न केवलम् अतिप्राचीनम् अपितु नितान्तं वैज्ञानिकं दर्शनम् अस्ति। महर्षिः पतञ्जलिः योगदर्शनम् उपदिष्टवान्। भारते एव योगदर्शनस्य आविर्भावः अभवत्। योगः देहात्मनोः प्रत्यक्षं वैज्ञानिकं साधनमस्ति। एतद्दर्शने शरीरस्य मनसः अपि नियमनं वर्णितम्। योगस्य परिभाषा अस्ति-"योगः चित्तवृत्तिनिरोधः"। चित्तवृत्तीनाम् अवरोधनेनैव योगस्य संसिद्धिः। अस्याम् अवस्थायां जीवः स्वरूपम् अधिगच्छति। योगस्य अष्ट अङ्गानि भवन्ति-यम-नियम-आसन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधयः चेति। अस्माभिः जीवने सदा योगः सेवनीयः, यतः योगेन जीवने नीरोगता आयाति।

**(अ) एकपदेन उत्तरत–(केवलं प्रश्नद्वयम्)** 1×2=2

(i) अधुना कस्य दर्शनस्य चर्चा सर्वत्र भवति?

(ii) योगदर्शनं कः उपदिष्टवान्?

(iii) योगस्य कति अङ्गानि सन्ति ?

**(आ) पूर्णवाक्येन उत्तरत–(केवलं प्रश्नद्वयम्)** 2×2=4

(i) योगस्य परिभाषा का अस्ति?

(ii) अस्माभिः जीवने किमर्थं योगः सेवनीयः ?

(iii) योगस्य अष्टाङ्गानां नामानि लिखत ?

**(इ) गद्यांशस्य समुचितं शीर्षकं लिखत-** 1×1=1

**(ई) निर्देशानुसारम् उत्तरत–(केवलं प्रश्नत्रयम्)** 1×3=3

(i) ''तिरोभावः'' इत्यस्य विलोमपदं किम्?

(क) यमः (ख) नियमः

(ग) आविर्भावः (घ) प्राणायामः

(ii) ''पुरातनम्'' इत्यर्थे कः शब्दः अत्र प्रयुक्तः?

(क) प्रत्यक्षः (ख) प्राचीनम्

(ग) नियमनम् (घ) नवीनम्

(iii) ''अधुना योगदर्शनस्य चर्चा सर्वत्र भवति'' अत्र क्रियापदं किम्?

(क) अधुना (ख) योगदर्शनस्य

(ग) चर्चा (घ) भवति

(iv) ''साधनम्'' इत्यस्य विशेषणपदं गद्यांशे किम्?

(क) वैज्ञानिकम् (ख) नीरोगता

(ग) अतिप्राचीनम् (घ) नितान्तम्

## खण्ड (ख)

### रचनात्मक- कार्यम् 15 अङ्काः

2. भवतः नाम सक्षमः। भवान् छात्रावासे वसति। अजन्ता-अलोरा-गुहादर्शनार्थं शैक्षिक-यात्रायै गन्तुम् इच्छति। धनप्रेषणार्थं पितरं प्रति लिखितं पत्रं मंजूषायां प्रदत्तैः उचितशब्दैः पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत– **1/20 × 10 = 5**

कावेरी छात्रावासः

...............

तिथिः **25/4/2023**

परमादरणीया: (ii).............

सादरं प्रणमामि।

सविनयं (iii) ..................... यत् मम त्रैमासिकी परीक्षा समाप्तिं गता। मम (iv) ........... शोभनानि अभवन् । अस्मिन् (v) ............. अहं गृहं न आगमिष्यामि, यत: विद्यालयेन एकस्या: (vi) ............. प्रबन्ध: कृत:। एषा अजन्ता-एलोरा-गुहानां दर्शनाय आयोजिता अस्ति। यात्राव्ययार्थं (vii) ............. रूप्यकाणि प्रेषयन्तु भवन्त:। शेषं सर्वं कुशलम्। मम (viii) .............अग्रजाय च सादरं (ix) .................

भवदीय: (x).............

सक्षम:।

| |
|---|
| **मञ्जूषा**–( निवेदयामि, प्रियपुत्र:, शैक्षिक यात्राया:, पंचशतम्, कालिकातात:, शरदवकाशे, जनन्यै, उत्तरपत्राणि, पितृमहाभागा: प्रणामा:) |

3. **मञ्जूषाप्रदत्त-पदसहायतया अधोलिखितां कथां पूरयत-** ½×10 = 5

एकदा एक: सज्जन: नद्या: विशाले (i)......... उपविशति स्म। तदैव स: अपश्यत्–एक: (ii) .......... नद्या: गहने जले अपतत्। सज्जन: शीघ्रं गत्वा वृश्चिकं (iii) .........गृहीतवान्। परं विषधर: वृश्चिक: (iv)........... हस्तं दंष्ट्वा पुन: जले अपतत् अवहत् च। साधुस्वभाव: सन्त: पुन: तं वृश्चिकं (v)......... हस्ते गृहीतवान्। वृश्चिकोपि पुन: हस्तं (vi)........... जले अपतत् च। एतत् वारं वारम् अवलोक्य तत्र स्थित: एक: विस्मित: (vii) ............ सन्तम् अपृच्छत्–हे साधो! एष: (viii) ..........वृश्चिक: भवन्तं वारं वारं दशति ततोऽपि भवान् तं त्रातुम् इच्छति। सन्त: विहस्य अवदत् 'वृश्चिकस्य स्वभावोस्ति दंशनं साधो: स्वभावो भवति (ix)........... । यदि एष: दु:स्वभावं न त्यजति तर्हि अहं किमर्थं (x) .... ......... त्यजानि।

| |
|---|
| **मञ्जूषा**–(सज्जनस्य, दु:स्वभाव:, तटे, रक्षणम्, वृश्चिक:, जन:, हस्ते, साधुस्वभावं, दंष्टवान्, त्रातुं) |

**अथवा**

**अधोलिखिते संवादे रिक्तस्थानानि पूरयत-** 1×5=5

**पिता**–(दूरदर्शने स्त्रीं विमानचालकरूपेण दृष्ट्वा) अहो! कुत्र कुत्र न दृश्यते नारी!

**पुत्री**–अद्य नारी सर्वस्मिन् क्षेत्रे कार्यं कर्तुं समर्था ।

**पुत्र:**–सत्यम्, हे पित:! किं प्राचीनकालेऽपि नारी सर्वं कर्तुं समर्था आसीत्?

**माता**–आम्...........................।

**पुत्र:**–(ii) किं प्राचीनकालेऽपि (ii) .................................................?

**पिता**–आम्, प्राचीनकालेऽपि नार्य: शिक्षां प्राप्तुं समर्था: आसन् ।

**पुत्री**–परं कदा (iii) .......................?

**माता**–मध्यकाले एव नारीणां शिक्षां प्रति जनै: विरोध: कृत: ।

**पुत्र:**–आम्! अस्माकं अध्यापिकया अपि पाठितम् एतद् ।

**पिता**–किं भवान् जानाति नारीणां (vi) ................................?

**पुत्री**–आम्! नारीणां पुन: उत्थानाय राजाराममोहनरायेण प्रयत्न: कृत: ।

**पुत्र:**–किं (अ) ..........................?

**माता**–आम्! अस्माकं समाजसुधारकै: तु स्त्रीशिक्षायै अनेका: संस्था: संस्थापिता:।

4. **निम्नलिखितेषु केषाञ्चन पञ्चवाक्यानां संस्कृतेन अनुवादं कुरुत**- 1×5=5

1. छात्र विद्यालय में पढ़ने आते हैं।

Students come to school to study.

2. पक्षी वृक्षों पर कूजते हैं।

Birds chirps on trees.

3. माता बच्चों की प्रथम गुरु होती है।

Mother is first teacher of children-

4. सैनिक देश की रक्षा करते हैं।

The soldiers protect the country.

5. किसान लोगों को अन्न देते हैं।

Farmers provide food to the people.

6. हमें पर्यावरण की रक्षा करनी चाहिये।

We must protect the environment.

7. जल ही जीवन है।

Water is life.

## खण्ड ( ग )

**अनुप्रयुक्तव्याकरणम्** **20अङ्काः**

5. **अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं सन्धिं विच्छेदं वा कुरुत- ( केवल प्रश्नषट्कम् )** **1 × 6 = 6**

(i) आर्तस्य यथौषधम्।

(ii) उदर्केण गुणेन+अत्र भवितव्यम्।

(iii) यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि।

(iv) न वयं शिवगणास्तादृशाः।

(v) प्रभूणाम् आज्ञाम् उत्+लङ्घ्य आयातीति आक्रुश्यते।

(vi) सेतुर्येन महोदधौ विरचितः ।

(vii) तावन्मम बालभावः स एव ।

6. **अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं समस्तपदं विग्रहवाक्यं वा प्रदत्तविकल्पेभ्यः चिनुत- ( केवल प्रश्नपञ्चकम् )** $1 \times 5 = 5$

(i) **अतिथिदेवो भव।**

(क) अतिथिः एव देवः यस्य सः (ख) अतिथिः एव देवः

(ग) अतिथिः च देवः च (घ) अतिथिविरोधी देवः

(ii) **धैर्यसागरः लक्ष्मणः केन क्षोभितः ।**

(क) धैर्येण सागरः (ख) धैर्यस्य सागरः

(ग) धैर्याय सागरः (घ) धैर्यात् सागरः

(iii) **आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः ।**

(क) आकारेण सदृशी प्रज्ञा यस्य सः

(ख) आकरेण सदृशी प्रज्ञा

(ग) आकारः एव प्रज्ञा यस्य यस्य सः

(घ)आकारः च प्रज्ञा च

(iv) **यानि अस्माकं सुचरितानि,तानि सेवितव्यानि ।**

(क) शोभनानि चरितानि (ख) शोभनं चरितानि

(ग) शोभनानि चरितानि यस्य सः (घ)शोभनानि चरितानि च

(v) महाराजस्य <u>सन्ध्यायाः उपासनायाः च समये</u> भवादृशानां प्रवेशसमयः भवति।

(क) सन्ध्यायां उपासनासमये

(ख) सन्ध्या-उपासनायाः समये

(ग) सन्ध्योपासनसमये

(घ) उपासनासमये

(vi) <u>अपराधेन सह</u> अपि मे वचः क्षन्तव्यम्।

(क) अपराधसमम् (ख) अपराधम्

(ग) सापराधम् (घ) निरपराधम्

7. **अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं संयोजितं विभाजितं वा प्रकृति-प्रत्ययं प्रदत्तविकल्पेभ्यः चिनुत- ( केवल प्रश्नषट्कम् )** $1 \times 6 = 6$

(i) सत्यान्न <u>प्रमदितव्यम्</u>।

(क) प्रमद्+तव्यत् (ख) प्रमद्+शानच्

(ग) प्र+मद्+अनीयर (घ) प्रमद्+शतृ

(ii) मोहम् <u>उप+गम्+क्त</u> तत्रभवान्।

(क) आगतः (ख) उपगत्वा

(ग) उपगतः (घ) गन्तुम्

(iii) <u>शुद्धि+मतुप्</u> तदन्वये दिलीपः प्रसूतः।

(क) शुद्धिमत् (ख) शुद्धिमतुप्

(ग) शुद्धिमति (घ) शुद्धिमन्तौ

(iv) भृकुटिः नियतीव <u>व्यवस्थिता</u>।

(क) व्यवस्थित+तल् (ख) व्यवस्थित+टाप्

(ग) वि+स्थिता (घ) व्यवस्थित+ङीप्

(v) <u>गुणी</u> गुणं वेत्ति, न वेत्ति निर्बलः ।

(क) गुण+तल् (ख) गुण+टाप्

(ग) गुण+इनि (घ) गुण+ङीप्

(vi) भार्या भर्त्रा <u>रक्षितव्य+टाप्</u>।

(क) रक्षिता (ख) रक्षितव्या

(ग) रक्षितव्यटाप् (घ) रक्षणीया

(vii) अभिजातस्य सत्यम् अलोलुप्त्वम् इति दैवी संपदः भवन्ति।

(क) अलोलुप+त्वम् (ख) अलोलुप+तव

(ग) अलोलुप+त्व (घ) लोलुप+त्व

8. **समुचितं उपपदविभक्तिरूपं प्रदत्तविकल्पेभ्यः चिनुत -**

**(केवल प्रश्नत्रयम्)** **1 × 3 = 3**

(i) ............. प्रियधनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः।

(क) आचार्यम् (ख) आचार्येण

(ग) आचार्याय (घ) आचार्यात्

(ii) ..................... सह सीता वनं गन्तुम् इच्छति।

(क) रामेण (ख) रामस्य

(ग) रामाय (घ) रामात्

(iii) प्रजानामेव भूत्यर्थ स ............. बलिमग्रहीत्।

(क) तुभ्यम् (ख) ताभ्यः

(ग) तेभ्यः (घ) तेभिः

(iv) ................... अपि समं न गता वसुमती नूनं त्वया यास्यति।

(क) एकेन (ख) एकस्य

(ग) एकात् (घ) एकम्

## खण्ड -घ

**पठितावबोधनम्** **25 अङ्काः**

9. **अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत-**

संवृत्ते किञ्चिदन्धकारे भुशुण्डीं स्कन्धे निधाय निपुणं निरीक्षमाणः आगत-प्रत्यागतं च

विदधानः प्रतापदुर्गदौवारिकः कस्यापि पादक्षेपध्वनिमिवाश्रौषीत्। ततः स्थिरीभूय पुरतः पश्यन् सत्यपि दीपप्रकाशे कमप्यनवलोकयन् गम्भीरस्वरेणैवम् अवादीत् ''कः कः भोः?'' इति। अथ क्षणानन्तरं पुनः स एव पादध्वनिरश्रावीति भूयः साक्षेपमवोचत्'' कः एषः मामनुत्तरयन् मुमूर्षुः समायाति बधिरः? ततो ''दौवारिक शान्तो भव! किमपि व्यर्थं मुमूर्षुरिति बधिर इति च वदसि?'' इति वक्तारमपश्यतैवाऽऽकर्णि मन्द्रस्वरमेदुरा वाणी। 'तत् किं नाज्ञायि अद्यापि भवता प्रभुवर्याणामादेशो यद् दौवारिकेण प्रहरिणा वा त्रिः पृष्टोऽपि प्रत्युत्तरमददद् हन्तव्यः इति' इत्येवं भाषमाणेन द्वाःस्थेन 'क्षम्यतामेष आगच्छामि, आगत्य च निखिलं निवेदयामि' इति कथयन् द्वादशवर्षेण केनापि भिक्षावटुनानुगम्यमानः कोऽपि काषायवासाः धृततुम्बीपात्रः भव्यमूर्तिः संन्यासी दृष्टः। ततस्तयोरेवम् अभूदालापः-

**(अ) एकपदेन उत्तरत-(केवलं प्रश्नद्वयम्)** $1/2 \times 2 = 1$

(क) दौवारिकः किं शृणोति?

(ख) दौवारिकः भुशुण्डीं कुत्र निधाय भ्रमति?

(ग) कः साक्षेपमवोचत् ?

**(आ) पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्)** $1 \times 2 = 2$

(क) दौवारिकः साक्षेपं किम् अवोचत्?

(ख) संन्यासी केन अनुगम्यमानः आसीत्?

(ग) धृततुम्बीपात्रः कः आसीत्?

**(इ) यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्)** $1 \times 2 = 2$

(क) ''भव्यमूर्तिः संन्यासी'' अनयोः पदयोः विशेषणपदं किम्?

(ख) ''मुमूर्षुः समायाति बधिरः'' अत्र क्रियापदं किम् ?

(ग) ''प्रकाशे'' इति पदस्य विलोमपदं किम्?

10. **अधोलिखितं पद्यं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत- 5**

गुणी गुणं वेत्ति न वेत्ति निर्गुणः

बली बलं वेत्ति न वेत्ति निर्बलः।

पिको वसन्तस्य गुणं न वायसः

करी न सिंहस्य बलं न मूषकः।।

**(अ) एकपदेन उत्तरत (केवलं प्रश्नद्वयम्)** 1/2×2-1

(क) गुणी कं वेत्ति ?

(ख) वसन्तस्य गुणं कः वेत्ति ?

(ग) सिंहस्य बलं कः जानाति ?

**(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** 1×2-2

(क) सिंहस्य बलं कः न जानाति?

(ख) निर्बलः किं न वेत्ति?

(ग) वायसः कस्य गुणं न वेति?

**(इ) यथानिर्देशम् उत्तरत (केवलं प्रश्नद्वयम्)** 1×2-2

(क) 'निर्बलः' इत्यस्य विलोमपदं किम्?

(ख) 'गजः' इत्यर्थे अस्मिन् श्लोके किं पदं प्रयुक्तम्?

(ग) 'गुणी गुणं वेत्ति' अत्र क्रियापदं किम्?

11. **अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत-**

कुण्डला-परस्परप्रीतिमतोः भवतोः उपदेशस्य नास्ति कोऽपि अवकाशः, तथापि सखीस्नेहः मां भाषयति-'भर्त्रा भार्या भर्तव्या रक्षितव्या च। यतो हि धर्मार्थकामसिद्धये यथा भार्या भर्तुः सहायिनी भवति तथा न कोऽपि अन्यः। परस्परमनुव्रतौ पतिपत्न्यौ त्रिवर्गं साधयतः। पतिः यदि प्रभूतं धनम् अर्जयित्वा गृहमानयति तत् खलु पत्न्यभावे कुपात्रेषु दीयमानं क्षयमेति।

**ऋतध्वजः**-लक्ष्म्याः रक्षार्थं पत्न्याः सहयोगः अनिवार्यः।

**मदालसा**-कुण्डले! लक्ष्मीपूजायां न मे प्रवृत्तिः। यदि लक्ष्मीः पूज्या प्रिया च अतिथिवर्यस्य तदा इदानीमेव मे नमस्कारः।

**(अ) एकपदेन उत्तरत (केवलं प्रश्नद्वयम्) 1/2×2-1**

(i) लक्ष्म्याः रक्षार्थं कस्याः सहयोगः अनिवार्यः ?

(ii) केन भार्या भर्तव्या रक्षितव्या च ?

(iii) परस्परप्रीतिमतोः भवतोः कस्य अवकाशः नास्ति?

**(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम् ) 1×2-2**

(i) मदालसायाः कस्यां प्रवृत्तिः नास्ति ?

(ii) केषां सिद्धये भार्या भर्तुः सहायिनी भवति ?

**(इ) यथानिर्देशम् उत्तरत-(केवलं प्रश्नद्वयम्) 1×2-2**

(क) ''परस्परमनुव्रतौ पतिपत्न्यौ'' अनयोः पदयोः विशेषणपदं किम् ?

(ख) ''पतिः प्रभूतं धनम् अर्जयित्वा गृहमानयति'' अत्र क्रियापदं किम् ?

(ग) ''निवृत्तिः'' इति पदस्य विलोमपदं किम्?

**12. अधोलिखितस्य पद्यस्य भावार्थं मञ्जूषा-प्रदत्तपदैः पूरयित्वा पुनः लिखत-** **1×3-3**

**आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः।**
**आगमैः सदृशारम्भः आरम्भसदृशोदयः॥**

**भावार्थः**-1:- यथा राज्ञः दिलीपस्य ................ (1) विशालः आसीत्, तथैव तस्य (2) ................ अपि विशाला आसीत्। बुद्धेः अनुसारं (3) ................ अभ्यासमपि करोति स्म। शास्त्रोक्तविधिना कार्यं करोति स्म तदनुरूपमेव फलं प्राप्नोति स्म।

**मञ्जूषा** [बुद्धिः, शरीरः, शास्त्राणाम्]

**अथवा**

**प्रदत्त-भावार्थत्रयात् शुद्धं भावार्थं चित्वा लिखत-** 1×3=3

**(1) ''नैकेनापि समं गता वसुमती नूनं त्वया यास्यति।''**

(i) एषा पृथिवी केनापि सह न गतवती निश्चितमेव त्वया सह गमिष्यति।

(ii) एषा पृथिवी अनेकैः सह गमिष्यति।

(iii) एषा वसुमती कदापि न गमिष्यति।

**(2) ''दैवी संपद्विमोक्षाय निबन्धायासुरी मता।''**

(i) दैवी कल्याणं करोति असुरः बन्धनं ददाति ।

(ii) दैवी संपदा मुक्तये भवति आसुरी संपदा च बन्धनाय भवति ।

(iii) दैवी संपदा बन्धनाय भवति आसुरी संपदा च कल्याणाय भवति ।

**(3) शरीरेऽरिः प्रहरति, हृदये स्वजनस्तथा।**

(i) शत्रुः हृदये प्रहारं करोति आत्मीयजनः शरीरे।

(ii) आत्मीयजनः हृदये शरीरे चापि प्रहारं करोति।

(iii) आत्मीयजनः हृदये प्रहारं करोति शत्रुः शरीरे।

**13. अधोलिखितश्लोकस्य प्रदत्तान्वये रिक्तस्थानानि पूरयत-** 1×3-3

अजीर्णे भेषजं वारि जीर्णे वारि बलप्रदम्

भोजने चामृतं वारि भोजनान्ते विषापहम्।

**अन्वयः**–

**अजीर्णे** (i) ............भेषजं, जीर्णे वारि (ii) .......... भोजने च वारि (iii) ......... भोजनान्ते वारि विषापहं भवति ।

**मञ्जूषा** [अमृतं, बलप्रदम्, वारि]

14. 'क' स्तम्भस्य वाक्यांशस्य 'ख' स्तम्भस्य वाक्यांशेन सह मेलनं कुरुत-

½×4=2

| *'क' स्तम्भः* | *'ख' स्तम्भः* |
|---|---|
| (i) त्यागाय संभृतार्थानां | केवलं जन्महेतवः। |
| (ii) आकारसदृशः प्रज्ञः | स ताभ्यो बलिमग्रहीत्। |
| (iii) स पिता पितरस्तासां | प्रज्ञया सदृशागमः। |
| (iv) प्रजानामेव भूत्यर्थं | सत्याय मितभाषिणाम्। |

15. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसंगानुसारं समुचितम् उत्तरं मञ्जूषातः चित्वा लिखत-

(i) त्यागाय सम्भृतार्थानां सत्याय मितभाषिणाम्।

(ii) संन्यासी तुरीय-आश्रमसेवीति प्रणम्यते ।

(iii) निरीक्षते केलिवनं प्रविश्य क्रमेलकः कण्टकजालमेव।

(iv) तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता ।

**मञ्जूषा**–धैर्यम्, उष्ट्रः, चतुर्थ, स्वल्पभाषिणाम्

### भाग (घ)

**संस्कृतसाहित्येतिहासपरिचयः** **10 अङ्काः**

**अधोलिखितप्रश्नानाम् उत्तराणि लिखत- (केवलं प्रश्नत्रयम्)** 1×3=3

(i) 'अम्बिकादत्तव्यासः' इत्यस्य लेखकस्य रचना का?

(ii) 'मदालसा' इत्यस्य पाठस्य रचयिता कः?

(iii) 'अनुशासनम्' इति पाठः कस्याः उपनिषदः सङ्गृहीतः?

(iv) 'कार्याकार्यव्यवस्थितिः' इत्यस्य पाठस्य रचयिता कः?

17. मञ्जूषातः पदानि गृहीत्वा रिक्तस्थानपूर्तिं कुरुत - (केवलं प्रश्नत्रयम्)

1×3-3

(1) ..................... कवीनां निकषं वदन्ति ।

(i) खण्डकाव्यमेव ................ इति नाम्नापि ज्ञायते ।

(ii) सर्गबद्धो .................. कथ्यते ।

(iii) ................. चम्पूकाव्यं भवति।

| **मञ्जूषा**–[महाकाव्यम्, गद्यपद्यमिश्रितं,गद्यम्, गीतिकाव्यम्] |
|---|

18. **समुचितं मेलयत-** **1 × 4 = 4**

| | **'क' स्तम्भः** | **'ख' स्तम्भः** |
|---|---|---|
| (i) | प्रतिमानाटकम् | नाटकान्ते |
| (ii) | अभिज्ञानशाकुन्तलम् | नाटकारम्भे |
| (iii) | नान्दी | कालिदासः |
| (iv) | भरतवाक्यम् | भासः |

## अभ्यास-प्रश्नपत्रम्-2

## ( 2023-2024 )

## वार्षिकं मूल्यांकनम्

## कक्षा - द्वादशी (XII)

## संस्कृतम् ( केन्द्रिकम् ) कोड सं. - ( 322 )

समय: - होरात्रयम् सम्पूर्णाङ्का: - 80

**सामान्यनिर्देशा:**

- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे -- पृष्ठानि मुद्रितानि सन्ति।
- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रमुखा: प्रश्ना: सन्ति।
- अस्य प्रश्नपत्रस्य पठनाय 15 निमेषा: निर्धारिता: सन्ति।
- अस्मिन् कालावधौ केवलं प्रश्नपत्रं पठनीयम् उत्तरपुस्तिकायां च किमपि न लेखनीयम्।
- उत्तरलेखनात् पूर्व प्रश्नस्य क्रमाङ्क: अवश्यं लेखनीय:।
- प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
- सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
- प्रश्नानां निर्देशा: ध्यानेन अवश्य पठनीया:।

## खण्ड ( क )

## अपठितावबोधनम्

**1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-( 10 )**

जीवने सफलताया: आधार: पुरुषार्थ: एव। अस्य अभावेन नर: सुखसमृद्धिम् आप्तुम् असमर्थ: भवति यश: च न प्राप्नोति। यदा यदा नर: पुरुषार्थम् अचिनोत् तदा तदा तेन सफलता प्राप्ता। पुरुषार्थिन: एव संसारे विलक्षणप्रतिभाम् अर्जितवन्त:। देशसेवया, समाजसेवया शिक्षाप्रसारेण च पुरुषार्थिभि: उल्लेखनीयानि कार्याणि कृतानि। अस्माकं इतिहासे तेषां गौरवगानं विद्यते। आपत्काले येषां मनांसि विचलितानि न भवन्ति ते एव जीवने सफलतां प्राप्नुवन्ति। पुरुषार्थिनां कृते तु पुरुषार्थ: एव उपासना अस्ति। य: जन: स्वजीवने सफलतां प्राप्तुम् इच्छति, स: पुरुषार्थ: अवश्यमेव कुर्यात्। पुरुषार्थस्य अभावे जन: सफलतां प्राप्तुं न शक्यते।

**( अ ) एकपदेन उत्तरत-( केवलं प्रश्नद्वयम् )** ½×4 = 2

(i) जीवने सफलताया: आधार: किम्?

(ii) केषां कृते पुरुषार्थ: उपासना अस्ति?

(iii) के संसारे विलक्षणप्रतिभाम् अर्जितवन्त:?

**(आ) पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्)** **2×2=4**

(i) येषां मनांसि आपत्काले विचलितानि न भवन्ति ते किं कुर्वन्ति?

(ii) जीवने सफलताया: आधार: क:?

(iii) कस्य अभावे सफलता प्राप्तुं न शक्यते?

**(इ) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।** **1×1=1**

**(ई) यथानिर्देशम् उत्तरत- (केवलं प्रश्नत्रयम्)** **1×3=3**

(i) ते एव जीवने सफलतां प्राप्नुवन्ति' अत्र प्राप्नुवन्ति' इति क्रियापदस्य कर्तृपदं किम्?

(क) जीवने (ख) ते (ग) सफलतां (घ) एव

(ii) अपयश:' इति पदस्य विपर्ययपदं गद्यांशे किम् प्रयुक्तम्?

(क) यश: (ख) असमर्थ: (ग) सफलता (घ) गौरवगानम्

(iii) मानव:' इति पदस्य पर्यायपदं गद्यांशे किं प्रयुक्तम्?

(क) उपासना (ख) नर: (ग) पुरुषार्थ: (घ) मनांसि

(iv) 'उल्लेखनीयानि' इति पदस्य विशेष्यपदं गद्यांशे किम्?

(क) कार्याणि (ख) कृतानि (ग) विचलितानि (घ) प्राप्नुवन्ति।

## रचनात्मककार्यम्

### पत्रम्

2. भवान् प्रणव:। चेन्नईनगरे छात्रावासे स्थित्वा अध्ययनं करोति। छात्रावासे स्वदिनचर्याया: वर्णनम् कुर्वन् स्वमातरं प्रति लिखितं पत्रं मञ्जूषायां प्रदत्तपदानां सहायतया पूरयित्वा पुन: लिखत। **1/2×10=5**

(1) .............

तिथि: .............

पूजनीये मात:! सादरं प्रणामा:। अत्र कुशलं तत्रास्तु। भवत्या: पत्रं प्राप्य मनसि (2)............ जात: यत् पितृमहोदय: इदानीम् (3) ....... स्वस्थोऽस्ति। स: मम

स्वास्थ्यस्य (4) ................ च विषये चिन्तित: आसीत्। परं चिन्ताया: न कोऽपि विषय:। अहं प्रतिदिनं प्रात: चतुर्वादने (5) .........व्यायामं कृत्वा (6)............ पठामि। तत: स्नात्वा दुग्धादिकं च पीत्वा पादोनसप्त-वादने विद्यालयं गच्छामि। द्विवादने (7) ..........आगत्य भोजनं कृत्वा विश्रामं करोमि। सार्ध-चतुर्वादने उत्थाय गृहकार्यं करोमि। संस्कृतविषये अहं .................. (8) परिश्रमं करोमि। पितृमहाभागानां (9)............प्रणामा: कथनीया:।

भवत्या: प्रिय: पुत्र:

10 .............

| मञ्जूषा |
|---|
| विद्यालयात्, सन्तोष:, अध्ययनस्य, घण्टाद्वयम्, विशेषतया चरणयो:, छात्रावासत:, उत्थाय, प्रणव:, पूर्णरूपेण |

**3. मञ्जूषाप्रदत्त-पदसहायतया अधोलिखितां कथां पूरयत–** **1/2×10=5**

एकदा शीतस्य भीषण: (i) ......... अभवत्। सम्राट् चन्द्रगुप्त: निश्चितवान् यत् निर्धनेभ्य: (ii) ......... वितरणं भवेत्। प्रधानमंत्री चाणक्य: तत्कार्यं (iii) ......... । भृत्या: सर्वान् कम्बलान् तस्य कुटीरे स्थापितवन्त: । रात्रौ केचन चौरा: कम्बलान् (iv) .... ..... तस्य कुटीरं प्राविशन्। ते अपश्यन् यत् चाणक्य: एकस्मिन् कटे कम्बलं विना एव (v) ......। तस्मिन् एव क्षणे (vi) .......... पदध्वनिं श्रुत्वा प्रबुद्ध:। (vii) ........ तम् अपृच्छन्- 'भवतां समीपे कम्बलानां राशि: अस्ति तथापि भवान् कम्बलं विना एव (viii)............।' चाणक्य: अवदत्–'श्रृणुत! एते प्रावारका: केवलं निर्धनेभ्य: वितरणार्थम् एव सन्ति। यदि अहम् एतेषु एकं (ix)........ तर्हि अहम् अपि चौर: भविष्यामि।' नतमस्तका चौरा: तस्य पादयो: पतित्वा (x).............. अकुर्वन्।

| मञ्जूषा |
|---|
| स्वीकृतवान्, चोरयितुं, स्वीकरोमि, क्षमायाचनाम्, प्रकोप:, कम्बलानां, सुप्त:, चाणक्य: चौरा:, स्वपिति |

**अथवा**

**अधोलिखितसंवादे रिक्तस्थानानि पूरयन्तु।** **1×5=5**

**अनीश:** – नमस्ते! किं कुशला त्वम्?

रमा–आम्! (i) ..............................

**अनीशः**-किं तव समीपे संगणकयंत्रम् अस्ति?

**रमा**–आम्! (ii) ..............................

**अनीशः** (iii) ............................

**रमा**–त्रिंशत् सहस्ररूप्यकाणि।

**अनीशः** किम् एतेषाम् रूप्यकाणां व्ययः सार्थकः अस्ति न वा?

**रमा**– (iv) .................................। अद्यत्वे त्वं यंत्रे अनेकानि कार्याणि कर्तुं पारयसि।

**अनीशः**– अहम् अपि गृहं गत्वा कमपि उपायं चिन्तयामि येन मम पिता अपि मम निवेदनं स्वीकुर्यात्।

**रमा**– (v) ..................................

4. **निम्नलिखित वाक्येषु केषाञ्चन पञ्चवाक्यानां संस्कृतेन अनुवादं कुरुत- (केवलं वाक्यपञ्चकम्)** **1×5=5**

1. भारत हमारा देश है।
1. India is our country.
2. सभी स्वस्थ हों।
2. Everyone Be healthy.
3. सभी बालक विद्यालय जाते हैं।
3. All Children are going to school.
4. संस्कृत सभी भाषाओं की जननी है।
4. Sanskrit is mother of all languages.
5. पूरी पृथ्वी ही परिवार की तरह है।
5. Whole Earth is like a family.
6. जल का संरक्षण अति आवश्यक है।
6. Water conservation is necessary.

7. गुणी व्यक्ति ही गुण को जानता है।

7. Only able person knows the importance of good qualities.

## खण्डः (ग)

## अनुप्रयुक्तव्याकरणम् 20

5. **अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं सन्धिपदं सन्धिविच्छेदं वा कुरुत (केवलं प्रश्नषट्कम्)** 1×6=6

(i) **मातृदेवो** भव ।

(ii) अथ कुत **उत्पन्नोऽयं** दोषः?

(iii) तत् किं नाज्ञायि **अद्यापि** भवता।

(iv) **यद्यहं** राज्यलक्ष्मीभारधारणसमर्थं सहोदरमपहाय राज्यं पुत्राय प्रयच्छामि,

(v) स्वशिशूनां चरित्रनिर्माणं **मातुराधीनम्।**

(vi) **ईश्वरोऽहमहं** भोगी।

(vi) **न + एकेन** अपि समं गता वसुमती।

6. **अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं समस्तपदं विग्रहवाक्यं वा प्रदत्तविकल्पेभ्यः चिनुत- (केवलं प्रश्नपञ्चकम्)** 1×5=5

(i) लक्ष्मणः सक्रोधम् अवदत्।

(क) क्रोधेन सहितम्, (ख) क्रोधम् सह

(ग) क्रोधस्य सहितम् (घ) क्रोधस्यसहितम्

(ii) यस्याः भर्ता शक्रसमः अस्ति।

(क) शक्रेण समः (ख) शक्राय समः

(ग) शक्रं समः (घ) शक्रात् समः

(iii) कथमस्मान् संन्यासनोऽपि कठोरभाषणैः तिरस्करोषि?

(क) कठोरैः भाषणैः (ख) कठोर भाषणैः

(ग) कठोरं भाषणम् इति (घ) कठोरेण भाषणैः

(iv) <u>भोजनान्ते</u> विषापहम्।

(क) भोजनस्य अन्ते (ख) भोजनम् अन्ते

(ग) भोजनम् नान्ते (घ) भोजनेन अन्ते

(v) गुणी गुणं वेत्ति न वेत्ति <u>निर्गुणः</u>।

(क) गुणेन सहितम् (ख) निर्गुणः इति

(ग) गुणानाम् अभावः (घ) निर्गुणेन सह

(vi) अहो शोभनं गन्धर्वराजविश्वावसोः <u>राजोद्यानम्</u>।

(क) राजायाः उद्यानम् (ख) राज्ञः उद्यानम्

(ग) राज उद्यानम् (घ) राज्ञम् उद्यानम्

(vii) <u>अहिंसा</u> सत्यमक्रोधस्त्यागः शांतिरपैशुनम्।

(क) न हिंसा (ख) हिंसया सहितम्

(ग) हिंसायाः अभावः (घ) अहिंसा इति

**7. अधोलिखितवाक्येषु रेखाङ्क्तिपदानां समुचितं संयोजितं विभाजितं वा प्रकृति प्रत्ययं प्रदत्तविकल्पेभ्यः चिनुत- (केवलं प्रश्नषट्कम्) 1×6=6**

(i) अपौरुषेयं <u>श्रुतिः</u>।

(क) श्रु + क्तिन् (ख) श्रु + ति

(ग) श्रुत + इ (घ) श्रु + ङीप्

(ii) अहं <u>बलवान्</u> सिद्धः सुखी च अस्मि।

(क) बल + वान् (ख) बल + आन्

(ग) बल + मतुप् (घ) बल + क्तवतु

(iii) समीपमागत्य संन्यासिना <u>उक्तम्</u>।

(क) वच् + क्त (ख) उच् + क्त

(ग) वक् + क्त (घ) वच् + क्तवतु

(iv) कर्माणि <u>(आ + रभ+ शानच्)</u> पुरुष श्रीः निषेवेते।

(क) आरभमाणम् (ख) आरभशानच्

(ग) आरभाणम् (घ) आरभाप्मान्

(v) अहम् ईश्वरः, अहम्( भोग +इन)।

(क) भोगिनि (ख) भोगन्

(ग) भोगी (घ) भोगिनः

(vi) अभिजातस्य संयम् अलोलुपत्वम् इति दैवी संपदं भवन्ति।

(क) अलोलुप + त्वम् (ख) अलोलुप + तव

(ग) अलोलुप + त्व (घ) लोलुप + तल्

(vii) या च मया पुत्रवती।

(क) पुत्रवत् + ङीप् (ख) पुत्र + ङीप्

(ग) पुत्रवति + ङीप् (घ) पुत्र + क्तिन्

**8. समुचितं उपपदविभक्तिरूपं चिनुत- ( केवलं प्रश्नत्रयम् )** **1×3=3**

(i) .............. न प्रमदितव्यम्।

(क) स्वाध्यायेन (ख) स्वाध्यायात्

(ग) स्वाध्यायम् (घ) स्वाध्यायस्य

(ii) अतः परं मातुः ......... श्रोतुं न इच्छामि।

(क) परिवादं (ख) परिवादाय

(ग) परिवादः (घ) परिवादेन

(iii) धिक्! ................ अविज्ञाय उपालभसे।

(क) अस्मदं (ख) अस्मान्

(ग) अहम् (घ) मह्यम्

(iv) राजा राज्यं ....... दत्वा तदुत्सङ्गे भोजमात्मानं च मुमोच।

(क) मुञ्जम् (ख) मुञ्जाय

(ग) मुञ्जस्य (घ) मुञ्जेन

## पठितावबोधनम्

**9. अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत-** **5**

पुरा धाराराज्ये सिन्धुल-संज्ञो राजा चिरं प्रजाः पर्यपालयत्। तस्य वार्धक्ये भोज इति पुत्रः समजनि। सः यदा पञ्चवार्षिकस्तदा पिता ह्यात्मनो जरां ज्ञात्वा मुख्यामात्यानाहूयानुजं

मुञ्जं महाबलमालोक्य पुत्रं व बालं संवीक्ष्य विचारयामास-यदि राज्यलक्ष्मीभारधरणसमर्थं सहोदरमपहाय राज्यं पुत्राय प्रयच्छामि, तदा लोकापवादः।
अथवा बालं मे पुत्रं मुञ्जो राज्यलोभाद्विषादिना मारयिष्यति तदा दत्तमपि राज्यं वृथा। पुत्रहानिर्वशोच्छेदश्च इति विचार्य राज्यं मुञ्जाय दत्त्वा तदुत्सङ्गे भोजमात्मानं मुमोच। ततः क्रमात् राजनि दिवंगते संप्राप्तराज्य-संपत्तिर्मुञ्जो मुख्यामात्यं बुद्धिसागरनामानं व्यापारमुद्रया दूरीकृत्य तत्पदेऽन्यं नियोजयामास। अथ कदाचन सभायां ज्योतिः-शास्त्रपारंगतः कश्चन ब्राह्मणः समागम्य राजानम् आह-देव! लोकाः मां सर्वज्ञं कथयन्ति। तत्किमपि यथेच्छं पृच्छ।

1. **एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्)** **1/2×2=1**
   (i) राज्ञः नाम किम् आसीत्?
   (ii) सभायाम् आगतः ब्राह्मणः कस्मिन् शास्त्रे पारंगत आसीत्?
   (iii) कः प्रजाः पर्यपालयत्?
2. **पूर्णवाक्येन उत्तरत– (केवलं प्रश्नद्वयम्)** **1×2=2**
   (i) राजा किं विचार्य राज्यं मुञ्जाय दत्तवान्?
   (ii) लोकाः कं सर्वज्ञं कथयन्ति?
   (iii) मुञ्जः कं व्यापारमुद्रया दूरीकृत्य तत्पदेऽन्यं नियोजयामास?
3. **भाषिककार्यम्– (प्रश्नद्वयम्)** **1×2=2**
   (क) "राजा चिरं प्रजाः पर्यपालयत्।" अत्र क्रियापदं किम्?
   (ख) "मुख्यामात्यं बुद्धिसागरनामानं" अनयोः पदयोः विशेष्यपदं किम्?
   (ग) अत्र 'मृते' इत्यर्थे किं पदं प्रयुक्तम्?

10. **अधोलिखितं पद्यं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत-** **5**

आरभेत हि कर्माणि श्रान्तः श्रान्तः पुनः पुनः।
कर्माण्यारभमाणं हि पुरुषं श्रीर्निषेवते।।

**(अ) एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्)** **1/2×2=1**
   (i) कानि आरभेत?
   (ii) कं श्रीः निषेवते?
   (iii) पुरुषं का निषेवते?

(आ) पूर्णवाक्येन उत्तरत- (केवलं प्रश्नैकम्) 2×1=2

(i) कर्माणि कथम् आरभेत?

(ii) श्री: कीदृशं पुरुषं निषेवते?

(इ) भाषिककार्यम् - (प्रश्नद्वयम्) 1×2=2

(क) 'पुरुषं श्रीर्निषवते' अत्र क्रियापदं किम्?

(ख) 'आरभमाणं पुरुषं' अनयो: पदयो: विशेषणपदं किम्?

(ग) अत्र 'लक्ष्मी:' इत्यर्थे किं पदं प्रयुक्तम्?

11. **अधोलिखितं नाट्यांशं पठित्वा तदाधारितान प्रश्नान् संस्कृतेन उत्तरत-** 5

**कुण्डला**- जाने तेऽभिरुचिम् अध्ययने अध्यापने च। परं यथा लतेयं सहकारमवलम्बते तथैव नारी जीवनयात्रायां कमपि सहचरम् अपेक्षते य: तस्या: अवलंबनं स्यात्।

**मदालसा**- नास्ति मत्कृते आवश्यकता अवलम्बनस्य। स्वयं समर्था जीवनपथे चलितुमहम्। न कस्यापि सङ्केतै: नर्तितुं पारयामि।

**कुण्डला**- नर्तिष्यसि तदा एकाकिनी एव।

(विहस्य) यदि त्वं शीघ्रमेव पतिगृहं गमिष्यसि तदा एकाकिनी भविष्यामि।

**मदालसा**- परम् एक: उपाय: अपि चिन्तत: मया।

**कण्डला**- क: उपाय?

**मदालसा**- सङ्गीतसाहित्यमाध्यमेन ब्रह्मविद्यां सरसां विधाय बहुभ्य: शिशुभ्य: शिक्षणं प्रदास्यामि।

(अ) **एकपदेन उत्तरत** 1/2×2=1

(i) मदालसा केभ्य: शिक्षणं प्रदास्याति?

(ii) कुण्डला मदालसाया: किं जानाति?

(iii) नारी कुत्र कमपि सहचरम् अपेक्षते।

(आ) **पूर्णवाक्येन उत्तरत** 2×1=2

(i) कुण्डला (विहस्य) मदालसां किं कथयति?

(ii) नारी किम् अपेक्षते?

(iii) केन माध्यमेन मदालसा बहुभ्य: शिशुभ्य: शिक्षणं प्रधस्यति?

(ग) **भाषिककार्यम्- (प्रश्नद्वयम्)** 1×2=2

(क) 'शिशुभ्य: शिक्षणं प्रदास्यामि।' अत्र क्रियापदं किम्?

(ख) 'एक: उपाय:' अनयो: पदयो: विशेष्यपदं किम्?

(ग) अत्र 'बालकेभ्य:' इत्यर्थे किं पदं प्रयुक्तम्?

**12. अधोलिखितस्य पद्यस्य भावार्थं मंजूषाप्रदत्तपदैः पूरयित्वा पुनः लिखत-** **3**

एकेनापि सुपुत्रेण विद्यायुक्तेन साधुना।
आह्लादितं कुलं सर्वं यथा चन्द्रेण शर्वरी।।

**भावार्थः**–एकेन अपि (i) ............................... विद्यासहितेन (ii) ............................ सम्पूर्णः वंशः (iii) .......................... (भवति) येन प्रकारेण चन्द्रमसा रात्रिः (प्रसन्ना भवति)।

**मञ्जूषा**

| प्रसन्नः, सुतेन, सज्जनेन |
|---|

**प्रदत्त-भावार्थत्रयात् शुद्धं भावार्थं चित्वा लिखत-**

**(अ) दोषेषु यत्नः समुहान् खलानाम्।**

(i) महतां जनानां दोषषु यत्नः भवति।
(ii) दुष्टजनानां दोषेषु एव यत्नः भवति।
(iii) दुष्टकार्येषु प्रयत्नः न करणीयः।

**(आ) आढ्योऽभिजनवानस्मि कोऽन्यो सदृशो मया।**

(i) अहमेव परिवारसमृद्धः नास्मि अन्येऽपि सन्ति।
(ii) अभिमानिता मम पार्श्वेऽस्ति न कस्यापि।
(iii) अहं कुटुम्बयुक्तः धनवान्, मत्सदृशः अपरः कः?

**(इ) त्रिविधं नरकस्येदं द्वारम्।**

(क) नरकस्य द्वारं त्रिविधं कथितम्।
(ख) द्वारपालस्य नाम त्रिविधम् अस्ति।
(ग) नरकासुरस्य इदं द्वारम् अस्ति।

**13. अधोलिखित-अन्वये रिक्तस्थानानि पूरयत-** **3**

अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम्।
सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः।

**अन्वयः** शास्त्रम् (i) ----------परोक्षार्थस्य (ii) -------------(शास्त्रम्) सर्वस्य (iii) ---------न अस्ति सः अन्धः एव।

14. 'क' स्तम्भस्य वाक्यांशस्य 'ख' स्तम्भस्य वाक्यांशेन सह मेलनं कुरुत- 1/2×4=2

| 'क' स्तम्भः | 'ख' स्तम्भः |
|---|---|
| (i) दीर्घप्रयासेन कृतं हि वस्तु | (क) पत्न्याः सहयोगः अनिवार्यः। |
| (ii) लक्ष्म्याः रक्षार्थम् | (ख) तानि त्वयोपास्यानि। |
| (iii) यान्यस्माकं सुचरितानि | (ग) स्वाध्यायस्तप आर्जवम्। |
| (iv) दानं दमश्चयज्ञश्च | (घ) निमेषमात्रेण भजेद् विनाशम्। |

15. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसंगानुसारं प्रदत्तविकल्पेभ्यः समुचितम् उत्तरं चिनुत। (केवलं प्रश्नचतुष्टयम्) 1/2×4=2

(i) त्यागाय संभृतार्थानां सत्याय **मितभाषिणाम्**।

(ii) असौ मया **हतः** शत्रुः

(iii) मदालसे! **तूष्णीं** किमर्थं तिष्ठसि।

(iv) वस्तु **निमेषमात्रेण** विनाशं भजेत।

(v) **दिष्ट्या** वर्धेथा युवाम्।

**मञ्जूषा**

| मारितः, शान्ता, अल्पभाषिणाम्, सौभाग्येन, क्षणमात्रेण |
|---|

## संस्कृतसाहित्येतिहासपरिचयः

16. समुचितस्य रचनायाः कवेः वा अभिधानं चिनुत- (केवलं प्रश्नत्रयम्)
1×3=3

(i) "भोजप्रबन्धः" अस्याः रचनायाः लेखकः कः?

(ii) "अम्बिकादत्तव्यासः" अस्य लेखकस्य रचना का?

(iii) "आचार्या वेदकुमारी घई" कं पाठ्यांशं लिखितवती?

(iv) ''नैकेनापि समं गता वसुमती'' अस्य पाठस्य रचयिता कः?

17. महाकाव्य-गद्य-चम्पूकाव्याधारितेषु वाक्येषु मञ्जूषातः रिक्तस्थानपूर्तिं कुरुत–
1×3=3

(i) "छन्दोयुक्तं" काव्यं ...................... कथ्यते?

(ii) "पुरन्ध्रीपञ्चकम्" इति ग्रन्थः ...................... उदाहरणम् अस्ति।

(iii) नाटके भरतवाक्यम् .................... भवति।

(iv) गद्यकाव्यस्य ............... भेदौ स्तः।

**मञ्जूषा**

| |
|---|
| द्वौ, अन्ते, पद्यम्, रुपकस्य |

18. **नाट्य-तत्त्वानां समुचितं वैशिष्ट्यं मञ्जूषायाः चित्वा वाक्यानि पूरयत– ( केवलं प्रश्नचतुष्टयम् )** **1×4=4**

(i) संस्कृतनाटकानि .................... भवन्ति।

(ii) नाटके ..................... हास्यपात्रम् भवति।

(iii) नाटकस्य प्रारम्भे .......................... भवति।

(iv) कालिदासस्य प्रसिद्ध नाटकं ....................... अस्ति।

(v) ...................... नाटकस्य अन्ते भवति।

**मञ्जूषा**

| |
|---|
| मंगलाचरणम्, विदूषकः, सुखान्तानि, अभिज्ञानशकुन्तलम्, भरतवाक्यम् |

## अभ्यासप्रश्नपत्रम् -3
## ( 2023-24 )
## संस्कृतम्–केन्द्रिकम् - कोड न. 322
## कक्षा–द्वादशी (XII)
## 80 अङ्का:
## समय: होरात्रयम् (Three hours)
## अपठित – अवबोधनम्
## खण्ड ( क ) 10

**1. अधोलिखितं गद्यांशं पठित्वा दत्त-प्रश्नान् संस्कृतेन उत्तरत-** **10**

परीक्षाया: दिनानि अतिविचित्राणि भवन्ति। यथा-यथा परीक्षाकाल: समीपम् आयाति तथा-तथा छात्राणां हृदयगति: वर्धते। परीक्षा प्रायश: छात्रेभ्य: भयप्रदा एव प्रतीयते। अस्मिन् काले निद्रा न आयाति। बुभुक्षापि सम्यक्प्रकारेण नानुभूयते। कदाचित् कस्मिंश्चित् विषये अभ्यासाल्पता प्रतीयते कदाचिच्च अन्यस्मिन्। मस्तिष्क: सदैव तनावयुक्त: एव प्रतीयते। न केवलं छात्राणाम् अपितु तेषाम् अभिभावकानामपि दशा एतादृशी एव भवति। परन्तु ये छात्रा: कक्षायां दत्तावधाना: तिष्ठन्ति, वर्षस्य प्रारम्भात् एव पठितस्य अभ्यासं कुर्वन्ति, ते सर्वथा शान्तमनसा सरलतया च उत्तमांकै: परीक्षाम् उत्तरन्ति। अत: सर्वै: छात्रै: एवमेव आचरणीयम्।

**1.( अ ) एकपदेन उत्तरत ( केवलं प्रश्नद्वयम् )** **1×2=2**

(i) परीक्षाकाले का न आयाति?

(ii) कस्या: दिनानि अतिविचित्राणि भवन्ति?

(iii) क: सदैव तनावयुक्त: एव प्रतीयते?

**( आ ) पूर्णवाक्येन उत्तरत ( केवलं प्रश्नद्वयम् )** **2×2=4**

(i) परीक्षाकाले किं किं भवति?

(ii) कीदृशा: छात्रा: उत्तमाङ्कै: परीक्षाम् उत्तरन्ति?

(iii) परीक्षा प्रायश: छात्रेभ्य: कीदृशी प्रतीयते?

**( इ ) अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत-** **1×1=1**

(ई) **विकल्पेभ्य: चित्वा निर्देशानुसारम् उत्तरत- (केवलं प्रश्नत्रयम्)**

**1×3=3**

(i) "ये छात्रा: कक्षायां दत्तावधाना: तिष्ठन्ति" अत्र क्रियापदं किम्?

(क) तिष्ठन्ति (ख) कक्षायाम्

(ग) छात्रा: (घ) दत्तावधाना:

(ii) "सदैव मस्तिष्क: तनावयुक्त: एव प्रतीयते" अत्र विशेष्यपदं किम्?

(क) सदैव (ख) तनावयुक्त:

(ग) प्रतीयते (घ) मस्तिष्क:

(iii) "यथा-यथा परीक्षाकाल: समीपम् आयाति" अत्र कर्तृपदं किम्?

(क) यथा-यथा (ख) परीक्षाकाल:

(ग) समीपम् (घ) आयाति

(iv) "दूरम्" इत्यस्य विलोमपदम् लिखत?

(क) भयप्रदा (ख) कक्षायाम्

(घ) परीक्षा (ग) समीपम्

## खण्ड: (ख)

## रचनात्मककार्यम् 15

2. **विद्यालय-परित्याग-प्रमाणपत्रं प्राप्तुं प्रधानाचार्यं प्रति लिखितेऽस्मिन् प्रार्थनापत्रे रिक्तस्थानानि मञ्जूषायां प्रदत्त-पदानां सहायतया पूरयत-** ½×10=5

(i) ..........................

प्रधानाचार्य:,

राजकीय: (ii) .............. ,नव देहली।

मान्या: महोदया:!

सविनयं निवेदनम् अस्ति यत् अस्मिन् वर्षे (iii) ........... भगिनी अध्ययनार्थं जयपुरं (iv) .........। अहमपि पठनाय (v) ......... गन्तुम् इच्छामि। अत: भवन्त: (vi)........... यत् (vii) .......... विद्यालय-परित्याग- (viii) ........ यच्छन्तु। एतदर्थम् अहं भवत: (ix) .. ......... स्थास्यामि।

धन्यवाद:।

भवदीय: (x) .......

संजय:

दिनाङ्क: ..................

**मञ्जूषा**

| |
|---|
| विद्यालय:, मह्यम्, मम, शिष्य:, अनुगृहीत:, प्रमाणपत्रम्, गता, तत्र, प्रार्थ्यन्ते, सेवायाम् |

**3. मञ्जूषाप्रदत्त-पदसहायतया अधोलिखितां कथां पूरयत्-** **½×10=5**

एकदा एक: चित्रकार: स्व चित्राणाम् (i) ......... कृतवान्। तां द्रष्टुं नगरस्य (ii) .......... जना: तत्र समाच्छन्। एका बाला अपि चित्रं द्रष्टुम् आगता। सा अन्ते एकं (iii) ......... दृष्टवती यस्य मुखं तु केशाच्छन्नम् आसीत्, पादयो: च आस्ताम् (iv) ...........। मूले च लिखितम् 'अवसर:'। बाला तं चित्रकारं (v) ......... अपृच्छत्। चित्रकार: अवदत- एष: अवसर: अस्ति। बाला आच्छन्नस्य मुखस्य विषये यदा अपृच्छत् तदा चित्रकार: अवदत्- सर्वेषां जीवने अवसर: (vi) ............ आगच्छति परं सामान्यतया जना: तं न (vii) ..........। यदा अवसर: (viii) .......... प्रक्षिप्य गच्छति तदा न (ix) ..........। बाला चित्रस्य रहस्यं (x) ............. तस्मात् एव दिनात् प्रगते: अवसरं प्रतीक्षितुम् आरभत्।

**मञ्जूषा**

| |
|---|
| प्रत्यावर्तते, ज्ञात्वा, यदा, परिचिन्वन्ति, प्रदर्शनीवत्, तद्विषये, पक्षौ, चित्रम्, अनेके, प्रदर्शनीम् |

**अथवा**

**अधोलिखिते संवादे रिक्तस्थानानि पूरयत-** **1×5=5**

शोभा– अरुण! कुत: प्राप्तम् इदं चित्रम्?

अरुण:– (i) .......................................।

शोभा– शिक्षकमहोदय: प्रदत्तवान्? इदं कस्य महापुरुषस्य चित्रम् अस्ति?

अरुण:– (ii) .......................................।

शोभा– अहो! आचार्य चाणक्यस्य? लिखितम् अर्थशास्त्रम् अतीव प्रसिद्धम्। तेन अपर: अपि ग्रन्थ: लिखित:?

अरुण:– (iii) .........................................।

शोभा– आम्, आम्, स्मृतम्। अस्मिन् ग्रन्थे चाणक्यस्य नीतिवचनानि लिखितानि। जानासि स: कस्य गुरु: आसीत्?

अरुण:– (iv) .............................................।

शोभा– सम्यक् उक्तं त्वया। चन्द्रगुप्त: चाणक्य: च मिलित्वा कं पराजितवन्तौ?

अरुण:– (v) .................................................।

शोभा- बहु शोभनम्। राजा नन्दः अत्याचारी अपि आसीत्। तस्य पराजयेन सर्वे जनाः प्रसन्नाः अभवन्।

4. **निम्नलिखितेषु केषाञ्चन पञ्चवाक्यानां संस्कृतेन अनुवादं कुरुत- (केवलं वाक्यपञ्चकम्)** 1×5=5

1. विद्यालय के चारों ओर वृक्ष हैं।

   There are trees all-around the school.

2. गांव के समीप नदी बहती है।

   A river flows near the village

3. आरक्षी पीड़ित की रक्षा करता है।

   Police rescues the victim.

4. शिक्षक छात्र को पुस्तक देते हैं

   The teacher gives books to the student.

5. वृक्ष से पत्ते गिरते हैं।

   Leaves fall down from the tree.

6. सफलता के लिए परिश्रम करो।

   Do hard work to get success.

7. मैं मित्र के साथ उद्यान में घूमती हूं।

   I walk in the garden with my friend.

## खण्डः (ग)

**अनुप्रयुक्तव्याकरणम्** **अङ्काः20**

5. **अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं सन्धिं सन्धिविच्छेदं वा कुरुत- (केवलं प्रश्नषट्कम्)** 1×6=6

(i) वनगमननिवृत्तिः पार्थिवस्य+एव तावत्।

(ii) यान्यनवद्यानि कर्माणि तानि सेवितव्यानि।

(iii) शैशवेऽभ्यस्तविद्यानां रघूणाम् अन्वयं वक्ष्ये।

(iv) गन्धर्वराजविश्वावसोः राजा+उद्यानम्।

(v) तस्मादेतत् त्रयं त्यजेत्।

(vi) सुमित्रमातः इतः+तावत्।

(vii) स्वाध्यायान्मा प्रमदः।

6. **अधोलिखितवाक्येषु रेखाङ्कितपदानाम् उचितं समस्तपदं विग्रह-वाक्यं वा प्रदत्तविकल्पेभ्यः चिनुत- ( केवलं प्रश्नपञ्चकम् )** 1×5=5

(i) अस्माकं सुचरितानि त्वयोपास्यानि।

(क) सु चरितानि (ख) शोभनानि चरितानि

(ग) शोभनं चरितम् (घ) शोभनं चरितानि

(ii) क एष माम् अनुत्तरयन् समायाति।

(क) अन् उत्तरयन् (ख) अनुत्तरयन्

(ग) अन उत्तरयन् (घ) न उत्तरयन्

(iii) स्वयं समर्था जीवनपथे चलितुमहम्।

(क) जीवनं पथे (ख) जीवनाय पथे

(ग) जीवनस्य पथे (घ) जीवनात् पथे

(iv) सापराधमपि मे वचः क्षन्तव्यम्।

(क) अपराधं समम् (ख) सह अपराधं

(ग) अपराधेन सहितम् (घ) स अपराधम्

(v) तत् किमपि इच्छाम् अनतिक्रम्य पृच्छ।

(क) इच्छामनतिक्रम्य (ख) इच्छानुसारम्

(ग) यथेच्छाम् (घ) यथेच्छम्

(vi) अङ्गुलीव उरगेण क्षता।

(क) उरगेणक्षता (ख) उरगक्षता

(ग) उरगक्षतम् (घ) उरगक्षणा

7. **अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं संयोजितं विभाजितं वा प्रकृति प्रत्ययं प्रदत्तविकल्पेभ्यः चिनुत- ( केवलं प्रश्नषट्कम् )** 1×6=6

(i) रोदितव्ये काले सौमित्रिणा धनुर्गृहीतम्।

(क) रुद् + तव्यत् (ख) रोद् + तव्यत्

(ग) रोदि + तव्ये (घ) रोदि + तव्यत्

(ii) दौवारिकस्तु तमाकृष्य नी+शतृ प्रचलितः।

(क) नीशत् (ख) नयत्

(ग) नयन् (घ) नयन्ती

(iii) गुण + इनि गुणं वेत्ति।

(क) गुणिन् (ख) गुणिनि

(ग) गुणिनौ (घ) गुणी

(iv) नैकेनापि समं गता वसुमती।

(क) वसुमत् + ई (ख) वसुमत् + ङीप्

(ग) वसु + मती (घ) वसुमत् + इनि

(v) परम् एकः उपायः चिन्तितः मया।

(क) चिन्ति + तः (ख) चिन्त् + तः

(ग) चिन्त् + क्त (घ) चिन्ति + क्तः

(vi) हन्त! निवेदितम् अप्रभुत्वम्।

(क) अप्रभु + त्वम् (ख) अप्रभु+तल्

(ग) प्रभु + त्व (घ) अप्रभु + त्व

(vii) सत्यात् न प्रमदितव्यम्।

(क) प्र+मदि+तव्यम् (ख) प्रमदि+तव्यम्

(ग) प्र+मद्+तव्यत् (घ) प्र+मदि+तव्यत्

**8. समुचितम् उपपद-विभक्तिरूपं चिनुत-(केवलं प्रश्नत्रयम्)** 1×3=3

(i) ................ सह सीता वनं गन्तुम् इच्छति।

(क) रामम् (ख) रामेण

(ग) रामाय (घ) रामात्

(ii) आचार्येति पदं प्राप्य ............. जीवनकलां शिक्षयिष्यामि।

(क) शिष्यैः (ख) शिष्याणाम्

(ग) शिष्याः (घ) शिष्येभ्यः

(iii) वयं शिववीरस्याज्ञां ................. वहामः।

(क) शिरसा (ख) शिरसे

(ग) शिरसः (घ) शिरः

(iv) कश्चन कापालिकः ..................... समागतः।

(क) सभां (ख) सभया

(ग) सभायै (घ) सभायाम्

## खण्डः ( घ )

**पठितावबोधनम्** **अङ्काः 25**

**9. अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत- 5**

राज्ञः वह्निप्रवेश-कार्यक्रमं श्रुत्वा वत्सराजः बुद्धिसागरं नत्वा शनैः शनैः प्राह- तात! मया भोजराजो रक्षित एवास्ति। पुनः बुद्धिसागरेण तस्य कर्णे किमपि कथितम्, यन्निशम्य वत्सराजः ततो निष्क्रान्तः। पुनः राज्ञो वह्निप्रवेशकाले कश्चन कापालिकः सभां समागतः। सभामागतं कापालिकं दण्डवत् प्रणम्य मुञ्जः प्रावोचत्-हे योगीन्द्र! मया हतस्य पुत्रस्य प्राणदानेन मां रक्षेति। अथ कापालिकस्तं प्रावोचत्-राजन्! मा भैषीः। शिवप्रसादेन सः जीवितो भविष्यति। तदा श्मशानभूमौ कापालिकस्य योजनानुसारं भोजः तत्र समानीतः। 'योगिना भोजो जीवित:इति कथा लोकेषु प्रसृता।

**( अ ) एकपदेन उत्तरत-( केवलं प्रश्नद्वयम् )** **½×2=1**

(i) भोजः कुत्र समानीतः?

(ii) राज्ञः वह्निप्रवेशकाले कः सभां समागतः?

(iii) भोजः कस्य प्रसादेन जीवितो भविष्यति?

**( आ ) पूर्णवाक्येन उत्तरत-( केवलं प्रश्नद्वयम् )** **1×2=2**

(i) वत्सराजः बुद्धिसागरं नत्वा किं प्राह?

(ii) लोकेषु का कथा प्रसृता?

(iii) मुञ्जः कापालिकं किं प्रार्थयत्?

**( इ ) यथानिर्देशं प्रश्नान् उत्तरत-( केवलं प्रश्नद्वयम् )** **1×2=2**

(i) "अग्निः" इति पदस्य किं समानार्थकपदं गद्यांशे प्रयुक्तम्?

(ii) "मया हतस्य पुत्रस्य प्राणदानेन मां रक्षेति" इति वाक्ये किं विशेषणपदम्?

(iii) "शिवप्रसादेन सः जीवितो भविष्यति" इति वाक्ये 'सः' इति सर्वनामपदं कस्मै प्रयुक्तम्?

**10. अधोलिखितं पद्यं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत- 5**

अल्पज्ञ एव पुरुषः प्रलपत्यजस्रं

पाण्डित्यसंभृतमतिस्तु मितप्रभाषी।
कांस्यं यथा हि कुरुतेऽतितरां निनादं
तद्वत्सुवर्णमिह नैव करोति नादम् ।।

**( अ ) एकपदेन उत्तरत-( केवलं प्रश्नद्वयम् )** ½×2=1

(i) अतितरां निनादं कः करोति?
(ii) अल्पज्ञः पुरुषः कथं प्रलपति?
(iii) पाण्डित्यसंभृतमतिः कीदृशः भवति?

**( आ ) पूर्णवाक्येन उत्तरत-( केवलं प्रश्नद्वयम् )** 1×2=2

(i) कः पुरुषः अजस्रं प्रलपति?
(ii) कांस्यवत् नादं कः न करोति?
(iii) अल्पज्ञ-पण्डितयोः मध्ये कः भेदः?

**( इ ) यथानिर्देशं प्रश्नान् उत्तरत-( केवलं प्रश्नद्वयम् )** 1×2=2

(i) "निरन्तरम्" इति पदस्य किं समानार्थकपदं श्लोके प्रयुक्तम्?
(ii) "अल्पज्ञ एव पुरुषः प्रलपत्यजस्रम्" इति वाक्ये किं विशेषणपदम्?
(iii) "विद्वान्" इति पदस्य विलोमपदं श्लोकात् चित्वा लिखत।

**11. अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत-** 5

**मदालसा**- (हसित्वा) नहि जानन्ति ते यदहं विवाहबंधनं स्वीकर्तुं न इच्छामि।
**कुण्डला**- किं करिष्यसि तदा?
**मदालसा**- ब्रह्मवादिनी भविष्यामि।आचार्येति पदं प्राप्य शिष्येभ्यः जीवनकलां शिक्षयिष्यामि।
**कुण्डला**- जाने तेऽभिरुचिम् अध्ययने- अध्यापने। परं यथा लतेयं सहकारमवलम्बते तथैव नारी जीवनयात्रायां कमपि सहचरमपेक्षते यः तस्याः अवलम्बनं स्यात्।
**मदालसा**- नास्ति मत्कृते आवश्यकता अवलंबनस्य। स्वयं समर्था जीवनपथे चलितुमहं न कस्यापि संकेतैः नर्तितुं पारयामि।

**( अ ) एकपदेन उत्तरत-( केवलं प्रश्नद्वयम् )** ½×2=1

(i) मदालसा किं स्वीकर्तुं न इच्छति?
(ii) सा केभ्यः जीवनकलां शिक्षयिष्यति?
(iii) लता कम् अवलम्बते?

**( आ ) पूर्णवाक्येन उत्तरत-( केवलं प्रश्नद्वयम् )** 1×2=2

(i) नारी जीवनयात्रायां कम् अपेक्षते?

(ii) मदालसा किं कर्तुं न पारयति?

(iii) कुत्र चलितुं मदालसा समर्था?

**(इ) यथानिर्देशं प्रश्नान् उत्तरत( केवलं प्रश्नद्वयम् )** 1×2=2

(i) "आम्रम्" इति पदस्य किं समानार्थकपदं नाट्यांशे प्रयुक्तम्?

(ii) "यत् अहं विवाहबंधनं स्वीकर्तुं न इच्छामि" इति वाक्ये 'अहम्' इति सर्वनामपदं कस्यै प्रयुक्तम्?

(iii) "असमर्था" इति पदस्य विलोमपदं श्लोकात् चित्वा लिखत।

**12. अधोलिखितस्य पद्यस्य भावार्थं मञ्जूषा- प्रदत्तपदैः पूरयित्वा पुनः लिखत–** 1×3=3

अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम्
सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः।।

**भावार्थः-**

विद्या अनेकानां (i) ......... निराकरणं करोति। यत् नेत्रयोः समक्षं नापि स्थितम्, तमपि (ii) ...........। वस्तुतः (iii) ................ एव वास्तविकं नेत्रम् भवति। यः अज्ञानी भवति सः अन्धेन समं भवति।

**मञ्जूषा**

| दर्शयति, सन्देहानाम्, ज्ञानम् |
|---|

**अथवा**

**प्रदत्त-भावार्थत्रयात् शुद्धं भावार्थं चित्वा लिखत-** 1×3=3

**(1) "नैकेनापि समं गता वसुमती नूनं त्वया यास्यति।"**

(i) मृत्योः अनन्तरम् एषा पृथिवी केनापि सह न गतवती निश्चितमेव त्वया सह गमिष्यति।

(ii) एषा पृथिवी अनेकैः सह गमिष्यति।

(iii) एषा वसुमती कदापि न गच्छति।

**(2) "एकेनापि सुपुत्रेण सिंही स्वपिति निर्भयम्।"**

(i) गुणवता पुत्रेण एव माता निर्भया भवति।

(ii) पुत्रेण मातुः गौरवं न वर्धते।

(iii) गुणहीनेन पुत्रेण माता निर्भया भवति।

(3) "रोदितव्ये कालेसौमित्रिणा धनुर्गृहीतम्।"

(i) शोकस्य समये लक्ष्मण: युद्धाय तत्पर: अस्ति।

(ii) लक्ष्मण: रामस्य वनगमनं श्रुत्वा रोदिति।

(iii) सुमित्रा अपि वनं गच्छति।

**13. अधोलिखित-अन्वये रिक्तस्थानानि पूरयत-** **1×3=3**

कर्णामृतं सूक्तिरसं विमुच्य
दोषेषु यत्न: सुमहान् खलानाम्।
निरीक्षते केलिवनं प्रविश्य
क्रमेलक: कण्टकजालमेव।।

अन्वय:- खलानां 1. .................... सूक्तिरसं विमुच्य दोषेषु 2. .................. यत्न: (भवति) यथा क्रमेलक: केलिवनं प्रविश्य 3. .................. एव निरीक्षते।

**14. 'क' स्तम्भस्य वाक्यांशस्य 'ख' स्तम्भस्य वाक्यांशेन सह मेलनं कुरुत** **½×4=2**

| 'क' स्तम्भ: | 'ख' स्तम्भ: |
|---|---|
| (i) उत्साहसम्पन्नमदीर्घसूत्रं | (क) त्यागे श्लाघाविपर्यय:। |
| (ii) ज्ञानै मौनं क्षमा शक्तौ | (ख) हृदये स्वजनस्तथा। |
| (iii) दैवी संपद् विमोक्षाय | (ग) क्रियाविधिज्ञं व्यसनेष्वसक्तम्। |
| (iv) शरीरेऽरि: प्रहरति | (घ) निबन्धायासुरी मता। |

**15. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसंगानुसारं मञ्जूषात: समुचितम् उत्तरं चित्वा लिखत-** **1×4=4**

(i) शरीरे **<u>अरि:</u>** प्रहरति।।

(ii) यानि **<u>अनवद्यानि</u>** कार्याणि त्वया सेवितव्यानि।

(iii) यस्या: **<u>शक्रसमो</u>** भर्ता मया पुत्रवती च या।

(iv) आचार्य: **<u>अन्तेवासिनम्</u>** अनुशास्ति।

**मञ्जूषा**

| इन्द्रसम:, शिष्यम्, शत्रु:, अनिन्दितानि |
|---|

## संस्कृतसाहित्येतिहासपरिचयः 10

**16. अधोलिखितप्रश्नानाम् उत्तराणि लिखत– ( केवलं प्रश्नत्रयम् )** **1×3=3**

(i) "रघुवंशस्य" रचयिता कः?

(ii) भासेन कः ग्रन्थः रचितः?

(iii) अम्बिकादत्तव्यासस्य रचना का अस्ति?

(iv) "अनुशासनम्" इति पाठः कस्मात् उपनिषदः गृहीतः?

**17. महाकाव्य-गद्यकाव्य- चम्पूकाव्यस्य च विधानां समुचितं वैशिष्ट्यं मञ्जूषातः चयनं कृत्वा लिखत- ( केवलं प्रश्नत्रयम् )** **1×3=3**

(i) ................ चम्पूकाव्यं भवति।

(ii) ................. लयात्मकता भवति।

(iii) .................. दीर्घसमासानां प्रयोगः भवति।

(iv) गद्यकाव्यस्य ............ भेदौ स्तः।

**मञ्जूषा**

| |
|---|
| द्वौ, गद्यकाव्ये, पद्यकाव्ये, गद्यपद्यमयम् |

**18. नाट्य-तत्त्वानां समुचितं वैशिष्ट्यं मञ्जूषातः चित्वा रिक्तस्थानानि पूरयत( केवलं प्रश्नचतुष्टयम् )** **1×4=4**

(i) नाटकम् ................ रम्यम् भवति।

(ii) नाटकम् ................... भेदः अस्ति।

(iii) .................. अभिनयात्मकतायाः प्राधान्यं भवति।

(iv) नाटकस्य मुख्य-पुरुष-पात्रं .................. भवति।

(v) नाटकस्य अन्ते भवति ................।

**मञ्जूषा**

| |
|---|
| भरतवाक्यम्, काव्येषु, रूपकस्य, नाटके, नायकः |

## अभ्यास-प्रश्नपत्रम्-4 ( 2023-24 )
## कक्षा-द्वादशी
## संस्कृतम् ( केन्द्रिकम् ) ( कोड सं.-322 )

**समयः होरात्रयम्** **सम्पूर्णाङ्काः 80**

वार्षिकमूल्याङ्कनाय निर्मिते प्रश्नपत्रे भागपञ्चकं भविष्यति-

| | |
|---|---|
| 'क' भागः अपठित अवबोधनम् | 10 अङ्काः |
| 'ख' भागः रचनात्मकं कार्यम् | 15 अङ्काः |
| 'ग' भागः अनुप्रयुक्तं व्याकरणम् | 20 अङ्काः |
| 'घ' भागः | 35 अङ्काः |
| (i) पठितावबोधनम् | (25 अङ्काः) |
| (ii) संस्कृत-साहित्येतिहासस्य सामान्यः परिचयः | (10 अङ्काः) |

**सामान्यनिर्देशाः**

- उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
- प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
- सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
- प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

### भागः ( क )
### अपठितावबोधनम्

**1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तान् प्रश्नान् संस्कृतेन उत्तरत-** **10**

जननी शब्दमेव नेत्रयोः समक्षं वात्सल्यस्य कारुण्यौदार्यस्य स्नेहस्य च मूर्तिं स्थापयति। तथा एव मम जननी वर्तते। उच्चशिक्षिता सा विश्वविद्यालये अध्यापयति तथापि अहङ्कारं तु कुत्रापि किञ्चिदपि न दृश्यते। ममतापूर्णा सा अस्मभ्यं पुत्रेभ्यः पुत्रीभ्यः च सर्वदा सुलभा अस्ति। सा न केवलम् अस्माकम् आवश्यकतानां पूर्तिं करोति अपितु दुविधायाः काले अस्मभ्यम् उचितमार्गमपि दर्शयति। आबाल्यादेव माता अस्मान् पालयति संस्कारान् च शिक्षयति। परिवारे सर्वेषां सदस्यानां सेवां करोति। परिवारम् एकसूत्रे बध्नाति। मातुः स्थानं कः अन्यः लब्धुं शक्नोति। आत्मानम् अकिञ्चन मन्यमाना सा सर्वं कार्यं करोति। सत्यमेव उच्यते यत् लौकिके जगति ईश्वरः जननीरूपेण विद्यते।

**(अ) एकपदेन उत्तरत- ( केवलं प्रश्नद्वयम् )** **1×2=2**

(i) दुविधायाः काले जननी किं दर्शयति?

(ii) जननी कं एकसूत्रे बध्नाति?

(iii) का ममतापूर्णा अस्ति?

**(ब) पूर्णवाक्येन उत्तरत– (केवलं प्रश्नद्वयम्)** 2×2=4

(i) जननी इति शब्देन नेत्रयोः समक्षं किम् आयाति?

(ii) लौकिके जगति किं सत्यमेव उच्यते?

(iii) आबाल्यादेव माता किं करोति?

**(द) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत?** 1×1=1

**(स) यथानिर्देशम् उत्तरत- (केवलं प्रश्नत्रयम्)** 1×3=3

(i) 'पालयति' इति क्रियायाः कर्ता कः अस्ति?

(क) आबाल्यादेव (ख) माता

(ग) अस्मान् (घ) संस्कारान्

(ii) 'माता' इति पदस्य कि पर्यायपदम् अत्र प्रयुक्तम्?

(क) जननी (ख) अम्बा

(ग) पालिका (घ) जनयित्री

(iii) 'मिथ्या' इति पदस्य किं विलोमपदम् अत्र प्रयुक्तम्?

(क) अनृतम् (ख) सुलभा

(ग) सदा (घ) सत्यम्

(iv) अत्र 'सा' इति सर्वनामपदं कस्यै प्रयुक्तम्?

(क) मात्रे (ख) भगिन्यै

(ग) जनन्यै (घ) पुत्र्यै

**भागः (ख)**

**रचनात्मककार्यम्**

2. **भवान् विनयः मुम्बईनगरे निवसति। परीक्षायां सफलतायै वर्धापनं दातुं मित्रं प्रति लिखिते अस्मिन् पत्रे उचितपदैः रिक्तस्थानानि पूरयित्वा उत्तरपुस्तिकायां पत्रं पुनः लिखत।** ½×10=5

(i) ...............

तिथिः ...............

प्रिय मित्र मनोज!

(ii) ....................

अत्र कुशलं तत्रास्तु। अद्यैव दशमकक्षायाः (iii) ........... केन्द्रीय-माध्यमिक शिक्षाबोर्ड

द्वारा समुद्घोषितः। मया 'इण्टरनेट' इति माध्यमेन तव परीक्षापरिणामः (iv) ..........। अस्यां परीक्षायाम् त्वं पञ्चनवतिः प्रतिशतम् (v) ........ प्राप्य समुत्तीर्णः। (vi) ......... तु शतम् एव अङ्कान् लब्धवान् असि। योग्यतासूच्याम् अपि तव नाम दृष्ट्वा अहम् हार्दिकं मोदम् अनुभवामि। (vii) ............... कठोरः परिश्रमः सफलः जातः। त्वया न केवलम् (viii) ........... अपितु स्वकुटुम्बस्य अपि यशः वर्धितम्। प्रशंसनीयोऽसि त्वम्। अहम् एतस्यै उच्चसफलतायै तुभ्यं हार्दिकं (ix) ............. यच्छामि। भविष्ये तव का योजना इति लिखतु। मातृ-पितृचरणयोः प्रणामः।

तव मित्रम्

(x) ..................

**मञ्जूषा**

| |
|---|
| संस्कृते, परीक्षापरिणामः, मुम्बईतः, सस्नेहं नमस्ते, अङ्कान्, विदितः, आत्मनः, तव, विनयः, वर्धापनम् |

**3. मञ्जूषाप्रदत्त-पदसहायतया अधोलिखितां कथां पूरयत-** ½×10=5

एकदा (i) ........... अङ्गेषु विवादः जातः। सर्वाणि अङ्गानि स्व स्व (ii) ........... कर्तुम् आरभन्त। पादौ अवदताम्-आवां चलावः, गन्तव्यं (iii) ........... च नयावः। नेत्रे अकथयताम्- आवां (iv) ............ कुर्वः। नासिका अवदत्- अहं घ्रात्वा सूचयामि किं ग्रहणीयं किं च न। (v) ........... अवदताम्- आवां सर्वविधान् शब्दान् शृणुवः। हस्तौ अवदताम्- आवां विना संसारः पङ्गुः स्यात्। किन्तु इदम् (vi) ................ सर्वदा विश्रामम् एव करोति। इदं निष्क्रियम्। अस्मै भोजनदानं वृथा एव। इत्थम् सर्वाणि अङ्गानि उच्चैः अघोषयन्-वयम् उदराय (vii) ............ न दास्यामः। विना भोजनम् उदरस्य त्रीणि दिनानि गतानि। तदा (viii) ............. अङ्गानि शक्तिहीनानि कार्यकरणे च असमर्थानि अभवन्। अधुना तैः उदरस्य (ix) ........... ज्ञातं यत् भुक्तस्य अन्नस्य रसनिर्माणं कृत्वा सर्वेभ्यः अंगेभ्यः शक्तिं ददाति। इत्थं तेषां (x) ...........नष्टः सर्वैः पूर्ववत् कार्यं च आरब्धम्।

| मञ्जूषा |
|---|
| कर्णौ, भोजनं, शरीरस्य, अहंकारः, उदरं, सर्वाणि, प्रशंसां, महत्त्वं, स्थानं, मार्गदर्शनम् |

**अथवा**

**अधोलिखितसंवादे रिक्तस्थानानि पूरयन्तु।** 1×5=5

**अध्यापिका** - सुप्रभातं बालाः!

**बाला:**- (i) ..............................................।

**अध्यापिका**- बाला:! किं भवन्त: किञ्चित् प्रष्टुम् इच्छन्ति।

**बाला:**- (ii) ..............................................।

**अध्यापिका**- एवम्। गातुम् इच्छन्ति! परन्तु अहं तु गातुं न समर्था।

**बाला:**- (iii) ..............................................।

**अध्यापिका**- शोभनम् । समूहगानं तु अहमपि करिष्यामि। गीतं किम् अस्ति?,

**बाला:**- (iv) ..............................................।

**अध्यापिका**- एतत्तु बहुमधुरं गीतम्। किं वाद्ययंत्राणाम् अपि आवश्यकता अस्ति?

**बाला:**- (v) ..............................................।

**अध्यापिका**- समीचीनम्। तदा गायाम:।

4. **निम्नलिखितवाक्येषु केषाञ्चन पञ्चवाक्यानां संस्कृतेन अनुवादं कुरुत- ( केवलं वाक्यपञ्चकम् )** **1×5=5**

(i) गुरु को नमस्कार है।
Greetings to the teacher.

(ii) प्रिया गीता पढ़ेगी।
Priya will read Geeta.

(iii) क्या आप घर जा रहे हो।
Are you going to home.

(iv) नवल के दादा जी आचार्य है।
Navel's grandfather is a teacher.

(v) आप कब आओगे?
When will you come.

(vi) वीणा गीत गाती है।
Veena sings a song.

(vii) शिक्षक छात्र को पुस्तक देता है।
Teacher gives book to child.

**भाग: ( ग )**

**अनुप्रयुक्तं व्याकरणम्**

5. **अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं सन्धिं सन्धिच्छेदं वा कुरुत -**

(केवलं प्रश्नषट्कम्) 1×6=6

(i) शूरं कृतज्ञं **<u>दृढसौहृदञ्च</u>** लक्ष्मीः स्वयं याति निवासहेतोः।

(ii) अनेक **<u>संशय + उच्छेदि</u>** परोक्षार्थस्य दर्शकम्।

(iii) वैवस्वतो **<u>मनुर्नाम</u>** मनीषिणां माननीयः।

(iv) कटु सत्यं **<u>खलु + एतत्</u>**।

(v) दीपस्य समीपमागत्य **<u>संन्यासिनोक्तम्</u>**।

(vi) शुल्के विपणितं राज्यं **<u>पुत्रार्थे</u>** यदि याच्यते।

(vii) **<u>लक्ष्मीः + तु</u>** तव दासी भविष्यति।

6. **अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं समस्तपदं विग्रहवाक्यं वा प्रदत्तविकल्पेभ्यः चिनुत- (केवलं प्रश्नपञ्चकम्)** 1×5=5

(i) सः **<u>साक्षेपम्</u>** अवोचत।

(क) आक्षेपेण समम् (ख) आक्षेपेण तुल्यम्

(ग) आक्षेपे सहितम् (घ) आक्षेपेण सहितम्

(ii) यानि **<u>अनवद्यानि</u>** कर्माणि तानि सेवितव्यानि।

(क) न वद्यानि (ख) अन् अवद्यानि

(ग) न अवद्यानि (घ) अन् वद्यानि

(iii) **<u>धैर्यसागरः</u>** लक्ष्मणः केन क्षोभितः।

(क) धैर्येण सागरः (ख) धैर्यस्य सागरः

(ग) धैर्याय सागरः (घ) धैर्यात् सागरः

(iv) **<u>एकस्मिन् शरीरे संक्षिप्ता</u>** पृथ्वी रक्षितव्येति।

(क) एकशरीरासंक्षिप्ते (ख) एकशरीरसंक्षिप्तम्

(ग) एकशरीरसंक्षिप्ता (घ) एकशरीरेसंक्षिप्ता

(v) **<u>प्राप्तपरिचयपत्राः</u>** एव प्रविशन्ति।

(क) प्राप्तं परिचयपत्रं येभ्यः ते (ख) प्राप्तं परिचयपत्रं यस्मात् सः

(ग) प्राप्तं परिचयपत्रम् येन सः (घ) प्राप्तं परिचयपत्रं यैः ते

(vi) त्यागाय **<u>मितं भाषन्ते ये तेषाम्</u>**।

(क) मितभाषिणाम् (ख) मितभाषी

(ग) मितभाषिणः (घ) मितभाषिणम्

(viii) अधुनैव **परिष्कृतं पारदभस्म** तुभ्यं दास्यामि।

(क) उपपारदभस्म (ख) पारदभस्मपरिष्कृतम्

(ग) परिष्कृतपारदभस्मस्य (घ) परिष्कृतपारदभस्म

**7. अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं संयोजितं विभाजितं वा प्रकृति प्रत्ययं प्रदत्तविकल्पेभ्यः चिनुत- (केवलं प्रश्नषट्कम्)** 1×6=6

(i) लक्ष्मणस्य एषा भृकुटिः नियति इव **वि + अव + स्था + क्त**

(क) व्यवस्थिता (ख) व्यवस्थात

(ग) विअवस्थितः (घ) व्यवस्था

(ii) **श्लाघ् + अनीयर्** काले अत्रभवती वारयितुं नोत्सहे।

(क) श्लाघनीयर् (ख) श्लाघनीये

(ग) श्लाघानीये (घ) श्लाघनीयस्य

(iii) हन्त! निवेदितम् **अप्रभुत्वम्**।

(क) अप्रभु + त्वम् (ख) अप्रभु + त्वल

(ग) अप्रभु + त्व (घ) अप्रभु + तल

(iv) संयासिनः न किमपि **प्रष्टव्याः**।

(क) पृच्छ् + तव्यत् (ख) प्रष्ट + तव्यत्

(ग) पृष्ट + तव्यत् (घ) प्रष् + तव्यत्

(v) परं **संन्यास + इनि** पण्डिताः बालाश्च न किमपि प्रष्टव्याः।

(क) संन्यासिनि (ख) संन्यासिनी

(ग) संन्यासिनः (घ) संन्यासी

(vi) दौवारिकः तु तम् **नयन्** एव प्राचलत्।

(क) नी + शतृ (ख) नी अत्

(ग) नय् + अन् (घ) नी + अन्

(vii) कर्माणि **आरभमाणं** पुरुषं श्रीर्निषेवते।

(क) आ + रभ् + क्तवतु (ख) आ + रभ् + शानच्

(ग) आ + रभ् + शतृ (घ) आ + रभ् + मान्

**6. समुचितम् उपपदविभक्तिरूपं चिनुत- (केवलं प्रश्नत्रयम्)** 1×3=3

(i) ............... न प्रमदितव्यम्।

(क) धर्मात्　　　　(ख) धर्मेण
(ग) धर्मस्य　　　　(घ) धर्मान्

(ii) दिलीपस्य ................ सदृश: आगम: आसीत्।
(क) प्रज्ञया　　　　(ख) प्रज्ञाम्
(ग) प्रज्ञाया:　　　　(घ) प्रज्ञा

(iii) वैवस्वत: मनु: ....... आद्य: आसीत्।
(क) महीक्षित्　　　　(ख) महीक्षितै:
(ग) महीक्षित:　　　　(घ) महीक्षिताम्

(iv) अहं ............ परिष्कृतपारदभस्म दद्याम्।
(क) तुभ्यम्　　　　(ख) त्वाम्
(ग) त्वयि　　　　(घ) तव

## भाग: (घ)

### (i) पठितावबोधनम्

**9. अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत- 5**

वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति। सत्यं वद धर्मं चर। स्वाध्यायान्मा प्रमद:। आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सी:। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्। कुशलान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाध्याय-प्रवचनाभ्यां न प्रमदितव्यम्। देवपितृकार्याभ्यां न प्रमदितव्यम्। मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव।

**(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) ½×2=1**

(i) कम् अनूच्य आचार्य: अन्तेवासिनम् अनुशास्ति?
(ii) कं मा व्यवच्छेत्सी:?
(iii) किं वद?

**(आ) पूर्णवाक्येन उत्तरत– (केवलं प्रश्नद्वयम्) 1×2=2**

(i) केभ्य: न प्रमदितव्यम्?
(ii) आचार्याय किम् आहरणीयम्?
(iii) अन्तेवासिनं क: अनुशास्ति?

**( इ ) निर्देशानुसारम् उत्तरत- ( केवलं प्रश्नद्वयम् )** 1×2=2

(i) "प्रियं धनम्" अनयोः पदयोः विशेषणपदं किम्?

(ii) "आचार्यः" इत्यस्य पदस्य क्रियापदं किम्?

(iii) 'असत्यम्' इत्यस्य किं विलोमपदम् अत्र?

**10. अधोलिखितं पद्यं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत-** 5

गुणी गुणं वेत्ति न वेत्ति निर्गुणः
बली बलं वेत्ति न वेत्ति निर्बलः।
पिको वसन्तस्य गुणं न वायसः
करी च सिंहस्य बलं न मूषकः।।

**( अ ) एकपदेन उत्तरत- ( केवलं प्रश्नद्वयम् )** ½×2=1

(i) कः गुणं वेत्ति?

(ii) सिंहस्य बलं कः न जानाति?

(iii) वायसः कस्य गुणं न जानाति?

**( आ ) पूर्णवाक्येन उत्तरत- ( केवलं प्रश्नद्वयम् )** 1×2=2

(i) बलस्य महत्त्वं कः जानाति कः च न जानाति?

(ii) निर्गुणः जनः किं न वेत्ति?

(iii) वसन्तस्य गुणं कः जानाति?

**( इ ) निर्देशानुसारम् उत्तरत- ( केवलं प्रश्नद्वयम् )** 1×2=2

(i) "अशक्तः" इत्यस्य किं पर्यायपदं प्रयुक्तमत्र?

(ii) "गुणी गुणं वेत्ति" इत्यत्र कर्तृपदं किम्?

(iii) "अवगुणं" इत्यस्य किं विलोमपदम् पद्यांशे प्रयुक्तम्?

**11. अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत-** 5

**कुण्डला** - सखि मदालसे! त्वं तु केवलं विद्याध्ययने एव रता कियन्तं कालं यावत् ब्रह्मचर्यव्रतं धारयिष्यसि?

**मदालसा** - ज्ञानोदधिस्तु अनन्तपारो गभीरश्च। मया सागरतटे स्थित्वा कतिपयबिन्दव एव प्राप्ता अद्यावधि।

**कुण्डला** - विनयशीले! विद्या ददाति विनयम् अत एव एवं भणसि। कुलगुरु - तुम्बरुमहाभागैस्तु गन्धर्वराजाय अन्यदेव सूचितम्।

**मदालसा** - किं श्रुतं त्वया यत् गुरुवर्यैः मामधिकृत्य पित्रे कथितम्?

**कुण्डला** - अथ किम्! राजकुमारी मदालसा सर्वविद्यानिष्णाता जाता, परं तया स्वयं वर: न प्राप्त: अत: तस्यै योग्यवरस्य अन्वेषणं कार्यम् इत्यासीद् गुरुपादानां मतम्।
**मदालसा** - (हसित्वा) नहि जानन्ति ते यदहं विवाहबन्धनं स्वीकर्तुं न इच्छामि।

**(अ) एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्)** ½×2=1

(i) अनन्तपार: क:?

(ii) का सर्वविद्यानिष्णाता जाता?

(i) मदालसा किं स्वीकर्तुं न इच्छति?

**(आ) पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्)** 1×2=2

(i) कुलगुरु: मदालसाया: विषये पितरं प्रति किं कथितवान्?

(ii) गुरुपादानां मतं किम् अस्ति?

(iii) कस्यै योग्यवरस्य अन्वेषणं कर्तव्यम्?

**(इ) निर्देशानुसारम् उत्तरत- (केवलं प्रश्नद्वयम्)** 1×2=2

(i) 'अनन्तपार:' इति पदस्य विशेष्यम् किम्?

(ii) 'धारयिष्यसि' इति क्रियापदस्य कर्तृपदं किम्?

(iii) 'त्वं तु केवलं विद्याध्ययने रता' इत्यत्र 'त्वम्' इति सर्वनामपदं कस्यै प्रयुक्तम्?

**12. अधोलिखितस्य पद्यस्य भावार्थं मञ्जूषाप्रदत्तपदै: पूरयित्वा पुन: लिखत-** 1×3=3

**न दुर्जन: सज्जनतामुपैति शठ: सहस्रैरपि शिक्ष्यमाण:।**
**चिरं निमग्नोऽपि सुधा-समुद्रे न मन्दरो मार्दवमभ्युपैति॥**

**भावार्थ:**- दुर्जन: शठ: (i) .................. सज्जनै: अपि शिक्ष्यमाण: कदाचित् (ii) . ................ न प्राप्नोति। यथा अमृतस्य समुद्रे चिरकालं यावत् (iii) .............. मन्दर: पर्वत: कोमलत्वम् न प्राप्नोति। अत: शठस्य अवबोधनं तु सर्वथा व्यर्थमेव।

**मञ्जूषा**

| सज्जनताम्, सहस्रै:, निमग्न: |
|---|

**अथवा**

**प्रदत्त-भावार्थत्रयात् शुद्धं भावार्थं चित्वा लिखत-** 1×3=3

**(क) कर्माण्यारभमाणं हि पुरुषं श्रीर्निषेवते।**

(i) यः मनुष्यः कर्माणि आरभते सः समृद्धिं प्राप्नोति।
(ii) पुरुषः श्रियं न प्राप्नोति।
(iii) कर्मणा पुरुषः लक्ष्मीं न निषेवते।

**(ख) 'त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः'**

(i) नरकस्य द्वारं त्रिविधम् उच्यते-लोभः, असत्यम् श्रमः च।
(ii) नरकस्य द्वारेषु प्रवेशः कठिनतमः इत्यर्जुनः कथयति।
(iii) मानवस्य आत्मनः नाशाय कामः, क्रोधः लोभः च एतानि त्रीणि नरकस्य द्वाराणि एव।

**(ग) "विभूषणं मौनमपण्डितानाम्"।**

(i) मौनं पण्डितानां भूषणं भवति।
(ii) मौनम् अपण्डितानाम् अलङ्करणं भवति।
(iii) मौनं विभूषणं न भवति।

**13. अधोलिखित-अन्वये रिक्तस्थानानि पूरयत-** **1×3=3**

कर्णामृतं सूक्तिरसं विमुच्य दोषेषु यत्नः सुमहान् खलानाम्।
निरीक्षते केलिवनं प्रविश्य क्रमेलकः कण्टकजालमेव।।

**अन्वयः**– खलानां (i) ...................... सूक्तिरसं विमुच्य दोषेषु (ii) .................. यत्नः (भवति) यथा क्रमेलकः (iii) .................. प्रविश्य कण्टकजालम् एव निरीक्षते।

**14. 'क' स्तम्भस्य वाक्यांशस्य 'ख' स्तम्भस्य वाक्यांशेन सह मेलनं कुरुत-** **½×4=2**

| **'क' स्तम्भः** | **'ख' स्तम्भः** |
| --- | --- |
| (i) ज्ञाने मौनं क्षमा शक्तौ | – विभूषणं मौनमपण्डितानाम्। |
| (ii) कांस्यं यथा हि कुरुते | – त्यागे श्लाघाविपर्ययः। |
| (iii) रूपं प्रसिद्धं न बुधास्तदाहुः | – अतितरां निनादं। |
| (iv) विशेषतः सर्वविदां समाजे | – विद्यावतां वस्तुत एव रूपम्। |

**15. अधोलिखितवाक्येषु रेखाङ्कितानां पदानां प्रसंगानुसारं शुद्धम् अर्थं मञ्जूषातः चित्वा लिखत-** **½×4=2**

(i) यस्याः <u>शक्र</u>समो भर्ता मया पुत्रवती च या।

(ii) तदन्वये शुद्धिमति **प्रसूतः** शुद्धिमत्तरः।

(iii) क्षम्यतामेष आगच्छामि आगत्य च **निखिलं** निवेदयामि।

(iv) संन्यासी **तुरीया**श्रमसेवीति प्रणम्यते।

**मञ्जूषा**

| चतुर्थः, सम्पूर्णम्, उत्पन्नः, इन्द्रः |
|---|

**संस्कृतसाहित्येतिहासपरिचयः**

**16. समुचितस्य रचनायाः कवेः वा अभिधानं लिखत- ( केवलं प्रश्नत्रयम् )** **1×3=3**

(i) "पुरन्ध्रीपञ्चकम्" इति रूपकसङ्ग्रहः कस्य रचना?

(ii) "अनुशासनम्" इति पाठः कस्याः उपनिषदः सङ्गृहीतः?

(iii) "नैकेनापि समं गता वसुमती" इति पाठः कस्मात् ग्रंथात् संकलितः?

(iv) "महाभारतम्" इत्यस्याः रचनायाः लेखकः कः?

**17. अधोलिखितेषु वाक्येषु रिक्तस्थानपूर्तिं मञ्जूषाप्रदत्तपदैः कुरुत–** **1×3=3**

**मञ्जूषा**

| चम्पूकाव्यम्, निकषम्, कुमारसम्भवम् |
|---|

(i) महाकविना कालिदासेन विरचितं महाकाव्यद्वयं प्राप्यते रघुवंशम् ..........च।

(ii) गद्यं कवीनां ................... वदन्ति।

(iii) गद्यपद्यमयं काव्यं ..................... इत्यभिधीयते।

**18. समुचितं मेलयत–** **1×4=4**

| **'क' भागः** | **'ख' भागः** |
|---|---|
| (क) रूपकस्य एकः भेदः | (अ) उत्तररामचरितम् |
| (ख) भवभूति विरचितम् | (आ) चारुदत्तम् |
| (ग) नाट्यशास्त्रस्य रचयिता | (इ) प्रकरणम् |
| (घ) भासरचितम् | (ई) भरतमुनिः |

## आदर्शप्रश्नपत्रम्-2023-2024
## संस्कृतम् ( केन्द्रिकम् ) ( कोड सं.-322 )
## कक्षा- द्वादशी

**समयः होरात्रयम्** **पूर्णाङ्काः 80**

**सामान्यनिर्देशाः-**

- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 15 पृष्ठानि मुद्रितानि सन्ति।
- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रमुखाः प्रश्नाः सन्ति।
- अस्य प्रश्नपत्रस्य पठनाय 15 निमेषाः निर्धारिताः सन्ति। अस्मिन् अवधौ केवलं प्रश्नपत्रं पठनीयम् उत्तरपुस्तिकायां च किमपि न लेखनीयम्।
- उत्तरलेखनात् पूर्वं प्रश्नपत्रानुसारं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
- प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
- सर्वेषां प्रश्नाम् उत्तराणि संस्कृतेन लेखनीयानि।
- प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

**प्रश्नपत्रस्वरूपम्-**

**अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति-**

| | |
|---|---|
| **खण्डः ( क ) अपठित-अवबोधनम्** | **-10 अङ्काः** |
| **खण्डः ( ख ) रचनात्मककार्यम्** | **-15 अङ्काः** |
| **खण्डः ( ग ) अनुप्रयक्तव्याकरणम्** | **-20 अङ्काः** |
| **खण्डः ( घ ) I. पठित-अवबोधनम्** | **-25 अङ्काः** |
| **II. संस्कृत-साहित्येतिहास-परिचयः** | **-10 अङ्काः** |

## भागः (क)

## अपठितावबोधनम् - 10 अङ्काः

1. **अधोलिखितं गद्यांशं पठित्वा प्रदत्तान्प्रश्नामुत्तराणि संस्कृतेन उत्तरत-** 10

''संहतिः कार्यसाधिका' इति वचनं जगति प्रसिद्धमस्ति। एकेन पुरुषेण किमपि महत्कार्यं न साध्यते। यत्किमपि साधयितुं नराणां सङ्घः परमावश्यकः। सर्वे जानन्ति यत् न एकः तन्तुः किमपि कर्तुं समर्थः। परन्तु तैः रचिता रज्जुः हस्तिनमपि बद्धुम् समर्था भवति। इत्थमेव एकेन तण्डुलेन नहि ओदनं पच्यते। गृहेषु मातरः, पितरः भ्रातरः च एकीभूय गृहभारं वहन्तः सुखमनुभवन्ति। एवमेव मनुष्याणां समाजोऽपि देशं जातिञ्च उन्नतिपथं नेतुं समर्थः भवति। यस्मिन् राष्ट्रे सर्वे मानवाः, सर्वाणि राज्यानि च भेदभावं परित्यज्य एकतया व्यवहरन्ति तद्राष्ट्रं जनशक्त्या संसारस्य मुकुटमणिरिव समुज्जलं भवति। एकतायाः प्रभावेण भारतीयाः स्वदेशम् आङ्ग्लहस्तात् मोचयितुं समर्थाः अभवन्। अतः सदा सर्वैः मानवैः सङ्घे स्थित्वा स्वशक्तेः सञ्चयः कर्तव्यः। अधुनापि यदि वयं सङ्घीभूय स्थास्यामः तर्हि अवश्यमेव शत्रून् जेतुं समर्थाः भविष्यामः।

**(अ) एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्)** 1×2=2

(i) मानवैः सङ्घे स्थित्वा कस्याः सञ्चयः कर्तव्यः?

(ii) किमपि साधयितुं केषां सङ्घः परमावश्यकः?

(iii) रज्जुः कं बुद्धुम् समर्था भवति?

**(आ) पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्)** 2×2=4

(i) जगति किं प्रसिद्धमस्ति?

(ii) राष्ट्रं कथं समुज्ज्वलं भवति?

(iii) वयं कथं शत्रून् जेतुं समर्थाः भविष्यामः?

**(इ) अनुच्छेदस्य (द्वित्रिशब्दात्मकं) समुचितं शीर्षकं लिखत।** 1×1=1

**( ई ) यथानिर्देशम् उत्तरत-केवलं प्रश्नत्रयम्।** 1×3=3

(i) ''निर्मिता'' इत्यर्थे किं पदं गद्यांशे प्रयुक्तम्?

(क) प्रभाव: (ख) समर्था

(ग) रचिता (घ) भवति

(ii) ''भारतीया: स्वदेशम् आङ्ग्लहस्तात् मोचयितुं समर्था: अभवन्''। इत्यत्र 'अभवन्'' इति क्रियापदस्य किं कर्तृपदं प्रयुक्तम्?

(क) भारतीया: (ख) समर्था:

(ग) आङ्ग्लहस्तात् (घ) स्वदेशम्

(iii) ''सर्वै:'' इत्यस्य विशेषणपदस्य किं विशेष्यमत्र प्रयुक्तम्?

(क) सदा (ख) देशम्

(ग) मोचयितुम् (घ) मानवै:

(iv) ''अनेकताया:'' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?

(क) जनशक्त्या (ख) एकताया:

(ग) भारतीया: (घ) परित्यज्य

## खण्ड:–ख

## रचनात्मक-कार्यम् - 15 अङ्का:

**2. भवान् आदित्य:। मुम्बई-नगरे वसति। भवान् गतसप्ताहे संस्कृतसम्भाषणशिबिरे भागं गृहीतवान्। तदधिकृत्य मित्रं रमेशं प्रति लिखितं पत्रं मञ्जूषायां प्रदत्तशब्दै: रिक्तस्थानानि पूरयित्वा पुन: लिखत–** ½×10=5

मुम्बईनगरत:

तिथि:-.........................

प्रिय मित्र (i) रमेश

सस्नेहं नमः।

अत्र कुशलं तत्रास्तु। गतसप्ताहे अस्माकं (ii) ..................संस्कृतसम्भाषणशिबिरम् (iii) .................. आसीत्। चतुर्दशदिनानि यावत् वयं संस्कृतसम्भाषणस्य (iv) . ................ अकुर्म। तत्र एकस्याः लघुनाटिकायाः (v) ............... अपि अभवत्। अहं तु विदूषकस्य (vi) ................ कृतवान्। सर्वे जनाः हसित्वा हसित्वा (vii) ..................... अकुर्वन्। अहम् इरानीं सर्वदा संस्कृतेन एव संभाषणम्। (viii) . ................. भवान् अपि संस्कृतेन सम्भाषणस्य अभ्यासं (ix) ........... पितृभ्यां मम। (x) ................... निवेदयतु।

भवतः मित्रम्

आदित्यः।

**मञ्जूषा**

| |
|---|
| अभिनयम्, अभ्यासम्, प्रणामाञ्जलिम्, विद्यालये, मञ्चनम् आयोजितम्, करतलध्वनिम्, करोमि, रमेश, करोतु। |

3. मञ्षाप्रदत्तशब्दानां सहायतया अधोलिखितां कथायां रिक्तस्थानानि पूरयित्वा कथां पुनः लिखत–

कस्मिंश्चित् नगरे दरिद्रः ब्राह्मणः वसति स्म। सः भिक्षाटनेन जीविकार्जनं करोति स्म। कदाचित् सः पिष्टेन पूर्णम् एकं (i) ........................ प्राप्तवान्। तं घटं नागदन्ते अवलम्ब्य तस्य अधः उपविश्य सः एकदृष्ट्या घटमेव पश्यति स्म। एकदा रात्रौ सः (ii) ......................... यदि देशे दुर्भिक्षः भवेत् तर्हि एतस्य शतरूप्यकाणां मूल्यं भवेत्। तदा अहम् एतं घटं विक्रीय तेन धनेन अजद्वयं क्रेष्यामि। कालान्तरे तेन (iii) .................. एव भविष्यति, अनन्तरम् अजसमूहं (iv) .................. धेनूः क्रेष्यामि, अनन्तरं ताः विक्रीय महिषीः ताः विक्रीय अश्वान् च क्रेष्यामि। तान् अपि

विक्रीय यथेष्टं धनं (v) .................... बृहत् गृहं निर्मापयिष्यामि। तदा कश्चित् (vi) ..................आगत्य रूपवतीं स्वकन्यां मह्यं दास्यति। अनन्तरं मम पुत्रः जनिष्यते। देवशर्मा इति तस्य (vii) ................. करिष्यामि। यदा सः जानुभ्यां चलितुं समर्थः भविष्यति तदा अहम् अश्वशालायां (viii) ...................... पष्ठियामि। तदा देवशर्मा जानुभ्यां चलन् मम समीपम् आगन्तुम् उद्युक्तः भविष्यति। तदा तं बालं ग्रहीतुं तस्य (ix) ................ आज्ञापयिष्यामि। यदा सा मम वचनं न श्रोष्यति तदा अहं कोपेन पादप्रहारेण तां दण्डयिष्यामि। एवं चिन्तयन् सः (x) ................. कृतवान् एव। पिष्टेन पूर्णः घटः पतितः, भग्नः च।''

| **मञ्जूषा** |
|---|
| सम्पादयिष्यामि, विक्रीय, ब्राह्मणः, चिन्तितवान्, नामकरणम् |
| पादप्रहारम्, मातरम्, घटम्, अजसमूहः, पुस्तकम् |

**अथवा**

**अधोलिखितसंवादे रिक्तस्थानानि पूरयन्तु।** 1×5=5

तन्वी– सखि अवनि! भवती ह्यः विद्यालयं न आगतवती। अपि कुशलिनी त्वम्?

अवनि– तन्वि! ..................................................

तन्वी– तर्हि ह्यः विद्यालयं किमर्थं नागता?

अवनि– (ii) ..................................................

तन्वी– अहो! पक्षिविहारम् अगच्छत्। बहूत्तमम्। कुत्रास्ति पक्षिविहारः?

अवनि– (iii) ..................................................

तन्वी–'नोएडा' इति नगरस्थस्य पक्षिविहारस्य विषये तु अहमपि श्रुतवती। के के खगाः दृष्टाः तत्र?

अवनि–अहो! दुर्लभाः खगाः अपि दृष्टाः। अस्माकं पितरः तु कथयन्ति यत् तेषां शैशवावस्थायाम् अनेके खगाः गृहेषु इतस्ततः विचरन्ति स्म।

अवनि- वस्तुत: अद्यत्वे नगरेषु तु पक्षिणां दर्शनं प्राय: दुर्लभमेव।

तन्वी- सत्वं वदति भवती। (iv) ..............................................................

अवनि- भवती अपि पक्षिविहारं द्रष्टुम् अवश्यं गच्छतु।

तन्वी- आम् सखि! (v) ..........................................................................

4. **निम्नलिखितवाक्येषु केषाञ्चन पञ्चवाक्यानां संस्कृतेन अनुवादं कुरुत**-1×5=5

(i) तुम खेलने कब जाओगे?

when will you go to play?

(ii) लतिका कनिका च पठत:।

Latika and Kanika are studying.

(iii) क्या मैं बाहर जाऊँ?

shall I go to play?

(iv) तुम सब यहां क्या कर रहे हो?

what are you all doing here?

(v) चेतन चित्र बना रहा है।

Chetan is drawing a picture.

(vi) कल बुधवार था।

Yesterday was Wednesday.

**खण्ड: ग**

**अनुप्रयुक्तव्याकरणम्** **20 अङ्का:**

5. **अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत**-1×6=6

**( केवलं प्रश्नषट्कम् )**

(i) मग्दार्हस्थ्यं तु त्वत्+अधीनं भविष्यति।

(ii) ततो यान्ति+अधमां गतिम्।

(iii) यद्यपि देवादेशः प्रमाणम्।

(iv) शठः सहस्रैरपि शिक्ष्यमाणः।

(v) दीपस्य समीपमागत्य संन्यासिनोक्तम्।

(vi) वैवस्तो मनुर्नाम मनीषिणां माननीयः।

(vii) तावन्मम बालभावः स एव।

6. **अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं समस्तपदं विग्रहवाक्यं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत-(केवलं प्रश्नपञ्चम्)** 1×5=5

(i) ज्ञानोदधिः अनन्तपारः।

(क) ज्ञानस्य उदधिः (ख) ज्ञाने उदधिः

(ग) ज्ञानम् उदधिः (घ) ज्ञानाय उदधिः

(ii) एकेनापि सुपुत्रेण विद्यायुक्तेन साधुना।

(क) विद्यां युक्तेन (ख) विद्यायाः युक्तेन

(ग) विद्यया रहितेन (घ) विद्यया युक्तेन

(iii) स एव उचितम् अनतिक्रम्य व्यवहरिष्यति।

(क) सोचितम् (ख) यथोचितम्

(ग) यदोचितम् (घ) अनुचितम्

(iv) त्यागाय मितं भाषन्ते ये तेषाम्।

(क) मिभाषिणाम् (ख) मितभाषी

(ग) मितभाषिणः (घ) मितभाषिन्

(v) परमात्मा अनश्नन् एव अभिचाकशीति।

(क) अन् अश्न् (ख) अन् श्नन्

(ग) न अश्नन् (घ) न श्नन्

(vi) <u>आचार्यदेवो</u> भव।

(क) आचार्यस्य देवः (ख) देवः एव आचार्यः

(ग) देवस्य आचार्यः (घ) आचार्यः देवो यस्य सः

7. **अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं संयोजितं विभाजितं वा प्रकृतिं प्रत्ययं प्रदत्तविकल्पेभ्यः चिनुत- (केवलं प्रश्नषट्कम्)** 1×6=6

(i) तदन्वये शुद्धिमति <u>प्रसूतः</u> शुद्धिमत्तरः।

(क) प्र+सू+क्तिन् (ख) प्र+सू+क्तवतु

(ग) प्र+सू+क्त (घ) प्र+सू+तल्

(ii) किं क्षमा <u>निर्मनस्वि+तल्</u>।

(क) निर्मनस्वित (ख) निर्मनस्वित्वम्

(ग) निर्मनस्वितला (घ) निर्मनस्विता

(iii) ताते धनुर्न मयि सत्यम्-<u>अव+ईक्ष्+शानच्</u>।

(क) अवेक्ष्यमाणे (ख) अवीक्षशानच्

(ग) अवीक्षशानः (घ) अवीक्षमाने

(iv) <u>युज्+क्त</u> आयुक्ताः च यथा वर्तेरत् तथा वर्तेथाः।

(क) युक्तः (ख) युज्क्ताः

(ग) युक्ताः (घ) युधन्

(v) <u>एकाकिनी</u> एव नर्तिष्यसि।

(क) एकाकिन्+इनी (ख) एकाकिन्+ङीप्

(ग) एकाकिन्+ई (घ) एकाकिन्+इनि

(vi) यान्यनवद्यानि कर्माणि तानि <u>सेव्+तव्यत्</u>।

(क) सेवितव्यत् (ख) सेवतव्यम्

(ग) सेवितव्यानि (घ) सेवितव्यतानि

(vii) भगवन्! <u>संन्यास+इनि</u> तुरीयाश्रमसेवीति प्रणम्यते।

(क) संन्यासिनि　　　　(ख) संन्यासी

(ग) संन्यासिनी　　　　(घ) संन्यासिन्

8. **समुचितम् उपपदविभक्तिरूपं चिनुत– (केवलं प्रश्नत्रयम्)**　　1×3=3

(i) राजा राज्यं ................. दत्त्वा तदुत्सङ्गे भोज मुमोच।

(क) मुञ्जम्　　　　(ख) मुञ्जाय

(ग) मुञ्जस्य　　　　(घ) मुञ्जे

(ii) द्वादशवर्षेण ................... अनुगम्यमानः संन्यासी दृष्टः।

(क) भिक्षावटुना　　　　(ख) भिक्षावटवे

(ग) भिक्षावटुभिः　　　　(घ) भिक्षावटुम्

(iii) ......................... न प्रमदितव्यम्।

(क) स्वाध्येन　　　　(ख) स्वाध्यायस्य

(ग) स्वाध्याये　　　　(घ) स्वाध्यायात्

(iv) दिलीपस्य ....................... सदृशागमः आसीत्।

(क) प्रज्ञां　　　　(ख) प्रज्ञासु

(ग) प्रज्ञया　　　　(घ) प्रज्ञायाः

## खण्डः-घ भागः-I

### पठितांशावबोधनम्　　25 अङ्काः

9. **अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् यथानिर्देशं संस्कृतेन उत्तरत–**　　5

शोकसन्तप्तो मुञ्जः प्रायश्चित्तं कर्तुम् आत्मनो वह्नौ प्रवेशनं निश्चितवान्। राज्ञः वह्निप्रवेशकार्यक्रमं श्रुत्वा वत्सराजः बुद्धिसागरं नत्वा शनैः-शनैः प्राह- तात! मया भोजराजो रक्षित एवास्ति। पुनः बुद्धिसागरेण तस्य कर्णे किमपि कथितम्, यन्निशम्य

वत्सराजः ततो निष्क्रान्तः। पुनः राज्ञो वह्निप्रवेशकाले कश्चन कापालिकः सभां समागतः। सभामागतं कापालिकं दण्डवत् प्रणम्य मुञ्जः प्रावोचत्- हे योगीन्द्र! महापापिना मया हतस्य पुत्रस्य प्राणदानेन मां रक्षेति। अथ कापालिकस्तं प्रावोचत्- राजन्! मा भैषीः। शिवप्रसादेन स जीवितो भविष्यति। तदा श्मशानभूमौ कापालिकस्य योजनानुसारं भोजः तत्र समानीतः। 'योगिना भोजो जीवितः' इति कथा लोकेषु प्रसृता। पुनः गजेन्द्रारूढो भोजो राजभवनमगात्। सन्तुष्टो राजा मुञ्जः भोजं निजसिंहासने निवेश्य निजपट्टराज्ञीभिश्च सह तपोवनभूमिं गत्वा परं तपस्तेपे। भोजश्चापि चिरं प्रजाः पालितवान्।

**( अ ) एकपदेन उत्तरत-( केवलं प्रश्नद्वयम् )** ½×2=1

(i) राज्ञः वह्निप्रवेशकाले कः सभाम् आगतः?

(ii) कः गजेन्द्रारूढः भूत्वा रापजभवनम् अगात्?

(iii) कस्य योजनानुसारं भोजः श्मशानभूमौ किं समानीतः?

**( आ ) पूर्णवाक्येन उत्तरत-( केवलं प्रश्नद्वयम् )** 1×2=2

(i) सभामागतं कापालिंक दण्डवत् प्रणम्य मुञ्चः किं प्रावोचद्?

(ii) शोकसन्तप्तो मुंजः प्रायश्चित्तं कर्तुं किं निश्चितवान्?

(iii) कापालिकः किं प्रावोचत्।

**( इ ) यथानिर्देशम् उत्तरत- ( केवलं प्रश्नद्वयम् )** 1×2=2

(i) 'पालितवान्' इति क्रियापदस्य कर्तृपदं किम्?

(ii) 'आकर्ण्य' इत्यस्य पर्यायपदं किम्?

(iii) 'सभामागतं कापालिकम्' इत्यनयोः विशेषणपदं किम्?

10. **अधोलिखितं पद्यांशं पठित्वा तदाधारितान् प्रश्नान् यथानिर्देशं संस्कृतेन उत्तरत-5**

**प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः।**
**न शौचं नापि चाऽऽचारो न सत्यं तेषु विद्यते॥**
**एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः।**
**प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः॥**

**( अ ) एकपदेन उत्तरत- ( केवलं प्रश्नद्वयम् )** ½×2=1

(i) आसुरा: जना: कस्य क्षयाय प्रभवन्ति?

(ii) कीदृशा: जना: प्रवृत्तिं निवृत्तिं च न विदु:?

(iii) सत्यं केषु न विद्यते?

**( आ ) पूर्णवाक्येन उत्तरत- ( केवलं प्रश्नद्वयम् )** 1×2=2

(i) आसुरेषु मनुजेषु किं किं न विद्यते?

(ii) कीदृशा: जना: जगत: क्षयाय प्रभवन्ति?

(iii) आसुरा: जना: किं न विदु:?

**( इ ) यथानिर्देशम् उत्तरत- ( केवलं प्रश्नद्वयम् )** 1×2=2

(i) 'विनाशाय' इत्यर्थे किं पदमत्र प्रयुक्तम्?

(ii) 'असत्यम्' इत्यस्य किं विपर्ययम् प्रयुक्तमत्र?

(iii) 'एताम्' इति विशेषणस्य किं विशेष्यम् अत्र प्रयुक्तम्?

11. **अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् यथानिर्देशं संस्कृतेन उत्तरत-** 5

ऋतध्वज: - आम्! अत एव प्रष्टुमुत्सहे किं गन्धर्वराजविश्वासुमहाभागा: अपि स्वपत्नीं युधिष्ठिर इव हारितवन्त: हरिश्चन्द इव विक्रीतवन्त:?

कुण्डला- मदालसे! तूष्णीं किमर्थं तिष्ठसि? देहि प्रत्युत्तरम्।

ऋतध्वज:- एकस्य अपराधेन सर्वा जाति: दण्ड्या इति विचित्रो न्याय: तव सख्या:।

मदालसा- अत्रभवन्त: नारीस्वाधीनतामधिकृत्य किं कथयन्ति?

ऋतध्वज:- माता एव प्रथमा आचार्या इत्यस्ति मे अवधारणा। नारी एव समस्तसृष्टे: निर्मात्री। परं कथनेन किम्? परीक्ष्य एव ज्ञास्यति अत्रभवती। परीक्षार्थमुद्यतोऽस्मि गृहस्थाश्रमप्रयोगशालायाम्।

मदालसा- स्वीकृत: प्रस्ताव:।

कुण्डला- दिष्ट्या वर्धेथां युवाम्। मित्रवर, गन्धर्वकन्या मदालसा गान्धर्वविवाह-विधिना

वृणोति अत्रभवन्तम्। आकारये अहं कुलगुरुं तुम्बुरुम्। असौ अग्निं साक्षीकृत्य आशीर्वचांसि वक्ष्यति।

**( अ ) एकपदेन उत्तरत-( केवलं प्रश्नद्वयम् )** ½×2=1

(i) नारी कस्याः निर्मात्री?

(ii) कुलगुरुः तुम्बरुः किं वक्ष्यति?

(iii) मदालसा केन विधिना ऋतध्वजं वृणोति?

**( आ ) पूर्णवाक्येन उत्तरत-( केवलं प्रश्नद्वयम् )** 1×2=2

(i) मदालसा किं पृच्छति?

(ii) ऋतध्वजः किमर्थम् उद्यतः आसीत्?

(iii) ऋतध्वजः किं प्रष्टुम् उत्सहते?

**( इ ) यथानिर्देशम् उत्तरत- ( केवलं प्रश्नद्वयम् )** 1×2=2

(i) ''मौनम्'' ईत्यस्य समानार्थकपदं नाट्यांशात् चित्वा लिखत।

(ii) ''पराधीनता'' इत्यस्य विलोमपदं नाट्यांशात् चित्वा लिखत।

(iii) 'विचित्रो न्यायः तव सख्याः ''इत्यस्मिन् वाक्ये ''तव'' इति सर्वनामपदं कस्मै प्रयुक्तम्?

**12. पद्यस्य भावार्थं मञ्जूषाप्रदत्तपदैः पूरयित्वा पुनः लिखत-** 1×3=3

**एकेनापि सुपुत्रेण विद्यायुक्तेन साधुना।**
**आह्लादितं कुलं सर्वं यथा चन्द्रेण शर्वरी।**

भावार्थः-यथा एकाकिना (क) .................... एव रात्रिः (ख) ............ भवति, तथैव एकेन (ग) ..................... सुपुत्रेण सम्पूर्णः वंशः प्रसन्नतां याति।

**मञ्जूषा**

| |
|---|
| विद्यायुक्तेन, चन्द्रेण, सुशोभिता |

**अथवा**

**प्रदत्तात् भावार्थत्रयात् शुद्धं भावार्थं चित्वा लिखत-** 1×3=3

**( अ ) कर्माण्ययारभमाणं हि पुरुषं श्रीर्निषेवते।**

(i) यः मनुष्यः कर्माणि आरभते सः समृद्धिं प्राप्तोति।

(ii) पुरुषः श्रियं न प्राप्नोति

(ii) कर्मणा पुरुषः लक्ष्मीं न निषेवते।

**( आ ) दोषेषु यत्नः सुमहान् खलानाम्।**

(i) महतां जनानां दोषेषु यत्नः भवति।

(ii) दुष्टजनानां दोषेषु एव यत्नः भवति।

(iii) दुष्टकार्येषु प्रयत्नः न करणीयः।

**( इ ) द्वेष्योऽपि सम्मतः शिष्टस्तस्यार्तस्य यथौषधम्।**

(i) राज्ञे सज्जनः सदैव शत्रुवत् भवति स्म यथा रुग्णाय औषधम्।

(ii) राज्ञे सज्जनः शत्रु सन्नपि सम्मानीयः आसीत् यथा रुग्णाय औषधम्।

(iii) रोगी जनः कदापि औषधं न स्वीकरोति औषधं तस्य शत्रु इव।

13. **अधोलिखित-श्लोकस्य प्रदत्ते अन्वये रिक्तस्थानपूर्तिं कुरुत-** 1×3=3

**असौ मया हतः शत्रुर्हनिष्ये चापरानपि।**

**ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान् सुखी॥**

**अन्वय**-असौ शत्रुः मया हतः (i) ............ अपि च (अहम्) हनिष्ये। ............... (ii) ............... भोगी, अहम् (iii) .............. अहं सिद्धः बलवान् सुखी (चास्मि।)।

**मञ्जुषा**

| अहम्, ईश्वरः, अपरान् |
|---|

14. 'क' स्तम्भस्य वाक्यांशस्य 'ख' स्तम्भस्य वाक्यांशेन सह मेलनं कुरुत-½×4=2

| 'क' स्तम्भः | 'ख' स्तम्भः |
|---|---|
| (i) स्वायत्तमेकान्तगुणं विधात्रा | (ख) केवलं जन्महेतवः। |
| (ii) आचार्यय प्रियं धनमाहृत्य | (ख) स ताभ्यो बलिमग्रहीत्। |
| (iii) स पिता पितरस्तासां | (ग) प्रजातन्तुं मा व्यवच्छेत्सीः। |
| (iv) प्रजानामेव भूत्यर्थं | (घ) विनिर्मितं छादनमज्ञतायाः। |

15. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां प्रसंगानुसारं शुद्धम् अर्थं चित्वा लिखित-(केवलं प्रश्चटुष्टयम्) ½×4=2

(i) शुल्के विपणितं राज्यं पुत्रार्थे यदि याच्यते।

(ii) अक्षोभ्यः लक्ष्मणः क्षोभितः।

(iii) ततः पुरतः पश्यन् अवादीत्।

(iv) भवान् तुरीय आश्रमसेवीति प्रणम्यते।

**मञ्जूषा**

कोपितः, चतुर्थः, विक्रीतम्, समक्षम्

## खण्डः-घ

## भागः-II 10 अङ्काः

## सामान्यसंस्कृतसाहित्यपरिचयः

16. अधोलिखित-प्रश्नानाम् उत्तराणि लिखत- (केवलं प्रश्नयम्) 1×3=3

(i) ''दौवारिकस्य निष्ठा'' इत्यस्य पाठस्य सन्दर्भग्रन्थः कः?

(ii) ''पुरन्ध्रीपञ्चकम्'' इति नाटकात् कः पाठः सङ्कलितः?

(iii) ''रघुवंशम्'' इत्यस्या: रचनाया: लेखक: क:?

(iv) ''मातुराज्ञा गरीयसी'' इत्यस्य पाठस्य सन्दर्भग्रन्थ: क:?

**17. मञ्जूषाया: साहाय्येन रिक्तस्थानानि पूरयित्वा लिखत- (केवलं प्रश्नत्रयम्)** 1×3=3

(i) 'शिशुपालवधम्' इति महाकाव्यस्य लेखक: ..................।

(ii) अर्जुनेन सह किरातवेशधारिण: भगवत: शिवस्य युद्धवर्णनं .......... इत्यस्मिन् महाकाव्ये प्राप्यते।

(iii) महाकाव्यस्य आरम्भे नमस्कारात्मकम् आशीर्वचनात्मकं वा ............ भवति।

(iv) भारतस्य स्वातन्त्र्यम् अधिकृत्य विलिखितं बृहत्तमं चम्पूकाव्यं ........... इति विद्यते।

| मञ्जूषा |
|---|
| किरातार्जुनीयम्, मातृमुक्ति-मुक्तावली, मङ्गलाचरणम्, माघ: |

**18. समुचितं मेलयत-** 1×4=4

| 'क' स्तम्भ: | 'ख' स्तम्भ: |
|---|---|
| (i) रूपकस्य भेदा: | (क) भवभूति: |
| (ii) शूद्रक: | (ख) नाट्य-शास्त्रम् |
| (iii) भरत-मुनि: | (ग) दश |
| (iv) उत्तररामचरितम् | (घ) मृच्छकटिकम् |

## संस्कृतम् ( केन्द्रिकम् ) ( कोड सं.-322 )
## कक्षा- द्वादशी

**समयः होरात्रयम्** **अङ्कयोजना उत्तरसङ्केताश्च** **सम्पूर्णाङ्काः ८०**

**अवधातव्यम्-**

1. अङ्कयोजनायां प्रदत्तानि उत्तराणि निदर्शनात्मकानि सन्ति। प्रदत्तानि उत्तराणि अतिरिच्यापि सन्दर्भानुसारम् अन्यानि उत्तराणि भवितुम् अर्हन्ति।
2. आन्तरिकविकल्पात्मकेषु प्रश्नेषु यद्यपि स्पष्टतया निर्देशः दत्तः अस्ति यत् केवलं प्रश्नद्वयम् अथवा प्रश्नत्रयम् इत्यादिकम् उत्तरं दातव्यं तथापि यदि छात्रः अतिरिक्त-प्रश्नानाम् उत्तराणि लिखति तर्हि छात्रहिताय निर्णयः कर्त्तव्यः।

   यथा अनुवादकार्ये पञ्चवाक्यानां लेखनम् अभीष्टं परं छात्रः षड् वाक्यानि लिखति तर्हि तत्र केवलं प्रथम-पञ्वाक्यानां न अपितु यानि वाक्यानि उत्तमानि सन्ति तेषां मूल्याङ्कनं करणीयम्।
3. श्लोके नाट्यांशे वा पृष्टाः प्रश्नाः अवबोधात्मकाः सन्ति। अतः विद्यार्थिनः एतेषु प्रदत्तशब्दानां स्थाने समभाव-पर्यायवाचि-शब्दानां प्रयोगं कर्तुं शक्नुवन्ति। तदर्थम् अङ्काः देयाः। यदि विद्यार्थिनः उत्तरलेखन-समये समुचितानां विभक्तीनां वचानानां च प्रयोगं न कर्तुं शक्नुवन्ति, तर्हि अंशतः अङ्का कर्तनीयाः न तु सम्पूर्णाङ्काः
4. त्रुटिपूर्णवर्तन्यै व्याकरणात्मक-प्रयोगाय च अनुपाततः अङ्का कर्तनीयाः न तु सम्पूर्णाङ्काः।
5. आंशिक-दृष्टया समुचितेभ्यः उत्तरेभ्यः अपि अङ्काः देयाः।
6. रचनात्मक-कार्ये वाक्यरचना प्रमुखा न तु वाक्यसौन्दर्य-तत्वम्। अतः आंशिकवाक्यशुद्धये अपि अङ्काः देयाः।

## भागः (क)

### अपठित–अवबोधनम् - 10 अङ्काः

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तान् प्रश्नान् संस्कृतेन उत्तरत- 10

(अ) एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्) 1×2=2

(i) स्वशक्तेः

(ii) नराणाम्

(iii) हस्तिनम्

(आ) पूर्णवाक्येन उत्तरत– (केवलं प्रश्नद्वयम्) 2×2=4

(i) ''संहतिः कार्यसाधिका' इति वचनं जगति प्रसिद्धमस्ति।

(ii) यस्मिन् राष्ट्रे सर्वे मानवाः, सर्वाणि राज्यानि च भेदभावं परित्यज्य एकतया व्यवहरन्ति तद्राष्ट्रं जनशक्त्या संसारस्य मुकुटमणिरिव समुज्ज्वलं भवति।

(iii) यदि वयं सङ्घीभूय स्थास्यामः तर्हि अवश्यमेव शत्रून् जेतुं समर्थाः भविष्यामः।

(इ) अनुच्छेदस्य (द्वित्रिशब्दात्मकं) समुचितं शीर्षकं लिखत। 1×1=1

संहतिः कार्यसाधिका/एकतायाः प्रभावः/सङ्घे शक्तिः कलौ युगे

अन्ये अपि शीर्षकाः भवितुम् अर्हन्ति।

(ई) यथानिर्देशम् उत्तरत-केवलं प्रश्नत्रयम्। 1×3=3

(i) (ग) रचिता

(ii) (क) भारतीयाः

(iii) (घ) मानवैः

(iv) (ख) एकतायाः

**खण्डः—ख**

**रचनात्मक-कार्यम् - 15 अङ्काः**

**2. भवान् आदित्यः। मुम्बई-नगरे वसति। भवान् गतसप्ताहे संस्कृतसम्भाषणशिबिरे भागं गृहीतवान्। तदधिकृत्य मित्रं रमेशं प्रति लिखितं पत्रं मञ्जूषायां प्रदत्तशब्दैः रिक्तस्थानानि पूरयित्वा पुनः लिखत—** ½×10=5

मुम्बईनगरतः

तिथिः-........................

प्रिय मित्र (i) रमेश!

सस्नेहं नमः।

अत्र कुशलं तत्रास्तु। गतसप्ताहे अस्माकं (ii) विद्यालये संस्कृतसम्भाषणशिबिरम् (iii) आयोजितम् आसीत्। चतुर्दशदिनानि यावत् वयं संस्कृतसम्भाषणस्य (iv) अभ्यासम् अकुर्म। तत्र एकस्याः लघुनाटिकायाः (v) मञ्चनम् अपि अभवत्। अहं तु विदूषकस्य (vi) अभिनयम् कृतवान्। सर्वे जनाः हसित्वा हसित्वा (vii) करतलध्वनिम् अकुर्वन्। अहम् इदानीं सर्वदा संस्कृतेन एव संभाषणम्। (viii) करोमि। भवान् अपि संस्कृतेन सम्भाषणस्य अभ्यासं (ix) करोतु। पितृभ्यां मम। (x) प्रणामाञ्जलिं निवेदयतु।

भवतः मित्रम्

आदित्यः।

3. मञ्जूषाप्रदत्त-पदसहायतया अधोलिखितां कथां पूरयत-

कस्मिंश्चित् नगरे दरिद्रः ब्राह्मणः वसति स्म। सः भिक्षाटनेन जीविकार्जनं करोति स्म। कदाचित् सः पिष्टेन पूर्णम् एकं (i) घटं प्राप्तवान्। तं घटं नागदन्ते अवलम्ब्य तस्य अधः उपविश्य सः एकदृष्ट्या घटमेव पश्यति स्म। एकदा रात्रौ सः (ii) चिन्तितवान्

यदि देशे दुर्भिक्ष: भवेत् तर्हि एतस्य शतरूप्यकाणां मूल्यं भवेत्। तदा अहम् एतं घटं विक्रीय तेन धनेन अजद्वयं क्रेष्यामि। कालान्तरं ता: विक्रीय महिषी: ता: विक्रीय अश्वान् च क्रेष्यामि। तान् अपि विक्रीय यथेष्टं धनं (v) सम्पादयिष्यामि। बृहत् गृहं निर्मापयिष्यामि। तदा कश्चित् (vi) ब्राह्मण: आगत्य रूपवतीं स्वकन्यां मह्यं दास्यति। अनन्तरं मम पुत्र: जनिष्यते। देवशर्मा इति तस्य (vii) नामकरणं करिष्यामि। यदा स: जानुभ्यां चलितुं समर्थ: भविष्यति तदा अहम् अश्वशालायां (viii) पुस्तकम् पठियामि। तदा देवशर्मा जानुभ्यां चलन् मम समीपम् आगन्तुम् उद्युक्त: भविष्यति। तदा तं बालं ग्रहीतुं तस्य (ix) मातरम् अज्ञापयिष्यामि। यदा सा मम वचनं न श्रोष्यति तदा अहं कोपेन पादप्रहारेण तां दण्डयिष्यामि। एवं चिन्तयन् स: (x) पादप्रहारं कृतवान् एव। पिष्टेन पूर्ण: घट: पतित:, भग्न: च।''

**अथवा**

**अधोलिखितसंवादे रिक्तस्थानानि पूरयन्तु।** 1×5=5

तन्वी– सखि अवनि! भवती ह्य: विद्यालयं न आगतवती। अपि कुशलिनी त्वम्?

अवनि– तन्वि! (i) अहं सर्वथा कुशलिनी अस्मि।

तन्वी– तर्हि ह्य: विद्यालयं किमर्थं नागता?

अवनि– (ii) ह्य: तु अहं पक्षिणां सौन्दर्यं द्रष्टुं पक्षिविहारं गता आसम्।

तन्वी– अहा! पक्षिविहारम् अगच्छत्। बहूत्तमम्। कुत्रास्ति पक्षिविहार:?

अवनि– (iii) पक्षिविहार: नोएडा-नगरे अस्ति।

तन्वी–'नोएडा' इति नगरस्थस्य पक्षिविहारस्य विषये तु अहमपि श्रुतवती। के के खगा: दृष्टा: तत्र?

अवनि–अहो! दुर्लभा: खगा: अपि दृष्टा:। अस्माकं पितर: तु कथयन्ति यत् तेषां शैशवावस्थायाम् अनेके खगा: गृहेषु इतस्तत: विचरन्ति स्म।

अवनि– वस्तुत: अद्यत्वे नगरेषु तु पक्षिणां दर्शनं प्राय: दुर्लभमेव।

तन्वी- सत्यं वदति भवती। (iv) अद्यत्वे नगरेषु तु पक्षिणां दर्शनं प्रायः दुर्लभमेव।

अवनि- भवती अपि पक्षिविहारं द्रष्टुम् अवश्यं गच्छतु।

तन्वी- आम् सखि! (v) अहं पक्षिविहारं द्रष्टुम् अवश्यं गमिष्यामि।

**अवधातव्यम्**-रचनात्मक-कार्ये वाक्यरचना प्रमुखा। अत्र अन्यानि अपि उत्तराणि भवितुं शक्नुवन्ति।

4. **निम्नलिखितवाक्येषु केषाञ्चन पञ्चवाक्यानां संस्कृतेन अनुवादं कुरुत**-1×5=5

(i) त्वं/यूयं क्रीडनार्थं कदा गमिष्यसि/गमिष्यथ।

(ii) लतिका कनिका च पठतः।

(iii) किम् अहं बहिः गच्छानि?

(iv) यूयम् अत्र किं कुरुत?

(v) चेतनः चित्रं रचयति/ निर्माति।

(vi) ह्यः बुधावासरः आसीत्।

## खण्डः ग

**अनुप्रयुक्तव्याकरणम्** **20 अङ्काः**

5. **अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत**-1×6=6

**( केवलं प्रश्नषट्कम् )**

(i) त्वदधीनम्

(ii) यान्त्यधमाम्

(iii) देव+ओदशः

(iv) सहस्रैः+अपि

(v) संन्यासिना+उक्तम्

(vi) मनुः+नाम

(vii) तावत्+मम

6. **अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं समस्तपदं विग्रहवाक्यं वा प्रदत्तविकल्पेभ्य: चित्वा लिखत-( केवलं प्रश्नपञ्चकम् )** 1×5=5

(i) (क) ज्ञानस्य उदधि:

(ii) (घ) विद्यया युक्तेन

(iii) (ख) यथोचितम्

(iv) (क) मितभाषिणाम्

(v) (ग) न अश्नन्

(vi) (घ) आचार्य: देवो यस्य स:

7. **अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं संयोजितं विभाजितं वा प्रकृतिं प्रत्ययं प्रदत्तविकल्पेभ्य: चिनुत- ( केवलं प्रश्नषट्कम् )** 1×6=6

(i) (ग) प्र+सू+क्त

(ii) (घ) निर्मनस्विता

(iii) (क) अवेक्ष्यमाणे

(iv) (ग) युक्ता:

(v) (ख) एकाकिन्+ङीप्

(vi) (ग) सेवितव्यानि

(vii) (ख) संन्यासी

8. **कोष्ठकप्रदत्तपदै: सह समुचितां विभक्तिं प्रयुज्य रिक्तस्थानपूर्तिं कृत्वा लिखत- ( केवलं प्रश्नत्रयम् )** 1×3=3

(i) (ख) मुञ्जाय

(ii) (क) भिक्षावटुना

(iii) (घ) स्वाध्यायात्

(iv) (ग) प्रज्ञया

खण्डः-घ भागः-I

**पठितांशावबोधनम्** **25 अङ्काः**

9. **अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् यथानिर्देशं संस्कृतेन उत्तरत-** **5**

**( अ ) एकपदेन उत्तरत-( केवलं प्रश्नद्वयम् )** ½×2=1

(i) कापालिकः

(ii) भोजः

(iii) कापालिकस्य

**( आ ) पूर्णवाक्येन उत्तरत-( केवलं प्रश्नद्वयम् )** 1×2=2

(i) सभामागतं कापालिकं दण्डवत् प्रणम्य मुञ्चः प्रावोचद्-हे योगीन्द्र! महापापिना मया हतस्य पुत्रस्य प्राणदानेन मां रक्षेति।

(ii) शोकसन्तप्तो मुंजः प्रायश्चित्तं कर्तुम् आत्मनो वह्नौ प्रवेशनं निश्चितवान्।

(iii) कापालिकः प्रावोचद्-राजन्! मा भैषीः। शिवप्रसादेन भोजो जीवितो भविष्यति।

**( इ ) यथानिर्देशम् उत्तरत- ( केवलं प्रश्नद्वयम् )** 1×2=2

(i) भोजः

(ii) श्रुत्वा

(iii) सभामागतम्

10. **अधोलिखितं पद्यांशं पठित्वा तदाधारितान् प्रश्नान् यथानिर्देशं संस्कृतेन उत्तरत-5**

**( अ ) एकपदेन उत्तरत- ( केवलं प्रश्नद्वयम् )** ½×2=1

(i) जगतः

(ii) आसुराः

(iii) आसुरेषु/तेषु

**( आ ) पूर्णवाक्येन उत्तरत- ( केवलं प्रश्नद्वयम् )** 1×2=2

(i) आसुरेषु मनुजेषु न शौचं नापि चाऽऽचारो न च सत्यं विद्यते।

(ii) नष्टात्मानोऽल्पबुद्धय: उग्रकर्माण: जना: जगत: क्षयाय प्रभवन्ति।

(iv) आसुरा: जना: प्रवृत्तिं च निवृत्तिं च न विदु:।

**(इ) यथानिर्देशम् उत्तरत- (केवलं प्रश्नद्वयम्)** 1×2=2

(i) क्षयाय

(ii) सत्यम्

(iii) दृष्टिम्

11. **अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् यथानिर्देशं संस्कृतेन उत्तरत-** **5**

**(अ) एकपदेन उत्तरत-(केवलं प्रश्नद्वयम्)** ½×2=1

(i) समस्तसृष्टे:

(ii) आशीर्वचांसि

(iii) गान्धर्वविवाह-विधिना

**(आ) पूर्णवाक्येन उत्तरत-(केवलं प्रश्नद्वयम्)** 1×2=2

(i) मदालसा पृच्छति यत् अत्रभवन्त: नारीस्वाधीनतामधिकृत्य किं कथयन्ति?

(ii) ऋतध्वज: गृहस्थाश्रमप्रयोगशालायाम् परीक्षार्थमुद्यत: आसीत्।

(iii) ऋतध्वज: प्रष्टुमुत्सहते यत् किं गन्धर्वराजविश्वासुमहाभागा: अपि स्वपत्नीं युधिष्ठिर इव हारितवन्त: हरिश्चन्द्र इव विक्रितवन्त:?

**(इ) यथानिर्देशम् उत्तरत- (केवलं प्रश्नद्वयम्)** 1×2=2

(i) तूष्णीम्

(ii) स्वाधीनता

(iii) कुण्डलायै

12. **अधोलिखितस्य पद्यस्य भावार्थं मञ्जूषाप्रदत्तपदै: पूरयित्वा पुन: लिखत**-1×3=3

भावार्थ:-

(i) चन्द्रेण

(ii) सुशोभिता

(iii) विद्यायुक्तेन

**अथवा**

**प्रदत्तात् भावार्थत्रयात् शुद्धं भावार्थं चित्वा लिखत-** 1×3=3

(अ) (i) यः मनुष्यः कर्माणि आरभते सः समृद्धिं प्राप्नोति।

(आ) (ii) दुष्टजनानां दोषेषु एव यत्नः भवित।

(इ) (ii) राज्ञे सज्जनः शत्रुः सन्नपि सम्मानीनयः आसीत् यथा रुग्णाय औषधम्।

13. **अधोलिखित-श्लोकस्य प्रदत्ते अन्वये रिक्तस्थानपूर्तिं कुरुत-** 1×3=3

**अन्वयः-**

(i) अपरान्

(ii) अहम्

(iii) ईश्वरः

14. **'क' स्तम्भस्य वाक्यांशस्य 'ख' स्तम्भस्य वाक्यांशेन सह मेलनं कुरुत**-½×4=2

| **'क' स्तम्भः** | **'ख' स्तम्भः** |
|---|---|
| (i) स्वायत्तमेकान्तगुणं विधात्रा | (ख) विनिर्मितं छादनमज्ञतायाः। |
| (ii) आचार्याय प्रियं धनमाहृत्य | (ग) प्रजातन्तुं मा व्यवछेत्सीः। |
| (iii) स पिता पितरस्तासां | (क) केवलं जन्महेतवः। |
| (iv) प्रजानामेव भूत्यर्थं | (ख) स ताभ्यो बलिमग्रहीत्। |

15. **अधोलिखितेतुष वाक्येषु रेखाङ्कितपदानां प्रसंगानुसारं शुद्धम् उत्तरं चित्वा लिखित-** ½×4=2

(i) विक्रीतम्

(ii) कोपितः

(iii) समक्षम्

(iv) चतुर्थः

## खण्डः-घ भागः-II

## सामान्यसंस्कृतसाहित्यपरिचयः 10 अङ्काः

16. **अधोलिखित-प्रश्नानाम् उत्तराणि लिखत- (केवलं प्रश्नयम्)** 1×3=3

(i) शिवराजविजयम्

(ii) मदालसा

(iii) महाकविः कालिदासः

(iv) प्रतिमानाटकम्

17. **गद्य-पद्य-चम्पूकाव्यस्य च विधानां समुचितं वैशिष्ट्यं चित्वा लिखत- (केवलं प्रश्नत्रयम्)** 1×3=3

(i) माघः

(ii) किरातार्जुनीयम्

(iii) मङ्गलाचरणम्

(iv) मातृमुक्ति-मुक्तावली

18. **समुचितं मेलयत-** 1×4=4

| 'क' स्तम्भः | 'ख' स्तम्भ |
|---|---|
| (i) रूपकस्य भेदाः | (क) दश |
| (ii) शूद्रकः | (घ) मृच्छकटिकम् |
| (iii) भरत-मुनिः | (ख) नाट्य-शास्त्रम् |
| (iv) उत्तररामारितम् | (क) भवभूतिः |